छितंविष्णुदेवतंप्रतिष्ठाकलाधिष्ठितंबीजयुक्तंध्यात्वा नाभ्यादिकंठपर्यंतंवह्निमंडलं
स्वस्तिकोपेतंत्रिकोणाकारंरक्तवर्णंरुद्रदेवतंविद्याकलाधिष्ठितंरंबीजयुक्तंध्यात्वा कं
ठादिभ्रुवमध्यपर्यंतंवायुमंडलंषट्कोणाकारंषड्बिंदुलांछितंहरितोपेतंकृष्णवर्णंईश्व
रदेवतंशांतिकलाधिष्ठितंयंबीजयुक्तंध्यात्वा भ्रूमध्यादिब्रह्मरंध्रांतंआकाशस्था
नंवृत्ताकारंध्यजलांछितंधूमवर्णंसदाशिवदेवतंशांत्यतीतकलाधिष्ठितंहंबीजयुक्त

ध्यात्वा तत्रपद्मपत्रमध्येदेहधर्मकंदसमद्भूतं ज्ञाननालकमैश्वर्याष्टदलोपेतंपरवै
राग्यकर्णिकंहृदयाख्यविंदुतत्कर्णिकायांजीवात्मानंआराग्रमात्रंप्रदीपकलिकाभा
सुरंअनादिमलसंछिन्नंपरविद्रूपंसंचिंत्य मूलाधारकुंडलिनीमुत्थाप्यसुषुम्नाव
र्त्मनामूलाधारादनाहतांतचक्रेस्थवर्णवर्णाधिदेवताग्रसनीब्रह्मरंध्रांतंनीलातत्र
स्थितसहस्रदलकमलकर्णिकामध्यवर्तिनिपरमात्मज्योतिषिसकलवर्णावर्णा धि
देवताकंबकंजीवात्मनंहंसःइतिमंत्रेणसंयोज्यकुंडलिनीस्वस्थानमानीयतत्रसंहारं
कुर्यात् तत्रपृथिवीस्थानेपादेंद्रियगमनक्रियागंतव्यगंधघ्राणपृथिवीब्रह्मनिवृत्तिस
मानवायूनसंस्मृत्य ॐह्रींब्रह्मणेपृथिव्याधिपतयेनिवृत्तिकालात्मनेहुंफट्स्वाहा
इतिमंत्रेणतानूसर्वान्कुंडलिनीद्वारा आपोमध्येसंहरेत् ततोअपांस्थानेरसनेंद्रिय
दानव्यरसरसनाजलविष्णुप्रतिष्ठोदानान्संचिंत्य ॐह्रींविष्णवेजलाधिपतये प्रतिष्ठा
कालात्मनेलंफट्स्वाहा इतिमंत्रेणतानूसर्वान्वह्निस्थानेसंहरेत् ततोवह्निस्थानेपा
युविसर्गविसर्जनीयरूपचक्षुःवह्निरुद्रविद्याव्यानान्संचिंत्य ॐरुद्रायनेत्राधिपत
येविद्याकालात्मनेहुंफट्स्वाहा इतिमंत्रेणतान् सर्वान्वायुमंडलेसंहरेत् ततोवायुं

राम
२६

उत्स्थानउपस्थानंतेरसनविषयंस्पर्शीस्पृष्टव्यवायुरश्वरशोत्यपानान्संस्मृत्य ॐ
ह्रींईश्वरायवायव्याधिपतयेशोणितकालात्मनेहुंफट्स्वाहा इतिमंत्रेणतानूसर्वान्
आकाशस्थानेसंहरेत् ततोआकाशस्थानेवाग्वदनवक्तव्यशब्दश्रोत्राकाशसदाशि
वशांत्यंनीतप्राणान्सर्वान्कुंडलिन्यांसंहृत्यकुंडलिनींबिंदुशक्तीxसंस्मृत्य ॐ
ह्रींसदाशिवायाकाशाधिपतयेशोणीतकालात्मनेहुंफट्स्वाहा इतिमंत्रेणतान्
सर्वान्xसंहृत्यबिंदुशक्तिंपरमात्मनिसंयोज्यनादशक्तौनादशक्तिंपरशक्तौप्रण
वेनसंहृत्य ॐह्रींहुंफट्स्वाहा इतिमंत्रेणतांपरशक्तिंपरमात्मनिसंयोज्य केवलशा
रीरेवामकुक्षौपापपुरुषंचिंतयेत् यथा ब्रह्महत्याशिरस्कंवस्वर्णलेयपुजठरं सु
रापानहृदायुक्तंगुरुतल्पकटिद्वयं तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं उपपातकरोमा
णिरक्तश्मश्रुविलोचनं खड्गचर्मधरंकृष्णमंगुष्ठपरिमाणकं अधोमुखंत्रिनेत्रंवकु
क्षौपापंविचिंतयेत् इतिपापपुरुषंध्यात्वा वामनासारंध्रेण यंबीजेनसहवायुमापूर्य
कुंभकेनयंबीजंमार्तयन्नतद्वायुनापापपुरुषंस्वदेहंसंशोषयतेवायुंदक्षनासाया
विरेच्य पुनर्दक्षनासापुटारंबीजेनसहवायुमापूर्यकुंभकेनरंबीजमावर्तयन्नतद्वह्नि

नेनवक्रिनापापपुरुषं स्वदेहं रेचयामहेथो पापपूर्यमाणमनासहनंवायुंवामनासया
विरेच्यपुनर्वामनासयावंबीजेनसहवायुमापूर्यकुंभकेनवंबीजमावर्तयन् तन्निस्र
नामृतधारयास्वदेहमस्मसंसिंचयंतंवायुंदक्षनासयाविरेच्य पुनर्दक्षनासयालंबी
जेनसहवायुमापूर्यकुंभकेनलंबीजमावर्तयन् तदुत्थितेनतेजसाअमलप्रविनंपा
स्मप्रानीरूप्यंतंवायुंवामनासयाविरेच्य पुनर्वामनासयामायाबीजेनवायुमापूर्यकुं
भकेनमायाबीजमावर्तयन् तेनकरचरणाद्यवयवसमेतंस्वदेहं निष्पन्नंविभाव्यतंवा
युंदक्षनासयाविरेचयेदिति स्थूलशरीरं निष्पाद्यसूक्ष्मशरीरं निष्पादयेत् यथा
सहस्रारकमलस्थपरमात्मनः सकाशात् सकलजगत्सिसृक्षाविज्रंभितंपरब्रह्मे
स्थारूपिणींपरशक्तिं ॐह्रींनमः इतिमंत्रेणास्वस्थानमानीयततोनादशक्तिं ततो
बिंदुशक्तिंप्रणवेनसस्थाबिंदुशक्तेः सकाशात् सकलजगत्सृष्टिहेतुभूतांकुंडलि
नींप्रणवेनसस्थाततः ॐह्रींसदाशिवायाकाशाधिपतयेशांत्यतीतकलात्मनेन
मः इतिप्राणशांत्यतीतसदाशिवाकाशश्रोत्रशब्दव्यवहनवायुआकाशस्थाने
स्थापयेत् ततोआकाशमंडलात् ॐह्रेंईश्वरायवायव्याधिपतयेशांतिकलात्म

त्मनेनमइतिप्राणशांतिश्वरवायुस्पृष्टव्यस्पर्शतद्विषायानेंद्रियस्थानंवायुस्थानेस्थाप
येत् ॐंरुद्रायतेजोधिपतयेविद्याकलात्मनेनमइतिविद्यारुद्रतेजश्चक्षुरूपविसर्जनी
यविसर्गंपायून्अग्निस्थानेस्थापयेत् ॐह्रींविष्णवेजलाधिपतयेप्रतिष्ठाकलात्मने
नमइतिउदानप्रतिष्ठंविष्णुजलरसरसनादानव्यादानहस्तानपांस्थानेस्थाप
येत् ॐह्रांब्रह्मणेपृथिव्याधिपतयेनिवृत्तिकलात्मनेनमइतिसमानवृत्तिब्रह्म
पृथिवीग्राह्यागंधान्पृथिवीस्थानेस्थापयित्वा नादशक्तिंबिंदुशक्तिंपरशक्तीनां
प्रणवेनस्वदेहव्याप्तिंविभाव्यब्रह्मरंध्रस्थपरमात्मनः सकाशात् कुंडलिन्याजी
वात्मानंसहनवर्णावर्णाधिदेवतासहितमाकाशादिचक्रेषुतत्तद्वर्णवर्णाधिदेवतास्था
पयन् हृदयकमलमानीयसोहमितिमंत्रेणहृदयकमलेजीवात्मानंस्थापयित्वाकुंड
लिनींसुषुम्नामार्गेणमणिपूरादिचक्रेषुतत्तद्वर्णवर्णाधिदेवतास्थापयन् मूलाधारं
नीत्वातत्रतांस्थापयेत् ततःस्वशरीरंनिरस्तसकलकलुषंतेजोरूपंदेवताराधन
योग्यंब्रह्मरूपंविभाव्य॥ इतिभूतशुद्धिः॥ अथप्राणप्रतिष्ठांकुर्यात् अस्यश्रीप्राणप्रति
ष्ठामंत्रस्यब्रह्माविष्णुरुद्रेभ्योऋषिभ्योनमः शिरसि ऋग्यजुःसामभ्यो छंदेभ्योनमः

मुखे श्रीपराप्राणशक्तिदेवतायैनमः हृदि आंबीजायनमः गुह्ये ह्रींशक्तयेनमः पादयोः क्रौंकिलकायनमः नाभौ ममउत्पादितेशुक्लशोनितदेहे प्राणप्रतिष्ठापनेविनियोगः इतिरक्तांजलिंदद्यात् ॐआ ह्रीं क्रौंअं कं ५ आकाशवायुअग्निसलिलपृथिव्यात्मने आं हृदयायनमः ॐहां ह्रींक्रौंइं चं ५ शब्दस्पर्शरूपरसगंधात्मनेईं शिरसेस्वाहा॥ ॐ ह्रीं ह्रींक्रौंउं टं ५ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनेऊं शिखायैवषट् ॐ ऐं ह्रीं क्रौं एं ते ५ वाक्पाणिपादपायुउपस्थात्मनेऐं कवचायहुं ॐ ओं ह्रीं क्रौं ओं पं ५ वचनादानगमनानंदविसर्गात्मनेऔं नेत्रत्रयायवौषट् ॐ अं ह्रीं क्रौं अं यं ५ मनोबुद्धिहंकारचित्तात्मनेअं अस्त्रायफट् इतिषडंगंविधाय ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हों हंसः इतिमंत्रेणव्यापकंविधाय ध्यायेत् रक्तांभ्रिपोतारुणपद्मसंस्थांपाशांकुशाक्षिशरासबाणान् शूलंकपालंदधतींकराब्जैःरक्तोत्पलत्रिनेत्रांप्रणमामिदेवीं इतिध्यात्वा हृदिहस्तंनिधाय ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हों हंसः ममप्राणइहप्राणाः ॐ हों आं ह्रीं क्रौं यं रं लं वं शं षं सं हों हंसः ममजीवइहस्थितः ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हों हंसः ममसर्वेंद्रियाणी ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हों हंसः ममवाङ्मनश्चक्षुश्रो

त्रनिष्क्रामप्राणप्राणाः इहागत्यसुखंचिरंतिष्ठंतुस्वाहा इतिमंत्रेत्रिसकृद्वाजपित्वानिज वपुर्ज्योतिर्मयंध्यात्वा इतिप्राणप्रतिष्ठा अथमातृकान्यासः तत्रमातृकाप्राणायामंकुर्यात् अगस्त्यसंहितायां इडयापूरयेद्वायुंस्वरैर्वर्णैश्चकुंभयेत् रेचयेद्यादिकैर्वर्णैर्हितः पिंगलयापुनः प्राणायामत्रयंकृत्वाव्यापकन्यासमाचरेत् अकाराद्येःक्षकारांतैरापादतलमस्तकमिति मातृकायाःषडंगंचमातृकान्यासमेवच सर्वेषांप्रथमंकृत्वापश्चात्तंत्रोदितंन्यसेत् इतिवचनात्सर्वन्यासानांपूर्वमातृकायाःअवश्यकत्वमुक्तं ललितायास्तुवर्णसंततप्रोक्तैरष्टभिरेवच तेनतस्यास्तुलिपिरेवान्यासोनैवसमीरितः इतितंत्रराजवचनात् अविद्यायाप्रकारेणवर्णाद्यैःएथक्मातृकान्यासोनास्ति अष्टवाग्देवतान्यासस्येयमातृकान्वितत्वात्इतिकेश्चित् व्याख्यातं तथापितंत्रांतरात्पृथक्मातृकान्यासोबोधव्यः तथाच स्मृत्याचविन्यसेद्देवींमातृकांपूर्ववत्सुधियेइतिस्मानार्णववचनात् तथादुर्वासामुनींद्रोपि न्यासंकृत्वागणेशाग्रहगणमहायोगिनीराशिपीठैः षड्भिःश्रीमातृकावर्णैःसहितबहुकलैरष्टवाग्देवताभिः सश्रीकंठादियुग्मेर्विमलनिजननौकेशवाद्यैश्चतत्वैःषट्त्रिंशद्भिर्धराद्यैर्पगवतीयःस्मरेत्तत्स्वमेव इत्यादिप्रा

मणवचनैरवश्यंपृथक्मातृकान्यासः कार्यः सर्ववर्णमातृकाकलामातृकामूर्तिमातृका
प्रपंचयागमातृकाभेदात्चतुर्विधः तत्रश्रीविद्यांगभूतोवर्णन्यासोदशविधः तथाहि ॐ
शुध्धबिंदुयुतंविसर्गसहितंहृल्लेखयासंश्रितंबालासंपुनरिहतंतथैवपरयाश्रीविद्ययालंकृ
तं आरोहावरोहनश्चसततंन्यासंपुनर्हंसयोःयोजानातिसएवसर्वजगतांसृष्टिस्थिति
ध्वंसकृत् अत्रशुध्धविसर्गयोरपिसबिंदुनाकार्यासंप्रदायात् कलामातृकान्यासोपि
द्विधा तत्रोत्थकलान्यासोअष्टत्रिंशत्कलान्यासश्च मूर्तिन्यासेपिद्विविधा केशवादि
श्रीकंठदेवभेदात् चतुर्थःप्रपंचयागः तत्रादौशुध्धमातृकान्यासमाह स्वरैःपूरकंकृत्वापं
चवर्गैःकुंभकंकृत्वायादिदशभिःरेचयेत् इडयापाणायामत्रयंसकृद्वाकृत्वा ऋष्यादिन्या
समाह अस्यश्रीशुध्धमातृकान्यासस्यब्रह्मणोऋषयेनमः शिरसि गायत्रीछंदसेनमः
मुखे शुध्धमातृकासरस्वतीदेवतायैनमः हृदि हलोबीजेभ्योनमः गुह्ये स्वरेभ्योशक्ति
भ्योनमः पादयोः क्षमाकारायकिलकालायनमः नाभौ ममोपात्तसमस्तश्रीविद्यो
पासनसिध्धिद्वारायेतिन्यासेविनियोगः इतिकरसंपुटंवदेत् अथकरशुध्धिन्यासः अंनमः दक्ष
करतले आंनमः वामकरतले इंनमः दक्षकरपृष्ठे ईंनमः वामकरपृष्ठे उंनमः दक्ष

करअे ऊंनमः वामकरअे ऋंॠंऌंॡंएंऐंओंऔंअंअः एतान्दशवर्णान्नमोतान्
दक्षकनिष्ठामारभ्यवामांगुष्ठांतंविन्यस्य कादिसांतान्नमोतान्वर्णान्वामतर्जनीमा
रभ्यदक्षतर्जन्यंतंएकैकशोंस्पांशरावायांमूलोपमूलमध्याग्रक्रमाच्चतुरश्चतुरोविन्य
स्यहलावंगुष्ठयोःक्षकारंव्यापकंखनकरयोन्यसेत् इतिकरशुध्धिन्यासः अत्रसर्वत्र
न्यासपूजादौमायान्लक्ष्मीतिद्विनारंयोजयेत् अथषडंगः ह्रींश्रींकरवांघडङ्गं आंह
दयायनमः अंगुष्ठयोः ह्रींश्रींइंवंछंजंझंञंईं शिरसेस्वाहातर्जन्योः २उंटं५ऊं
शिखायैवषट् मध्यमयोः २एंतं५ऐंकवचायहुं अनामिकयोः २ ओंपं५औंनेत्र
त्रयायवौषट् कनिष्टिकयोः २अंयं१०अःअस्त्रायफट् करतलकरपृष्ठयोः २
अंकं आंहृदयायनमः २ईंवंएंशिरसेस्वाहा २उंटं५ऊंशिखायैवषट् २ऐंतं५
ऐंकवचायहुं २ओंपं५औंनेत्रत्रयायवौषट् २अंयं१०अःआस्त्रायफट् इतिकरंग
न्यासो ततोअकारादिक्षांतैः सबिंदुभिः नमोंतवर्णैरापादतलमस्तकंव्यापकन्या
सं कुर्यात् ततोसूक्ष्मध्यानं व्योमंहोरसनार्णकर्णिकमरोहद्वेस्युरक्तेसरंपत्रं
तत्तत्पंचवर्गायशालार्णादित्रिवर्गंक्रमात् आरभ्यत्रिपुलांतलांगलयुताक्षोणी

पुरेणाहृत्यवर्णान्वैविरासिस्थितेविघ्नहृद्ध्वंसिमृत्युंजयं व्योमहकारः इंदुसः ओस्व
रः रसनार्णवैविसर्गः इतिह्सौः बीजकर्णिकं स्वरहृद्गगनकेसरं वर्गाष्टपत्रं दिग्गतेलां
तंवंबीजं लांगलिहंबीजंदिग्गतंभूबिंबेनहृत्तेअमृतमयेमातृकायंत्रिरासिध्या
त्वा अंतमातृकान्यसेत् ततुक्तंदक्षिणमूर्त्तिसंहितायांकालपत्रांबुजेकंठेस्वरान्सप्त
कंप्रविन्यसेत् हृद्यर्कपत्रेतद्वर्णान्नाभीदशदलेन्यसेत् दशवर्णान्लिंगदेशेषट्द
लेषट्तथेश्वरि चतुर्दलेतथाधारेचतुर्वर्णांस्ततोन्यसेत् भ्रूमध्येद्विदलेहक्षाविन्यं
तमातृकांन्यसेत् ततुक्तंज्ञानार्णवे द्वयष्टमात्रांबुजेकंठेस्वरान्षोडशाविन्यसेत् द्वा
दशांतदृक्सरोजेकादीन्हांतान्विन्यसेत् दशपत्रांबुजेनाभौडकारादीन्न्यसेदवा
षट्पत्रमध्येलिंगेवबकारादीन्यसेत्ततः आधारेचतुरोवर्णान्वकारादीन्चतुर्दले
हृत्क्षोभ्रूमध्यगेपत्रेद्विदलेविन्यसेत्क्षिये इत्यंतमातृकान्यसेदिति आधारेलिंगना
भौप्रकल्पितहृदयेतालुमूलेललाटे दलत्रेषोडशौरे द्विदशदशदले द्वादशार्धेचतुष्के
वासांतेबालमध्येऽफकठसहितेकंठदेशेस्वराश्च हंक्षंतवार्थयुक्तेसकलदलग
तंवर्णरूपंनमामि अत्रविशुद्धचक्रमारभ्यषट्चक्रेषुतत्तद्वर्णान्बिंदुयुक्तान्नमो

तान्प्रादक्षिण्येनन्यसेत् ननुमूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाचक्रमिति
चक्रक्रमः एवंचक्रक्रममुल्लंघ्यविशुद्धचक्रमारभ्यअंतमातृकाकिमितिउक्ता उच्यते ॥
मातृकायाःअकारादिक्षकारांतावधिवर्णक्रमश्लिष्यति विशुद्धचक्रेषोडशदलेषुअका
रादिषोडशंस्वारान्श्लिष्यंति अतोचक्रक्रममुल्लंघ्यमातृकावर्णक्रमेणविशुद्धचक्रमार
भ्यअंतमातृकान्यसेत् अंतमातृकायांलकारोनास्ति न्यासोयथा विशुद्धौकंठेषोड
शदलकमलंऊर्ध्वमुखंध्यात्वातत्रदलेषुपूर्वादिप्रादक्षिण्येन २अंनमः २आंनमः २
इत्यादिषोडशस्वरान्न्यसेत् अनाहतेहृदयेद्वादशदलंध्यात्वातत्रप्रादक्षिण्येन २
कंनमः २इत्यादिठांतान्द्वादशवर्णान्न्यसेत् मणिपूरनाभौदशदलेडादिफांतान्द्व
शवर्णान्प्रादक्षिण्येनन्यसेत् स्वाधिष्ठानेलिंगेषट्दलेबादिलांतान्षट्वर्णान्प्रा
दक्षिण्येनन्यसेत् मूलाधारेचतुर्दलेवादिसांतान्चतुरोवर्णान्प्रादक्षिण्येनन्यसे
त् आज्ञायांद्विदले २हंनमः क्षंनमः इतिदक्षयाक्रमेणन्यसेत् इतिअंतमातृकान्या
सः अथबहिर्मातृकान्यासः तत्रस्थूलध्यानमाह प्रपंचसारे पंचाशद्वर्णभेदैर्वि
हितवदनदोःपादयुक्कुक्षिवक्षोदेशांभास्वत्कपर्दीकलितत्रिवृत्तिकलाभिंदुकुंदावदा

DR. BHAU DAJI MEMORIAL डॉक्टर भाऊदाजी स्मारक

तां अक्षस्रक्कुंभवीणालालितवरकरात्यक्षपोनांपद्मसंस्थामष्टाकल्पंवतुंगस्तन
जघनभरांशोभारतींतांनमामि इतिबहिर्मातृकांध्यात्वान्यसेत् तत्रस्थानान्याह।
काननहृत्ते द्व्यक्षिश्रुतिनोगेष्टदंतपंक्तिमूर्धास्पदोयत्संध्यग्रेषुस्वपार्श्वद्वयएष्ट्ना
भिजठरेषु हृदोमूलापरागलकक्षेषुहृदादिपाणिपादयुगे जठराननयोर्व्यापसंहा
न्यसेदक्षराणिक्रमशः मूर्धास्येऽस्यत्रमूर्धातालुमूले आस्योनिह्वायां एषुस्थानेषु
न्यसेत् २अंशिरसि २ओंनमः मुखवृत्ते २ईंनमः दक्षनेत्रे २ऊंनमः वामनेत्रे २ऊंनमः
दक्षकर्णे २ऋंनमः वामकर्णे २ॠंनमःदक्षनासापुटे २ऌंनमःवामनासापुटे २ॡंन
मःदक्षकपोले २ॡंनमःवामकपोले २एंनमःऊर्ध्वोष्टे २ऐंनमःअधरोष्टे २ओंनमःऊ
र्ध्वदंतपंक्तौ २औंनमःअधोदंतपंक्तौ २अंनमःतालुमूले २अःनमःजिह्वायां २
कंनमःदक्षबाहुमूले २खंनमःकूर्परे २गंनमःमणिबंधे २घंनमःअंगुलिमूले
षु २ङंनमःअंगुल्यग्रेषु २चंनमःमैवामबाहुमूले २छंनमःकूर्परे २जंनमःमणि
बंधे २झंनमःअंगुल्यग्रेषु २ञंनमःअंगुल्यग्रेषु २टंनमःदक्षपादमूले २ठंन
मःजानुनि २डंनमःगुफे २ढंनमःअंगुलिमूलेषु २णंनमःअंगुल्यग्रेषु २तंनमः

वामपादमूले २थंनमःजानुनि २दंनमःगुफे २धंनमःअंगुलिमूले २नंनमःअंगु
ल्यग्रेषु २पंनमःअंगुल्यग्रेषु २पंनमःदक्षपार्श्वे २फंनमःवामपार्श्वे २बंनमःपृष्ठवं
शे २भंनमःनाभौ २मंनमःउदरे २यंनमःहृदये २यंनमःदक्षांसे २लंनमःअ
परगले २वंनमःवामांसे २शंनमःव्यापकलेनहृदयादिदक्षकराग्रांतं २षंनमः
व्यापकलेनहृदयादिवामकराग्रांतं २संनमःव्यापकलेनहृदयादिदक्षपादाग्रांतं २
हंनमःव्यापकलेनहृदयादिवामपादाग्रांतं २लंनमःव्यापलेनहृदयादिजठरा
नं २क्षंनमःव्यापकलेनहृदयादिआननांतं अत्रकश्चित्यकारादिषुलगादि
धातुयोजनंकुर्वंति ततोअकारादिक्षांतेमातृकावर्णेव्यापकंन्यसेत् इतिशुद्ध
मातृकान्यासः सच्चिद्रूपः अत्रशुद्धलेनपिनादबिंदुकालात्मकंअनुनासिकं
प्रत्येकमक्षराणामुपरिन्यासेबोध्यं तस्यचैतन्यरूपत्वात् तेनविनाऽर्थक्रि
यैकार्यकरणेअक्षमत्वात् तथाचतंत्रराजे बिंदुसंगोहसोतुर्यस्वरश्चेतिवपंचमं भा
रासामातृकादेहेविधिचैतन्यजंभपा तेनतेहिनरूपेणापालेमंत्राःविधात्तथापरे
निःप्राणेदेहयत्कार्यकरणेऽक्षमाःस्मृताः येयेमंत्राःप्रोक्तवर्णविहीनास्तेश्वयोजयेत्

नेननेबलवेनस्युः कार्येषुसफलान्विताः इतिमंत्रबिंदोरेवअनुनासिकमिति अथबिंदु
मातृकान्यासः तत्रबिंदुपूर्वकामिमान्यस्यसहस्रंस्यप्रतिलोमतः विद्यात् पूर्वादिनान्
विद्यान्ऋष्यादीन्पूर्ववद्युतामिति संयुतान्षडंगयुक्तान्इत्यर्थः ध्येयावर्णमयेपद्मेदेवी
गाग्यलुप्तशुभ्रोशिवा तत्रध्याने अक्षस्रजंहरिणपोतमुद्यत्कैटंकविद्योकरंदधा
नतंदधतींत्रिनेत्रांअर्धेंदुमौलिमरुणामरविंदासांवर्णेश्वरींप्रणमतस्तनभारमग्न
इतिवर्णान्ध्यात्वासंहारक्रमेणन्यसेत् तद्यथा-ह्रींश्रींक्षंनमः व्यापकत्वेनहृदयादि
आननांतं २लंनमः कायत्वेनहृदयाजठरांतं २हंनमः व्यापकत्वेनहृदयादिवामपा
दाग्रपर्यंतं २संनमः व्यापकत्वेनहृदयादिदक्षपादाग्रांतं २रत्यादि २अंनमः शिरसि इ
त्यंतंऋषेणयथास्थानेषुन्यसेत् ततोक्षकारादिअकारांतं प्रतिलोमेनव्यापकंकुर्यात्
इतिसबिंदुसंहारमातृकान्यासः अथविसर्गमातृकान्यासः अथन्यासादिकंपू
र्ववत् ३ध्यानेविशेषः सेंदूरकांतिमिलापरश्रींत्रिनेत्रांविद्याक्षसूत्रमृगपोतवरंद
धानां पार्श्वस्थितांभगवतीमपिकांचनाभांध्यायेत्करांबुरुहपुस्तकवर्णमालां।।
इतिध्यात्वास्थित्यादिन्यसेत् तत्रकां।खगः घः ङः चः छः प्रतिक्षः पर्यंतंयथास्थ

नेन्यसेत् अत्रबिंदुर्नालक्षते विसर्गस्यैवअनुनासिकत्वात् तथापिसोपदाहरणाः बिंदु
योजनांकुर्वंति ध्यानेवामाधः करमारभ्यदक्षमूर्ध्वकस्यपर्यंतंआयुधध्यानंशिवस्य।।
शक्तेस्तुवामदक्षकरद्वये इतिविसर्गस्थितिमातृकान्यासः अथह्रींलेखामातृकान्या
सः शक्तिपूर्वंतनोयस्यमातृकांमनुविद्यमइति अस्यश्रीशक्तिमातृकामंत्रस्यशक्ति
ऋषिः गायत्रीछंदः आदिशक्तिमातृकामयीभुवनेश्वरीदेवता श्रीविद्योगत्वेनन्या
सेविनियोगः इतिस्मृत्वामूर्धादिषुन्यसेत् ततः २अंकं५ आंह्रींहृदयायनमः २
इंवंईंह्रींशिरसेस्वाहा २उंटंऊंठुंशिखायैवषट् २एंतंऐंढंकवचायहुं २ओंपं५ औं
ह्रींनेत्रत्रयायवौषट् २अंयं५० अंरः अस्त्रायफट् षडंगदीर्घमायाबिजेनैवषडंग
मित्यपरे ध्यानं उद्यत्कोटिदिवाकरप्रतिपयत्तुंगोरुपीनस्तनीबद्धार्धेंदुकोटिकेलि
किरीटकोटिरत्नानमंनीरसंशोभिता बिभ्राणाकरपंकजेजपवटीपात्रांकुशौ
पुस्तकंदिस्याद्दोजगदीश्वरीत्रिनयनांपद्मेनिषण्णासुखं दक्षाधःकरमारभ्यवा
माधः करपर्यंतमायुधध्यानं इतिध्यात्वान्यसेत् २ह्रींअंनमः शिरसि २ह्रिंआं
नमः मुखवृत्ते २ह्रींइंनमः दक्षनेत्रे २ह्रींईंनमः वामनेत्रे इत्यादिह्रींक्षंनमः इत्यं

नंयथास्थानं न्यसेत् ततस्तेनैव व्यापकं न्यसेत् इतिवाग्भिमातृकान्यासः अथ बालासंपुटितमातृकान्यासः अस्यश्रीबालासंपुटितन्यासस्य दक्षिणामूर्त्तिऋषयेनमः शिरसि पंक्तिछंदसेनमः मुखे मातृकारूपिणीबालापरमेश्वरीदेवतायेनमः हृदि श्रीविद्यांगत्वेन न्यासे विनियोगः इतिकरसंपुटंवदेत् २ अंकं ५ आंऐं हृदयायनमः २ इंवंईंक्लींशिरसेस्वाहा २ उंटंऊंसौः शिखायैवषट् २ एंतं५ऐंसौः कवचायहुं २ ओंपं५ औंक्लींनेत्रत्रयायवौषट् २ अंयं५ अःऐंअस्त्रायफट् ध्यानं उक्तानीरयरकुंकुमांगदमणिश्रीवियहारोर्मिकाविद्योतदलयादिकंकंकणकटीसूत्रास्फुरन्नूपुरां माणिक्योदरबंधुरत्नमरालिंदोःकलांबिभ्रतीं श्रीपाशांकुशपुस्तकाक्षवलयोरस्रोध्वबाह्वादिनः पूर्णेंदुप्रतिमप्रसन्नवदनांनेत्रत्रयोद्भासितां इंदुक्षीरवलक्षगात्रविलसन्माल्यानुलेपांबरां पंचाशल्लिपिभिर्विभाजितविलजगत्वाग्देवतादेवतां मूलाधारसमुद्गतांभगवतीं वर्णांबुजेविंशयेत् इतिध्यात्वान्यसेत् २ ऐंक्लींसौः अंसौः क्लींऐंनमः शिरसि २ ऐंक्लींसौः आंसौः क्लींऐंनमः मुखवृत्ते २ ऐंक्लींसौः इंसौः क्लींऐंनमः दक्षनेत्रे २ ऐंक्लींसौः ईंसौः क्लींऐंनमः वामनेत्रे २ इत्यादिक्षपर्यंतंबालासंपुटितान् मातृकावर्णान् यथास्थ

नेन्यसेत् इतिबालासंपुटितमातृकान्यासः अथपरासंपुटितमातृकान्यासः अस्यश्रीपरासंपुटितमातृकान्यासस्यब्रह्मणेनमः शिरसि गायत्रीछंदसेनमः मुखे परामातृकादेवतायेनमः हृदि श्रीविद्यांगत्वेन न्यासे विनियोगः इतिकरसंपुटंवदेत् २ अंकं ५ आंसौंहृदयायनमः २ इंवंईंसौंशिरसेस्वाहा २ [illegible] ऐंतंऐंसौः शिखायैवषट् २ ओंपं५ औंसौंनेत्रत्रयायवौषट् २ अंयं५ अःसः अस्त्रायफट् ध्यानं ॥ अकलंकलशीकामाक्ष्यांवंदेकलावतीं मुद्रापुस्तकसद्दधतप्रसन्नामिमरंकलां ॥ इतिध्यात्वान्यसेत् २ सौः अंसौः नमः शिरसि २ सौः आंसौः नमः मुखवृत्ते २ सौः इंसौः नमः दक्षनेत्रे २ सौः ईंसौः नमः वामनेत्रे २ इत्यादिक्षपर्यंतंपरासंपुटितान् मातृकावर्णान् यथास्थानेन्यसेत् ततस्तेनैवव्यापकेन्यसेदिति परासंपुटितमातृकान्यासः अथश्रीविद्यामातृकान्यासः अस्यश्रीविद्यामातृकान्यासस्य दक्षिणामूर्त्तिऋषयेनमः शिरसि ॥ पंक्तिछंदसेनमः मुखे श्रीमातृकात्रिपुरसुंदरिदेवतायेनमः हृदि श्रीविद्यांगत्वेन न्यासे विनियोगः इतिकरसंपुटंवदेत् ह्रींश्रींअंकं ५ हृदयायनमः २ इंवं ५ ईंहं ६ शिरसेस्वाहा २ उंटं ५ ऊंसं ४ शिखायैवषट् २ एंतं ५ ऐंसं ४ कवचायहुं २ ओंपं ५ औंहं ६

नेत्रत्रयायवौषट् २अंयं१०अः ह५अस्त्रायफट् ध्यानं आरक्ताभांत्रिनेत्रांप्रणिमुकुटन्वतीं
रत्नताटंकरम्यांहस्ताभोजैःसपाशांकुशमदनधनुःसायकैर्विस्फुरंतीं आपीनोत्तुंगवक्षोरुह
तरविलुठल्लोरहारोज्वलांगीं ध्यायन्नमोस्त्वलमरुणविवसनेश्वरीमाश्रयामि वामदृ
योरायतदाघस्थपोरन्येदृस्यायुधध्याने इतिध्यात्वान्यसेत् ह्रींश्रींमूलंअंनमः शिर
सि २ मूलंआंनमःमुखवृत्ते २ मुलंईंनमःदक्षनेत्रे २ मुलंईंनमःवामनेत्रे २ इत्यादिक्ष
पर्यंतंमूलविद्यायामात्कावर्णान्यथास्थानेन्यसेत् तेनैवव्यापकमिति श्रीविद्यामात्
कान्यासः अथहंसमात्कान्यासः अस्यश्रीहंसमात्कान्यासस्यब्रह्मणेऋषयेनमः
शिरसि गायत्रीछंदसेनमःमुखे श्रीआद्याकालिकामात्कामूर्तिहरगौरीदेवतायैनमः
हृदि श्रीविद्योगत्वेनन्यासेविनियोगः २कंअंकं५ह्सौंहृदयायनमः २ ईंवंईंस्त्रीं शिर
सेस्वाहा २ उंटंऊंस्लूं शिखायैवषट् २एंतं५ ऐंह्सैंकवचायहुं २ओंपं५ औंस्त्रौंनेत्रत्र
यायवौषट् २अंयं१०अः ह्स्त्रः अस्त्रायफट् ध्यानं विद्युद्ज्ञानुस्फुरिततडिदाकारम
र्धांबिकेशोपाकोभीतिवरदपरशुंसंदधानंकराब्जैः दिव्याकल्पैर्नवमणिमयैश्शो
भिनेविश्वमूलंसोम्याग्नेयंवपुरयमुवश्वंइऊंवूंत्रिनेत्रं इतिध्यात्वान्यसेत् वामोर्ध्व

दिदक्षोर्ध्वकरपर्यंतंमायुधध्यानं २ हंसःअंनमः शिरसि २ हंसःआंनमःमुखवृत्ते २
हंसःईंनमःदक्षनेत्रे २हंसःईंनमःवामनेत्रे २इत्यादिक्षपर्यंतंसर्वान्यसेत् तेनैव
व्यापकमिति हंसमात्कान्यासः अथपरमहंसमात्कान्यासः अस्यश्रीपर
महंसमात्कान्यासस्य परमहंसायऋषयेनमःशिरसि विराट्छंदसेनमःमुखे २
परमात्मस्वरूपिणीचिन्मयीमात्कादेवतायैनमःहृदि श्रीविद्योगत्वेन्यासेविनि
योगः अथषडंगमाचरेत् तत्रप्रणवपुटितमात्कांगमंत्रैरेव २ॐअंकं५ॐहृदया
यनमः २ॐईंवं५ईंॐशिरसेस्वाहा २ॐउंटं५ऊंॐशिखायैवषट् २ॐएंतं५
एंॐकवचायहुं २ॐओंपं५ओंॐनेत्रत्रयायवौषट् २ॐअंयं१०अःॐअस्त्रा
यफट् ध्यानं श्रीमत्सरात्ममनुजप्रतिभातवर्णरूपांमनोरगम्यपदवींपरिशीयमानं विद्या
क्षसूत्राकलशांदधतींचमुद्राध्यायेत्समस्तजननीविशदांत्रिनेत्रां वामाद्यधःकर
योरादायेतरापूर्ध्वकरयोरन्येदृत्यायुधध्याने विद्यापुस्तकं मुद्राज्ञानमुद्रा ॐ इतिध्या
त्वान्यसेत् २ सोहंहृदयनमः व्यापकत्वेनहृदयादिआननांतं २सोहंनमः व्यापक
त्वेनहृदयादिदक्षपादांतपर्यंतं इत्यादिअंपर्यंतहंसारूढक्रमेणयथास्थानेन्यसेत्

तेनैवव्यापकमिति ऽनिपरमहंसमातृकाअवरोहन्यासः पुनर्हंसमातृकान्यासः न्यासंपु
र्हंसयोः इत्यत्रहंसपरमहंसपरमहंसयोरैक्यभावेनन्यासः ननऋष्यादिन्यासध्यानांतं पर
मौंहंसवत्कृत्वान्यसेत् यथा २ हंसः सोहं अंनमः २ हंसः सोहं आंनमः २ हंसः सोहं इं
नमः इत्यादिस्तंशुद्धमातृकास्थानेषुन्यसेत् इतिपुनर्हंसमातृकाऽनिर्देशाविधमातृका
नासः अथतारोछुकलान्यासः तथाच केवलोमातृकांन्यस्यशक्तिपसक्तीवमवेद्यादि ता
रोछुषिःकलाभिःस्थानेविन्यसेन्मातृकाक्षरान् ताराद्यवर्णसंयुक्ताःन्यस्तन्यासाः न
मोन्विताः स्थानेष्वेतेषुथपुनर्मातृकायाःकलान्यसेत् ताराद्यपंचदशेरेफ्यःपंचाशद्वर्णा
ः कलाः इति अस्यश्रीप्रणवकलान्यासस्य प्रजापतिऋषिः गायत्रीछंदः कलामातृका स
रस्वतीदेवता श्रींविद्यांगत्वेनन्यासेविनियोगः इतिऋष्यादिकंमूर्धादिषुविन्यस्यषडंगंसमा
चरेत् २ अंअंआंहृदयायनमः २ इंअंईंशिरसेस्वाहा २ उंअंऊंशिखायैवषट् २ एंअं
ऐंकवचायहुं २ ओंअंऔंनेत्रत्रयायवौषट् २ अंअंअः अस्त्रायफट् ध्याने हसैसैः पद्मंर
थांगंगुणमथहरिणंपुस्तकंवर्णमालांकंटंशूलंकपालंदरमस्तैलसहैमकुंभंवहंतीं मुक्तावि
द्युत्प्रयोदंस्फटिकनिभांपाबंधुरैः पंचवक्त्रैस्त्रिनेत्रोज्ज्वलांसकलशशिनिभांशार

DR BHAU DAJI MEMORIAL

दांतांनमामि वामाधःकरयोराद्ये तदायूर्ध्वयोरन्येतदायूर्ध्वयोरपरे तदायूर्ध्वयोरितरे
तदायूर्ध्वयोरंतेऽस्यापध्यानं दरंरवः गुणंपात्राः इतिध्यात्वावर्णारविंदेमानंसंपूजई
त्यान्यसेत् शुद्धमातृकास्थानेष्वं ह्रीं श्रीं ॐ अंनिवृत्त्यैनमः २ ॐ आंप्रतिष्ठायैनमः २
ॐ इंविद्यायैनमः २ ॐ ईंशांत्यैनमः २ ॐ उंईंधिकायैनमः २ ॐ ऊंदीपियैनमः २ ॐ ऋं
रेविकायैनमः ॐ ॠंमोचिकायैनमः २ ॐ ऌंपरायैनमः २ ॐ ॡंसूक्ष्मायैनमः २ ॐ
ओंव्योमरूपायैनमः २ ॐ अंअःअनंतायैनमः २ ॐ एंसूक्ष्मामृतायैनमः ॐ ऐं ज्ञाना
मृतायैनमः २ ॐ ओंआप्यायैनमः ॐ औंव्यापिन्यैनमः २ ॐ अं व्योमरूपा
यैनमः २ ॐ अंःआनंतायैनमः ॐ इतिस्वरसंभवाकालाः सदाशिवेनसंज्ञाताना
दादेताःसितलिषः अक्षस्रक्पुस्तकगुणकपालाढ्यकरांबुजाः इतिध्येयाः २ ॐ कं
सह्यैनमः ॐ खंक्रूरायैनमः २ ॐ गंसह्यायैनमः २ ॐ घंमेधायैनमः २ ॐ ङंकालायै न
मः २ ॐ चंलक्ष्म्यैनमः २ ॐ छंधरायैनमः २ ॐ जंस्थिरायैनमः २ ॐ झंस्थित्यैनम
२ ॐ ञंसिध्यैनमः एताःकवर्गीजाःकलाः अकाराद्धलणोत्पन्नाःसप्तस्वामीकरप
द्माः करांबुजनेजघनाक्षस्रक्पंकजाभयकुंडकाः इतिध्येया २ ॐ टं जरायैनमः २

ॐ ढं पालिन्यैनमः २ ॐ णं शोल्यैनमः २ ॐ तं ऐश्वर्यैनमः ॐ थं रत्यैनमः २ ॐ दं कामिकायैनमः २ ॐ धं वरदायैनमः २ ॐ नं दीर्घायैनमः २ एताः टवर्गजाताः कालाः उकारादिधनोमन्नन्नालमालदलसन्निभाः अभीतिदरत्व त्रिष्टबाहवः परिकीर्तिताः दरशंखः इष्टवरः २ ओं पं तीक्ष्णायैनमः २ ॐ फं रोद्र्यैनमः २ ॐ बं भयायै० ॐ भं निद्रायै० २ ॐ मं तंद्रायै० २ ॐ यं क्षुधायै० २ ॐ रं क्रोधन्यै० २ ॐ लं क्रियायै० २ ॐ वं उत्कायै० २ ॐ शं मृत्युरूपायै० २ एताः पयवर्गजाः कलाः रुद्रेण मार्गउत्पन्नाः शरच्चंद्रनिभप्रभाः उद्यद्दोर्भयवरूलं कपालं बाहुशिवरं इतिध्येयाः २ ॐ षं पीतायैनमः २ ॐ सं श्वेतायैनमः २ ॐ हं अरुणायैनमः २ ॐ लं असितायै० २ ॐ क्षं अनंतायैनमः २ एताश्च ऐईश्वरेणोद्भूताः विंदोर्जुम्भणकुसुमसन्निभाः अभयं हरिणं टंकं दधानाबाहुशिवरं इतिध्येयाः एकपंचाशदाख्याताः कलाः सर्वसम्मताः यः सदाविन्यसेन्मंत्रीसंरेद्याः पदमश्नुते इतिमातृकान्यासः॥ अथाष्टत्रिंशत्कलान्यासः २ अं अमृतायैनमः शिरसि २ आं मानदायै० मुखे २ इं पुषायैनमः दक्षचक्षुषि २ ईं तुष्यैनमः वामचक्षुषि २ उं पूषायै० दक्षकर्णे २ ऊं रत्यै० वामकर्णे २ ऋं धृत्यै० दक्षनासापुटे २ ॠं शशिन्यै० वामनासापुटे २ ऌं चंद्रिकायै० दक्षगंडे २ ॡं कांत्यै० वामगंडे २ एं ज्योत्स्नायै० ऊर्ध्वोष्ठे २ ऐं श्रीयै० अधरोष्ठे २ ओं प्रीत्यैनमः ऊर्ध्वदंते २ औं अंगदायै० अधोदंते २ अं पूर्णामृतायै० रसनायां २ कं पंततपित्र्यै० दक्षबाहुमूले २ खं वंतापित्र्यै० कूर्परे २ गं फंधूम्रायै० मणिबंधे २ घं पंमरीच्यै० अंगुलिसंधिषु २ ङं नं ज्वालिन्यै० अंगुल्यग्रेषु २ चं धंरुच्यै० वामबाहुमूले २ छं दंसुषुम्नायै० कूर्परे २ जं धंभोगदायै० मणिबंधे २ झं नंविश्वायै० अंगुलिसंधौ २ ञं पंबोधिन्यै० अंगुल्यग्रे २ टं धंधारिण्यै० दक्षपादमूले २ ठं उंक्षमायै० जानुनि २ डं पंधूम्रार्चिषे० गुल्फे २ ढं णंज्वालायै० अंगुष्ठसंधौ २ लं ज्वलिन्यैनमः अंगुल्यग्रे २ वं ज्वालिन्यै० वामपादमूले २ शं विस्फुलिंगिन्यै० जानुनि २ षं सुश्रीयै० गुल्फे २ सं सुरूपायै० अंगुलिसंधौ २ हं कपिलायै० अंगुल्यग्रे २ लं हव्यवाहिन्यै० मस्तके २ क्षं कव्यवाहिन्यै० व्यापकेकुर्यात् इतिअष्टत्रिंशत्तनेनः कलान्यासः अथकेशवादिमूर्तिमातृकान्यासः तथाचअग्निसंहितायां मायाद्यैः पुटितान्वर्णान्केशवादिभिनथामरान् न्यासक्रियान्न्यसेद्वर्णान्मस्तकादिक्रमेणतु केशवाद्यास्मरेन्नामान्

रोरवक्त्रकलसत्करः शंखचक्रगदाधरः पीतांबरसमानोग्यः
पंकजाभयबाहुवः इतिशामूर्त्तिध्यानं अस्यश्रीद्वात्रिंशन्मात्रकान्यासस्यसाध्यनारायणा
यऋषयेनमः शिरसि देवीगायत्रीछंदसेनमः महालक्ष्मीनारायणोदेवतायेनमः हृदि
श्रीविद्यांगत्वेनन्यासेविनियोगः इतिकरसंपुटंवदेत् २ ॐश्रींॐनमोनारायणायहंसः
सोहंअंकं५आंह्रींहंसः सोहंॐनमोनारायणायवक्त्रोल्कायस्वाहाश्रीदेव्येहृदयायनमः
२ॐश्रींॐ ॐनमोनारायणायहंसः सोहं इं५ ईं ह्रींहंसःसोहंॐनमोनारायणायम
होल्कायस्वाहा श्रीपक्षिन्येशिरसेस्वाहा २ ॐश्रींॐनमोनारायणायहंसःसोहं उं ऊं
ह्रींहंसःसोहंॐनमोनारायणायविरोल्कायस्वाहा श्रीविष्णुपत्न्यैशिखायैवषट् २ॐश्रींॐ
नमोनारायणायहंसःसोहं एं५ ऐं ह्रींहंसःसोहंओंनमोनारायणायविद्युल्कायस्वा
हाश्रैंवरदायैकवचायहुं २ॐश्रींॐनमोनारायणायहंसःसोहंओंपं५श्रौंह्रींहंसःसो
हंॐनमोनारायणायसहस्रोल्कायस्वाहा श्रींकमलरूपायैनेत्रत्रयायवौषट् २ॐ श्रींॐ
नमोनारायणायहंसःसोहंअंयं०अः ह्रींहंसःसोहंॐनमोनारायणायमनोल्कायस्वाहा
अःअस्त्रायफट् अथध्यानं हस्तैर्दधानांनवनीलरामांश्रींखंचक्रंगदांवपद्मं

कौस्तुभरियुक्तामिनिसुंदरांतांश्रीकेशवीयांतनुमाश्रयेहं इतिध्यात्वा प्रसेकंअनुलोमविलोम
हृल्लेखा श्रीकामबीजसंपुटितमात्रकाकेशवादिशक्तिमूर्त्तिःशुभमात्रकास्तेनेषुन्य
सेत् यथा ह्रींश्रीं क्लींअंक्लींश्रीह्रींकेशवादिकेशवाय ह्रींश्रीक्लींअंक्लींश्रीह्रींनारायणाय
कायेनमः २ ह्रीश्रीक्लींअंक्लींश्रींह्रींमाधवतुष्यनमः २ ह्रींश्रींक्लींईं३गोविंदायतुष्यो० ३
उं३विष्णवेधत्यो० ३ ऊं३मधुसूदनायशांत्यै० ३ ऋं३त्रिविक्रमायक्रियाय० ३ ॠं३वा
मनायदयायै० ३ ऌं३श्रीधरायमेधायै० ३ ॡं३हृषीकेशायहृषायै० ३ एं३पद्मना
भायश्रध्यायै० ३ ऐं३दामोदरायलज्जायै० ३ ओं३संकर्षणायरत्यै० ३ औं३वा
सुदेवायसरस्वत्यै० ३ अंप्रद्युम्नायप्रीत्यै० ३ अः अनिरुद्धायरत्यै० ३ कं३चक्रिणेजया
यै० ३ खं३गदिनेदुर्गायै ३ गां३शार्ङ्गिणेप्रभायै० ३ घं३खड्गिणेसत्यायै० ३ ङं३शरि
खिनेनंदायै० ३ चं३हलिनेवाण्यै० ३ छं३मुसलिनेविलासिन्यै० ३ जं३भूसिनेवि
जयायैनमः ३ झं३पाशिनेविरजायै० ३ ञं३अंकुशिनेविश्वायै० ३ टं३मुकुंदायविम
विमरायै० ३ ठं३नंदनायसुनंदाय० ३ डं३नंदिनेसत्यै० ३ ढं३नरायऋध्यै० ३ णं३
नरकघ्नेसमृध्यै० ३ तं३हरसेशुभ्रो० ३ थं३कृष्णायशुक्त्यैनमः ३ दं३सत्यायबुध्यै० ३

धं३सात्वतायमर्त्यै०३नं३नृसिंहायेक्षमायै०३पं३भूतायरमायै०३फं३जनार्दनाय मायायै०३बं३भूधरायक्लिन्यै०३भं३विश्वमूर्त्तयेक्लिन्नायै०३मं३वैकुंठायसु धायै०३यं३त्वगात्मनेपुरुषोत्तमायवसुदायै०३रं३असृगात्मनेबलिनेषड्वायै०३ लं३मांसात्मनेबलानुजायपराण्यै०३वं३मेदात्मनेबलायसूक्ष्मायै०३शं३अ स्थ्यात्मनेदर्पघ्नायसंध्यायै०३षं३मज्जात्मनेक्षमायप्रतायै०३सं३शुक्रात्मनेहंसा यप्रभायै०३हं३प्राणात्मनेवाराहायनिशायै०३लं३जीवात्मनेविमलायअमोघा यै०३ह्रींश्रींक्लींक्ष्रौंक्ष्रीं श्रीं ह्रींपरमात्मनेनृसिंहायविद्महेनमः केशवादिन्यां रयेन्यासोन्यासमात्रेणदेहिनां अच्युतानंतगोविंदाःवसत्येसत्यनसंशयः अत्रएतावत् कर्त्तुमशक्तानांकेवलनारायणमंत्रस्यपुष्टिवर्द्धनः षडंगः श्रीबीजपुटितवर्णैन्यासः इतिकेशवादिमातृकान्यासः अथश्रीकंठमातृकान्यासः तत्रऊं अज्ञायादिकादिक ऊवर्णान्मातृकायाःस्यत्रात्रिकाद्यश्रीकंठादिकान्नोवान्यसेत्स्थानेषुतेषुहि॥ अस्यश्रीश्रीकंठमातृकान्यासस्य अंतरीक्षायऋषयेनमः शिरसि अनुष्टुप्छं ६ दसेनममुखे अर्धनारीश्वरोदेवतायेनमः हृदि हलोबीजायेनमः गुह्ये ०

स्वराःशक्तयेनमः पादयोः श्रीविद्यांगत्वेनन्यासेविनियोगः ज्ञानविज्ञानार्थेऊंऐंह्रींअंकंप आंहृदयायनमः ऐंह्रींइंचंईंशिरसेस्वाहा ऐंह्रींउंटंऊंशिखायैवषट् ऐंह्रींएंतंऽपैंकवचा यहुं ऐंह्रींओंपेऽओंनेत्रत्रयायवौषट् ऐंह्रींऔंयेऽअंःअस्त्रायफट् ध्याने बंधूककांचन निभंरुचिरास्यमालंपाशांकुशोवरंनिजबाहुदंडैः बिभ्राणबिंदुसकलाक्षरपंक्तिनेत्रंअ र्धेंबिकेशमनिशंवपुरात्मयामः इतिध्यात्वान्यसेत् ऐंह्रींअंश्रींकंठंत्र्यायपूर्णोदर्यनमः शि रसि एवंशुक्लमातृकास्थानेषुन्यसेत् ऐंह्रींआंअंनंतंत्र्यायविरजायेनमः ऐंह्रींइंस्वस्मै त्र्यायशाल्मल्यै० ऐंह्रींईंत्रिमूर्तित्र्यायलोलाक्ष्यै० ऐंह्रींउंअमरेत्र्यायवर्नुलाक्ष्यै० ऐंह्रींऊं अर्धीत्र्यायदीर्घघोणायै० ऐंह्रींऋंभारभूतीत्र्यायदीर्घमुख्यै० ऐंह्रींॠंतिथीत्र्यायगोमुख्यै० ऐंह्रींऌंस्थाण्वीत्र्यायदीर्घजीह्वायै० ऐंह्रींॡंहरेत्र्यायकुंडोदर्यैनमः ऐंह्रींएंमिंडीत्र्यायोर्ध्व केश्यै० ऐंह्रींऐंभौंत्रिलिंकेत्र्यायविकृतमुख्यै० ऐंह्रींअंअक्रूरेत्र्यायश्रीमुख्यै० ऐंह्रींओं सद्योजातायज्वालमुख्यै० ऐंह्रींऔंअनुग्रहेत्र्यायोल्कामुख्यै० ऐंह्रींअंअक्रूरेत्र्यायश्री मुख्येनमः ऐंह्रींअंः महासेनेत्र्यायविद्यामुख्यै २ कंक्रोधीत्र्यायमहाकाल्यै० २ खंचंडी त्र्यायसरस्वत्यै० २ गंपंवींतकेत्र्यायसर्वसिद्धिगौर्यै० २ घांडिंयात्तमत्र्यायत्रैलोक्यविद्यायै

:२ ईं एकरुद्रेशायमंत्रशक्तये:०२ संअजेशायद्राविण्ये०२ अंसर्वेशायनागर्यै०२
टंसोमेशायरक्षेवर्यै०२ ढंलांगलीमंजर्यै०२ उंदारुकेशायरुपिण्ये०२ टंअर्धनारीश्वरा
यविरिण्ये०२ णंउमाकांतीयेशायकाकोदर्यै०२ तेअषाढीशायपूतनायै०२ थंदंडीशा
मद्रकाल्यै०२ दंअत्रीशाययोगिन्यै०२ धंमीनेशायशोखिन्यै०२ नंमेषेशायगर्जिन्यै०
२ पंलोहितेशायकालरात्र्यै०२ फंशिखीशायकुर्दिन्यै०२ बंगछले३शायकपर्दिन्यै०
२ भंद्विडीशायवज्रायै०२ मंमहाकालेशायजयायै०२ यंलुगात्मनेबलीशायवीरुप्यै०
सुमुख्यै०२ रंअस्यगात्मनेपिंगलेशायवायवेश्वर्यै०२ लंमासात्मनेशायसुमुख्यै०
२ वंमेदात्मनेखड्गीशायवारुण्यै०२ शंअस्थ्यात्मनेबकेशायवायव्यै०२ षंमज्जात्मनेश्वे
तेशायरक्षोवधारिण्यै०२ संशुक्रात्मनेसृग्वीशार्यैंद्राण्यै०२ ऐंह्रीं क्षंपरमात्मनेसं
वर्तकेशायमहामायायैनमः२ इतिविन्यस्य अत्ररुद्रात्मतारक्षाधृतशूलकपालकाः।
शक्तयोरुद्रपीठस्थाःसिंदुरारुणविग्रहाः रक्तोत्पलकपालाढ्यांमलंरुद्रवपुर्भुजाः इति
श्रीकंठमातृकान्यासः अथप्रपंचयागमातृकान्यासः प्रपंचसारे अथानयाप्रपंचविधेर्
मिश्रयाप्रपंचयागस्यविधिः प्रवक्ष्यते कृतेनुयस्मिन्निहसाधकोनमाः प्रयातिनिर्वाण
५८सरुनायेनमः२ हंप्रणात्मनेनकुलीशायमहालक्ष्म्यै०२ लंभीमीवात्मनेशीवेशाय ५५

पदंतदव्ययं नत्रमहागणपतिबीजगणपतिगणपतिऋत्रागणपतिमालामंत्रश्रुत्यमात्र
कापलनत्स्मरणपूर्वंकंत्रयागंकुर्यात् मंत्रअस्यश्रीमहागणपतिमंत्रस्यगणकायऋषयेनमः
शिरसि निरुहागायत्रीछंदसेनमः मुखे श्रीमहागणपतिदेवतायैनमःहृदि प्रपंचयाग
त्वेनजपेविनियोगः ॐगांहृदयायनमः श्रींगींशिरसेस्वाहा ह्रींगूंशिखायैवषट् क्लीं
गैंकवचायहुं क्लौंगौंनेत्रत्रयायवौषट् गंगःअस्त्रायफट् ध्यानं हस्तींद्राननमिंदुवृ
उनरुणछायांत्रिनत्रंसदाबाभ्रिंप्रिययासपद्मकरयास्वांकस्थयासंततं श्री
जापूरगदाधनुस्त्रिशिरविधुकत्रकाञ्चपाशोत्पलश्रीहयग्रस्वविषाणरत्नकलशान्
हस्तैवहंतीमजे १ गंउपालिगनेत्रहानपूरलसमानसान् द्विरेफानुकर्णतालो
प्याबारयंतमुहुर्मुहुः दक्षोर्ध्वकरमारभ्यवामपःकरपर्यंतमायुधध्यानं। रत्नकल
शंभुंडाग्रे त्रिशिखंत्रिशूलं इतिमहागणपतिंध्यात्वा ॐश्रींह्रींक्लींग्लौंगंगणप
तयेवरवरसर्वजनंमेवशमानायस्वाहा इतिमंत्रमष्टधाजपित्वा अस्यश्रीबीजग
णपतिमंत्रस्य गणकायंऋषियेनमः शिरसि निरुहछंदसेनममुखे विघ्नेश्वरोदे
वतायेनमः हृदि प्रपंचयागत्वेनजपेविनियोगः गांहृद० गींशि० गूंशिखा० गैंक०

गौंने० गः अ० ध्यानं सींदूरापंत्रिनेत्रंपृथुतरजठरंहस्तपद्मैर्दधानं दंतंपाशांकुशौ
ष्टानुरुकरविलस द्वीजपूराभिरामं बालेंदुद्योतमौलिं करिपतिवदनं दानपूराईगंडं
भोगीशवक्षभूषंभजतगणपतिरक्तवस्त्रांगरागं इतिध्यात्वा चतुश्चत्वारिंशद्वारं गद्य
तिगणपतिबीजंजपेत् वामाधःकरमारभ्यदक्षाधःकरपर्यंतमायुधध्यानं दुष्टोवरः कू
करःशुंडादंडः ततोऽंगणानांत्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्तमंज्येष्ठराजं
ब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदसादनं इतिमंत्रेणमेकवींरंजपेत् ततोऽं
हींक्रोंगंनमः सर्वविघ्नाधिपायसर्वार्थसिद्धिदायसर्वदुःखप्रशमनायएहिएहिभगव
न्सर्वान्रक्षोद्वयस्तंभयहींगंगंग्लौंनमः स्वाहा क्रोंहींइतिगणपतिमालामंत्रंवतुरारभि
जपेत् ततःपूर्वोक्तांशुभ्रमातृकांकृत्वादिषडंगध्यानपूर्वकांयथास्थानेन्यसेत् ततःप्रणं
वयागंन्यसेत् तद्यथा अस्यश्रीप्रणवयागन्यासमंत्रस्य ब्रह्मऋषयेनमः शिरसि गायत्रीछंदसेनमः मुखे सकलपरार्थानुगतपरिपूर्णस्वप्रकाशसच्चिदानं
दपरंज्योतिःपरमात्मादेवतायैनमः हृदि श्रीविद्यांगत्वेनप्रणवयागमातृकान्यासवि
नियोगः इतिकृतांजलिर्वदेत् २ॐहींअंकंपंओंस्वाहाहृदयायनमः २ॐहींइं

DR. BHAU DAJI MEMORIAL

वंपर्ईसोहंशिरसेस्वाहा २ॐहींउंदंऊंहंसःशिखायैवषट् ॐहींएंलंऐंहींकवचायहुं
२ॐहींओंपं५ओंॐनेत्रत्रयायवौषट् २हींअंयं१०अःॐहींहंसःसोहंस्वाहाअ
स्त्रायफट् २ इतिषडंगविधाध्यायेत् नारदिपेवमुनिभिःपरिसीयमानंमानैरगम्यमनि
र्वाजगदेकमूलं सच्चित्समस्तगमनेश्वरमच्युतंनंतेजःपरंभजतसांद्ररूपंबुराभिं
इतिसकलप्रपंचातिरिक्तःसर्वसाक्षीनिरवित्रायानंदविद्विलासाविर्भूतःपरिपू
र्णसच्चिदानंदोहमितिस्वात्मानंध्यात्वाश्रीपरदेवतापरमात्मनिवक्ष्यमाणंतत्स्थानयुक्त
न्जुहोमितिधियास्वस्मिन्वर्णान्जुहुयात् प्रथमंसंहारक्रमेणसविंदुकान्विन्य
स्यपश्चात्सृष्टिक्रमेणसविसर्गान्विन्यसेत् तद्यथा २ॐहींसंनमःहंसःसोहंस्वा
हाव्यापकत्वेनहृदयादिमुखांतं २ॐहींलंनमःहंसःसोहंस्वाहाव्यापकत्वेनहृद
यादिजठरांतं २ॐहींक्षींहंनमःहंसःसोहंस्वाहाव्यापकत्वेनहृदयादिनाभिपादाग्रपर्यंतं
२ॐहींसंनमःहंसःसोहंस्वाहाव्यापकत्वेनहृदयादिदक्षपादाग्रपर्यंतं इत्यादि २ॐहींअं
नमःहंसःसोहंस्वाहा इत्यंतंसंहारक्रमेणततस्थानेषुन्यसेत् पुनः२ॐहींअंनमःहंस
सोहंस्वाहाशिरसि २ॐहींआंनमःहंसःसोहंस्वाहामुखवृत्ते २ॐइंनमःहंसःसोहं

स्वाहादृङ्नेत्रे २ ॐ ह्रीं हृदयं नमः हंसः सोहं स्वाहा वामनेत्रे इत्यादि २ ॐ ह्रीं क्षः नमः हंसः
सोहं स्वाहा इत्यं तंसृष्टिक्रमेणात्मतत्स्थानेषु न्यसेत् इष्टं विन्यस्य आत्मा षोडशाक्षरमंत्रयथा
न्निजपेत् एवंवर्णमयं होममूलादिव्यतनुर्भवेत् प्रजपत्सकलान्मंत्रान्ततः सिद्धिमवा
प्नुयात् प्रपंचयागस्यविधेर्विधाताभवेत्समंत्रीकृतकृत्यएव सर्वेस्फुरंतः प्रभवंतिमंत्राः स
दात्मध्यानीतिनिगद्यतेसः एतस्यहोमस्यनकोऽपिभागेनतुल्यंमत्र्यंधनमग्निहोत्रं
एवंविधानेखलुयत्नतश्चरीरयातेपिभवेद्विमुक्तः तथाचप्रपंचसारः प्रपंचयागस्तुवि
द्येषतोवियत्प्रपंचसंसारविशेषपावकः परंवनित्यंभजतामयत्नतः परस्यधाम्नस्य
निवेदकःसदा इतिप्रपंचयागफल इतिप्रपंचयागमातृकान्यासः न्यस्यमंत्रीयथान्या
यंदेहेविश्वस्यमातरं जपेन्मंत्रान्यजेद्देवान् हुनेदग्निमभेदधीः देवोभूत्वा यजेद्दे
वान्नादेवोदेवमर्चयेत् एवमाहुःश्रुतिःसाक्षादतोग्रेविन्यसेद्बुधः इतिसर्वमातृका
न्यासः समाप्तः श्रीरस्तु अथषट्त्रिंशत्तत्वन्यासः तथाचोक्तं दुर्वासामुनिं
द्रैः तत्वैः षट्त्रिंशद्भिधरायैरिति ततोविशेषकत्वोक्त न्यासान्कृत्वा समावरेदि
दिति तत्रेतिसमस्तमातृकान्यासानंतरमित्यर्थः तद्यथा २ क्षंक्षंपृथिवीतत्वात्म

नेनमःपादयोः २ लंअपूतत्वात्मनेनमः हृदि २ हंतेजस्तत्वात्मनेनमहृदि २
संवायुतत्वात्मनेनमःमुखे २ षंआकाशतत्वात्मनेनमःशिरसि २ शंगंधतत्वात्मने
नमःपादयोः २ षंरसतत्वात्मनेनमलिंगे २ लंरूपतत्वात्मनेनमःहृदि २ संस्पर्शतत्व
त्मनेनमः मुखे २ यंशब्दतत्वात्मनेनमःशिरसि २ मंउपस्थतत्वात्मनेनमःलिंगे २ क्षं
पायुतत्वात्मनेनमःगुदे २ वंपादतत्वात्मनेनमःनासिकयोः २ लंपाणितत्वात्मनेन
मः ४ फंपायुतत्वात्मनेनमःपाण्योः २ पंवाकतत्वात्मनेनमःमुखे २ नंघ्राणतत्वात्मनेनमः ४
जिह्वायां २ दंचक्षुस्तत्वात्मनेनमःचक्षुषोः थंत्वक्तत्वात्मनेनमःसर्वांगे २ तंश्रोत्रतत्वात्म
नेनमःकर्णयोः णंमनस्तत्वात्मनेनमः हृदि २ दंबुद्धितत्वात्मनेनमः हृदि २ डंअहंको
रतत्वात्मनेनमःहृदि २ ठंप्रकृतितत्वात्मनेनमः सर्वांगे २ टंपुरुषतत्वात्मनेनमः सर्वगा
त्रे २ ञंनियतितत्वात्मनेनमः सर्वगात्रे २ ङंकालतत्वात्मनेनमः सर्वगात्रे २ ञंरागा
त्मतत्वात्मनेनमः हृदि २ लंविद्यातत्वात्मनेनमःहृदि २ चंकालतत्वात्मनेनमः हृदि २
टुंमायातत्वात्मनेनमःहृदि २ घंशुद्धविद्यातत्वात्मनेनमःहृदि २ गंईश्वरतत्वा
त्मनेनमःहृदि २ खंसदाशिवतत्वात्मनेनमःग्रीवायां २ कंशक्तितत्वात्मनेनमः मू

लाधारे २ अंत्रिशक्तये नमः शिरसि २ ततो अंकंरवेंगंरत्यादि स्वमित्यंतं शिवादि
शिखांतानि तत्तत्स्थानेषु ध्यात्वा शिरःपादपर्यंतं व्यापकं कुर्यात् इति षट्त्रिंशत्तत्त्वन्यासः स
च्छिदानंदनाथेन उन्मन्यानंदसेविना चिन्मुद्ध्यर्थमाख्यातस्त्रिपुरापूजनक्रमः इति श्रीत्रि
पुरापूजनक्रमे द्वारपूजनादितत्त्वन्यासो नाम द्वितीयपरिच्छेदः अथ मंत्रन्यासमाह
तथा वोक्तं शारदायां संहारसृष्टिमार्गेण मातृकान्यसनं विग्रहः मंत्रन्यासेन ततः कुर्यात्
देयात्मावसिध्यर्थे ततस्तितत्त्वन्यासानंतरमित्यर्थः उपास्यमंत्रस्य मंत्रसंबंधिन्या
सः तदुक्तं वैनायनसंहितायां ततउपास्यमंत्रस्य न्यासान् ऋष्यादिकान् न्यसेत्॥
यस्यमंत्रस्य येन्यासाः कर्तव्याः सिद्धिमिच्छता जपतर्पणहोमार्चासिध्यमंत्रकृताअपि
अंगरन्यासादिभिर्हीनाः नरास्यैर्न्यतिफलान्यपि न्यासान्यक्षोपन्यसतः स्वदेहेत्रैलो
क्यमेतदत्रामेतिपुंसः पापानिसंघः प्रशमंप्रयातिन्यस्यंतिरक्षोसिसपन्नगानि अथो
गकरन्यासस्तत्तोमुद्राःप्रदर्शयेत् इतिक्रमः पुनरस्यांविद्यायांत्रिविधा षोढाश्रीच
क्रकरशुध्यादिभेदात् तत्रषोढादिधः पूर्वोत्तरभेदात् तत्रपूर्वषोढान्यासः सर्वमंत्रो
पयोगः उत्तरषोढान्यासोऊर्ध्वाम्नायविषयः उत्तरषोढा महाषोढाश्रीचक्रन्यास

स्त्रिविधः संहारसृष्टिस्थितिभेदात् करशुद्ध्यिन्यासस्तुबहुविधः पंचाशत्त्रिपुराकाम
रतिन्यासादीनामपितत्रैवोत्तमीषात् अथषोढान्यासश्रीचक्रन्यासोमूलविद्यान्यासः क
रशुद्ध्यादिन्यासश्चेतिचतुर्विधः तदुक्तंयोगिनीहृदये एवंचतुर्विधोन्यासः कर्तव्योवीर
वंदिते षोढान्यासोणिमाद्यश्चमूलविद्यादिकःप्रिये करशुद्ध्यादिकश्चैवसाधकेनाशुसि
द्धये प्रातःकालेथवापूजासमयेहोमकर्मणि जपकालेथवानेषांविनियोगःपृथक्पृथक्
पूजाकालेसमस्तंवा कृत्वासाधकसत्तमः इति तत्रादौपूर्वषोढान्यासोयोगिनीहृदये
न्यासान्निवर्तयेद्देवीपूर्वषोढापुरःसरं गणेशग्रहनक्षत्रयोगिनीराशिपीठके षोढान्या
सस्त्वयंप्रोक्तः सर्वत्रैवपरिज्ञातः तथाचोक्तानार्णवे षोढान्यासंततःकुर्यात्ययेनक्षत्रतां
रूपकः विराट्स्वरूपांवर्णार्णोत्तांशिवःसाक्षान्नसंशयः अथपूर्वषोढान्यासः अस्य
श्रीपूर्वषोढान्यासस्यदक्षिणामूर्तिऋषयेनमः हींश्रींईंचंफ्रेंक्रींशिरसेस्वाहा हींश्रीं
उंटंकंसोः शिखायैवषट् हींश्रींएंतंपंतेंसोः कवचायहुं हींआंओंपं फ्रेंक्रींनेत्रत्र
यायवौषट् हींश्रींअंयं ५० अः ऐंअस्त्रायफट् ध्यानं उद्यत्सूर्यसहस्राभांपीनोन्नत
पयोधरां रक्तमाल्यांबालेंदुरक्तभूषाविभूषितां पाशांकुशाधनुर्बाणभास्वत्त्राणिच
तुष्टयं रक्तनेत्रत्रयीवर्णमुकोद्दाडसिचंद्रिकां गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीं

देवीपीठमर्चयेद्ध्यात्वामालकांसुंदरीपरां इतिश्रीचंडिकोत्तमदृष्टिरूपेणपरमानंदघनांध्यात्वागणेशादिरूपंध्यायन्न्यसेत् वामाद्यूर्ध्वकरयोराद्यौतदाद्यधस्तयोरन्येरन्यायुधध्यानं अथगणेशन्यासः अस्यश्रीगणेशबीजमंत्रस्यगणकऋषिःनिचृद्गायत्रीछंदःविघ्नराजो देवतासर्वविघ्नोपशांतयेन्यासेविनियोगः ध्यानं तरुणादित्यसंकाशान्गजवक्त्रान्त्रिलोचनान् पाशांकुशवरामीतिहस्तांकुरासमन्वितान् नासत्सौदूररक्ताभाःसर्वालंकाररूषिताः एकहस्तधृतोत्पलाःसितरात्लिंगितःप्रियाः वामोर्ध्वकरमारभ्यवामाधःकरपर्यंतमायुधध्यानं शक्तीनांवामकरेकमलंदक्षकरेणप्रियालिंगनमितिध्यात्वान्यसेत् यथा नारद्यंसर्वत्र २गं अंविघ्नेश्वरायश्रियेनमः २गं त्रविघ्नराजायह्रिये० २गं इंविनायकायतुष्ट्येन० २गं ईंत्रिशोत्तमायशांत्ये० २गं उंविघ्नकर्त्रेपुष्ट्ये०२गं ऊंविघ्नहर्त्रेसरस्वत्ये०२गं ऋंविघ्नराजेरत्यै०२गं ॠंगणनायकायमेधायै०२गं ऌंएकदंतायकांत्यै०२गं ॡंकंगणनाथायकामरूपिण्यै०२गं ऌंदिदंतायकामिन्यै०२गं एंगजवक्त्रायमोहिन्यै०२गं ऐंनिरंजनायतंद्रायै०२गं ओंकर्णिनेनीद्रायै०२गं औंदीर्घवक्त्रायजालिन्यै०२गं अंशंकुकर्णायनंदनायै०२गं अःवृषध्वजायसुरक्तायै०२गं कंगणनाथायकामरूपिण्यै०२गं खंगजेंद्रायउग्रायै०२गं गंशूर्पकर्णायजयिन्यै०२

गं घंत्रिनेत्रायसत्यायै०२गं ङंलंबोदरायविघ्नेश्यै०२गं चंमहानादायसुरूपिण्यै०२गं छंचतुर्मूर्तयेकामदायै०२गं जंसदाशिवायमदविह्वलायै०२गं झंअमोदायविकटायै०२गं ञंदुर्मुखायधूम्रायै०२गं टंसुमुखायभूत्यै०२गं ठंप्रमोदायभूम्यै०२गं डंएकपादायपसत्यै०२गं ढंद्विजिह्वायरमायै०२गं णंभूतायमानुष्यै०२गं तंवीरायमकरध्वजायै०२गं थंपण्मुखायधिकर्णायै०२गं दंवरदायशुक्लायै०२गं धंवामदेवायलज्जायै०२गं नंवक्रतुंडायदीर्घघोणायै०२गं पंद्विरदायधनुर्धरायै०२गं फंसेनान्येयामिन्यै०२गं बंग्रामिण्येरात्र्यै०२गं भंमालायवंदिकायै०२गं मंविघ्नायरात्रिप्रभायै०२गं यंमत्तवाहनायलोलायै०२गं रंजटिनेचंचलाक्ष्यै०२गं लंमुंडिनेक्रूध्यै०२गं वंखड्गिनेदुर्भगायै०२गं शंवरेण्यायसुभगायै०२गं षंकेतवेशिवायै०२गं संपाशपाणयेदुर्गायै०२गं हंमेघनादायकालिकायै०२गं ळंगणपायकालजिह्वायै०२गं क्षंगणेशायविघ्नहरिण्यै०२

इतिगणेशन्यासः अथग्रहन्यासः ध्यानं रक्तंश्वेतंतथारक्तंरक्तामंपीतंतथापांडुरं धूम्रंरक्तंतथाधूम्रंधूम्रंधूम्रंविचिंतयेत् रविमुख्यान्कामरूपान्सर्वाभरणभूषितान् वामोरुन्यस्तहस्ताब्जसहस्रेवरप्रदान् शक्तियोषितथाध्येयाःवराभयसमन्वितान् इतिध्यात्वान्यसेत् यथा २अं १५सूर्यायरेणुकांबायेनमः हृदयाधोभागे २यं १६लं

वंद्रायत्र्यमृतांबायेo २ पत्रयोर्मध्ये २ कं ५ मंगलायधर्मांबायेo २ नेत्रयोः २ वं ५ बुधाय
ज्ञानरूपांबायेo हृदयोपरि २ रं ५ बृहस्पतयेत्रात्रिन्यंबायेo कंठे २ लं ५ शुक्रायशांकर्यंबा
येo हृदयमध्ये २ षं ५ शनैश्चरायशान्त्यंबायेo नाभौ २ क्षं ५ राहवेकृष्णांबायेo मुखे २
लं ५ केतवेधूम्रांबायेनमः पादयोः इतिग्रहन्यासः अथनक्षत्रन्यासः ध्यानं ज्वलत्काला
ग्निसंकाशावरदाभयपाणयः नतिपाण्यश्विनीमुख्यासर्वाभरणभूषिताः इतिध्यात्वा
न्यसेत् २ अंअांअश्विन्येनमः ललाटे २ इंईभरण्येनमः दक्षनेत्रे २ उंऊंकृत्तिकायेo वा
मनेत्रे २ ऋंॠंरृंॠंरोहिण्येo दक्षकर्णे २ एंमृगशीर्षयेo वामकर्णे २ ऐंआर्द्रायेo दक्षना
सायां २ ओंऔंपुनर्वसवेo वामनासायां २ कंपुष्येo कंठे २ खंगंआश्लेषायेo दक्षस्कंधे
२ घंङंमघायेo वामस्कंधे २ चंपूर्वाफाल्गुन्यैo दक्षकूर्परे २ छंजंउत्तराफाल्गुन्यैo वाम
कूर्परे २ झंञंहस्तायेo दक्षमणिबंधे २ टंठंचित्रायेo वाममणिबंधे २ डंढंस्वात्यैo दक्षतले
ढंणंविशाखायेo वामतले २ तंथंदंअनुराधायेo नाभौ २ धंनंज्येष्ठायेo दक्षकट्यां २
पंफंमूलायेo वामकट्यां २ बंपूर्वाषाढायेo दक्षोरौ २ भंउत्तराषाढायेo वामोरौ २
मंश्रवणायेo दक्षजानुनी २ यंरंधनिष्ठायेo वामजानुनि २ लंवंशतभिषायेo दक्षजं
घायां २ शंषंसंहंपूर्वाभाद्रपदायेo वामजंघायां २ षंसंहंउत्तराभाद्रपदायेo दक्षपादे २

लंक्षंत्र्योंअः रेवत्यैo वामपादे इतिनक्षत्रन्यासः अथयोगिनीन्यासः तत्रविभुद्योषोउ
ग्रारक्तकमलकर्णिकायांत्वत्कुलानुदेवतांउग्रतुंडीध्यायेत् यथा रक्तोरक्तोत्रिनेत्रांपशु
जनभयदशूलखड्गहस्तांवामेसेवंदधानांवषकमपिसुरांपूरितंचैकवक्त्रां असुग्रासुख
दंष्ट्राअरिकुलदमनींपायसान्नेप्रसक्तांकंठस्थानेमनोधैः परिचिन्तयेपूर्वादिभावयेत्उडाकिणीनां
दक्षोर्ध्वाधः भूलखड्गायेवामोर्ध्वाधः खेटवषकेइतिध्यात्वान्यसेत् ऊंडींडूंडैंऊंडः डुम
लंवरयूंडाकिनीमांरक्षरक्षममत्वकुलंरक्षरक्षसर्वसत्ववंकरिदेविओंगछआग
छइमांपूजांगृहणहूंघोरेदेविहींसःपरमघोरेहुंघोररूपेपरिपरिहनमश्रांमुंउड
लंकसहेंश्रीमत्त्रिपुरसुंदरिदेविवरदेविश्वे ॐ रं५ विभुद्यपीठस्थेविभुद्यडाकिनी
विभुद्यनाथदेवश्रीपादुकांपूजयामिनमः इतिकर्णिकायांविन्यस्यनदयादिपरिवृत्त
दावरणासरश्चिन्यसेत् यथा अंअंमत्तायेनमः २ भांआकर्षिण्यै० २ इंईद्राण्यै० २
ईंईशान्यै० २ उंउमायै० २ ऊंऊर्ध्वकेश्यै० २ ऋंॠधिरायै० २ ॠंॠषायै० २ लृंलृकारा
यै० २ लॄंलॄषायै० २ एंएकपादायै० २ ऐंऐश्वर्यात्मिकायै० २ ओंओकारात्मिकायै० २
औंओषधात्मिकायै० २ अंअंबिकायै० २ अःअक्षरात्मिकायै० २ इतिप्रादक्षिण्येन

न्यसेत् एताः राकिनीवध्ययाः ततोऽनाहतेद्वादशदलकमलेरक्तधातुदेवतां
राकिणीसावरणांध्यायेत् यथा श्यामांभूलाज्जेरुहस्तांडमरुकसहितांतीक्ष्णदंष्ट्रांवह
न्तीद्वास्यांरक्तत्रिनेत्रांस्फुटविलसद्दृष्टिदंतप्रभाभिः दिव्यास्यांदेवदेवींहृदयकम
लगांरक्तधात्वेकनाथां शुद्धास्त्रेषुप्रसक्तांमधुमदमुदितांवीक्षयेद्राकिणीतां दक्षाध
करमारभ्यदक्षोर्ध्वकरपर्यंतंआयुधध्याने इतिध्यात्वेतन्मंत्रकर्णिकायांन्यसेत् ॥
रांरींरूंरैंरौंरः रमलवरयूंराकिनीमारक्षरक्षमममरक्तधातुंरक्षरक्षसर्वसत्ववशंकरी
देवीआगच्छ२इमांपूजांगृह्ण२ऐंघोरेदेविह्रींपरमघोरहुंघोररूपे२ह्रींरंहानम
श्रीमुंडोरलकसहेश्रीमहात्रिपुरसुंदरादेवीवरदेविद्वेकं१२अनाहतपीठस्थेअना
हतराकिनीअनाहतनाथश्रीपा० इतिकर्णिकायांविन्यस्यदलेषुतत्तदावरणा
न्राकिनीन्यसेत् २कंकालराज्ञेनमः२खंख्यातीनाथे०२गांगायत्र्यै०२घंघंटधारि
ण्ये०२ङुंङुनेणीत्रिकायै०२चंवामुंडायै०२छंछत्रायै०२जंजयायै०२झंझंकारिण्यै०२
ञंअर्णात्रिकायै०२टंवटुकहस्तायै०२ठंठंकारिण्यै०२इतिद्वादशदलेषुविन्यस्य
ताःराकिनिवध्येयाः ततोमणिपूरकेदशदलकमलेमांसधातुदेवतांलाकिनींसावर
णांध्यात्वान्यसेत् यथा रक्तांदेवींत्रिवक्त्रांत्रिनयनलसितांदंष्ट्रिणीसुप्तरूपांवज्रंश

MEMORIAL

क्लिंवदंडाभयभयरददरानूदक्षयोमेदधानं ध्यात्वानाभिस्थपद्मेदशदलविलसत्क
र्णिकेलाकिनींतांमांसस्थांगोडभक्तोत्सुकंहृदयवर्तीविन्यसेत्साधकेंद्रः दक्षाधुर्ध्वपो
राद्येतदाद्यघस्रष्योरन्येतदाद्यघस्रष्योरपरेरित्यायुधध्याने इध्यात्वान्यसेत् लांलींलूं
लैंलोंलः लमलवरयूंलाकिनीमांरक्षरक्षममांसधातुंरक्षरक्षसर्वसत्ववशंकरीदेवीआ
गच्छ२इमांपूजांगृह्ण२ऐंघोरेदेवीह्रींरः परमघोरहूंघोररूपेपरि२नमश्रीमुंडोरलक
सहेश्रीमहात्रिपुरसुंदरिदेविवरदेविद्वेडुंम १० मणिपूरकपीठस्थेमणिपूरकलाविनी
मणिपूरकनाथदेवश्रीपा० २इतिकर्णिकायांविन्यस्यपरितस्तदावरणशक्तिन्यसेत्
डुंडामर्यैनमः२टंटंकारिण्यै०२पंपांकारिण्यै०२तंतामस्यै०२धंस्थानदेव्यै०२
दंदाक्षायिण्यै०२धंधात्र्यै०२नंनंदायै०२पंपार्वत्यै०२फंफट्कारिण्यै०२इतिविन्य
सेत् एताःलाकिनीवध्येयाः ततःस्वाधिष्ठानेषट्दलकर्णिकायांमेदोधातुदेवतां
काकिनीसावरणांध्यायेद्यथा स्वाधिष्ठानाख्यपद्मेरसदललसितेबेदवक्त्रांत्रिनेत्रांपीता
भांधारयंतींत्रिशिखगुणकपालाक्षयान्यान्तगर्वां मेदोधातुप्रविष्टामलिमदमुदितांबारिनी
त्यादितांतांध्युत्वेसक्तचित्तामभिमतफलदांकाकिनीभावयेत्ता दक्षोर्ध्वकरमारभ्यदक्षा

पः करपर्यंतमायुधध्यानं इतिध्यात्वान्यसेत् कों कीं कूं कैं कौं कः कमलवरयूं काकिनि मांरक्ष २ ममामेदोधातुंरक्ष २ सर्वसत्ववशंकरिदेवीआगच्छ २ इमांपूजांगृह्ण २ ऐंघो रेदेविहींसः परमघोरहूंघोररूपेएहि २ नमश्चामुंडेउरलकसहेंश्रीमहात्रिपुरसुं दरिदेविवरदेविज्ञेबंध ४ स्त्राधिष्ठानपीठस्थेस्त्राधिष्ठानकाकिनिस्त्राधिष्ठानाथ देवश्रीपादु० इतिकर्णिकायांविन्यस्यपरितस्तद्दलेषुपरिवारदेवताः न्यसेत् २ बंबंन्य सेत् २ खंभद्रकाल्यै० २ मंमायायै० २ यंयशश्विन्यै० २ रंरमायै० २ लंलंबोदर्यै० २ इतिविन्यस्यताः काकिनीवश्येयाः ततोमूलाधारेचतुर्दलकमलकर्णिकायांअस्थि धातुदेवतांसाकिनीध्यायेत् यथा देवींज्योतिःस्वरूपांत्रिनयनविलसत्खेचरीक्रोसु दंष्ट्राहस्तोभोजेक्षुकापंसरणिमपिदधतींपुस्तकंधानमुद्रां मूलाधारस्थपद्मेनिरिवल पद्मुजनोन्मादिनीमस्थिसंस्थांमुद्राभ्रप्रतियुक्तांमधुमदमुदितांचिंतयेत्साकिनींतां वामाद्यूर्ध्वयोराद्येनदाद्यधस्त्र्योरन्ये इत्यायुधध्यानं अत्रइक्षुकापग्रहणात्तत्रैव पुष्पबाणानध्यायेत् धनुर्बाणयोरत्रैवसाहचर्यात् इतिध्यात्वाकर्णिकायां न्यसेत् सांसींसूंसैंसौं सः समलवरयूं साकिनिमांरक्ष २ ममास्थिधातुंरक्ष २

सर्वसत्ववशंकरिदेविआगच्छ २ इमांपूजांगृह्ण २ ऐंघोरेदेविहींसः परमघोरहूंघोररूपेए हि २ नमश्चामुंडेउरलकसहेंश्रीमहात्रिपुरसुंदरिदेविवरदेविज्ञेवं ४ मूलाधारपीठस्थेमू लाधारसाकिनीमूलाधारनाथदेवश्रीपा० इतिकर्णिकायांविन्यस्यतद्दलेषुपरिवा इतिविपरिवारदेवताः न्यसेत् २ वंवराह्यै० २ रांशक्तिन्यै० २ षं षंढायै० २ संसरस्वत्यै० इतिविन्यस्यताः सकिनिवश्येयाः नाभ्यूर्ध्वभूमध्येआज्ञाचक्रेमज्जाधातुदेवतांहाकिनींध्या येत् भ्रूमध्येबिंदुपद्मेद्विदलसुललितेशुक्लवर्णांवरज्ञेवर्विभ्राणांधानमुद्रांउमरुक रुहिनामक्षमालाकपालं षड्वक्त्रांमज्जसंस्थांत्रिनयनलसितांहंसवत्यादियुक्तां।हा रिद्राभिप्रसक्तांसकलसुरनुतांहाकिनींध्यायेत्तां दक्षाद्यूर्ध्वयोराद्येनदाद्यधस्त्र्योर न्ये इत्यायुधध्यानं इतिध्यात्वान्यसेत् हौंहौंहूंहैंहौंहः हमलवरयूंहाकिनिमांरक्ष २ म ममम्जाधातुंरक्ष २ सर्वसत्ववशंकरिदेविआगच्छ २ इमांपूजांगृह्ण २ ऐंघोरेदेविहीं सः परमघोरहूंघोररूपेएहि २ नमश्चामुंडेउरकसहेंश्रीमहात्रिपुरसुंदरिदेविवरदे विज्ञेहं ४ संआज्ञापीठस्थेआज्ञाआंहाकिनिचाज्ञानाथदेवश्रीपा० इतिविन्यस्यतद्द लेषु २ हंहंसवश्येनमः २ क्षंक्षमावश्येनमः २ इतिविन्यस्यहाकिनिवश्येयाः ततोब्र

ब्रह्मरंध्रेसहस्रदलकमलकर्णिकायांशुक्रधातुदेवतांयाकिनीध्यायेत् मुंउड्डीयस्थ
ब्रह्मेसकलदलपुतेयाकिनीभैरवीनाथसिद्ध्यांद्यौसमस्तायुधलसितकरांसर्ववर्णीसमष्टि
उदितीसर्ववक्त्रांसकलसुखकरींसर्वधातुस्वरूपांसर्वज्ञेसकलविद्योपरशिवरसिकांभा
वयेत्सर्वरूपां इतिध्यात्वा यांयींयूंयैंयौंयः यमलवरयूंयाकिनिमोरक्षरक्षममशुक्रा
दिसर्वधातून्रक्ष२ सर्वसत्त्वान्रक्षकरिदेविआगच्छ२ओंपूजांगृह्ण२ऐंघोरदेविहिंस
परमघोरेहूंघोररूपेएहि२नमश्चामुंडेउरुलकसंहेंश्रीमहात्रिपुरसुंदरिदेविवरदेविछे
अकारादिक्षांतं५१ ब्रह्मरंध्रपीठस्थेब्रह्मरंध्रयाकिनिंब्रह्मरंध्रनाथदेवश्रीपां०२
इतिविन्यस्यपरितःएकपंचाशत्तवर्णदेवतान्पूर्वोक्तान्न्यसेत् २ अंअमृतायै०२
ओंआकर्षिण्यै०२ इंइशान्यै०२ ईंईशान्यै०२ उंउमायै०२ ऊंऊर्ध्वकेश्यै०२ ऋंऋ
ध्यै०२ ॠंॠषायै०२ ऌंऌकारायै०२ ॡंॡषायै०२ एंएकपादायै०२ ऐंऐश्वर्यै०२
ओंओकारिण्यै०२ औंऔषधात्मिकायै०२ अंअंबिकायै०२ अःआक्षतात्मिकायै०
२ कंकालरात्र्यै०२ खंखरवाहिनायै०२ गंगायत्र्यै०२ घंघंटाधारिण्यै०२ ङंङर्णीत्मि
कायै०२ चंचामुंडायै०२ छंछायायै०२ जंजयायै०२ झंझंकारिण्यै०२ ञंञोर्णरूपा
यै०२ टंटंकहस्तायै०२ ठंठंकारिण्यै०२ डंडामर्यै०२ ढंढंकारिण्यै०२ णंणकारिण्यै०२

तंतामस्यै०२ थंस्थानदेव्यै०२ दंदाक्षायण्यै०२ धंधात्र्यै०२ नंनंदायै०२ पंपार्व्यै०२
फंफट्कारिण्यै०२ बंबंधिन्यै०२ भंभद्रकाल्यै०२ मंमहाकाल्यै०२ यंयशस्विन्यै०२
रंरमायै०२ लंलंबाष्यै०२ वंवरदायै०२ शंशशिन्यै०२ षंषंढायै०२ संसरस्वत्यै०२
हंहंसवत्यै०२ क्षंक्षमावत्यै०२ इतिमातायोगिनीन्यासः अथविस्तारःक्रौंशक्तो
संक्षेपतोयोगिनीन्यासंकुर्यात् तद्यथा सितासितारूपाकदुचित्रायांतांश्चविंश
येत् चतुर्भुजासमैर्वक्त्रैःसर्वाभरणभूषिताः इतिविशुद्धादिषट्चक्रेषडयोगिनी
र्ध्यात्वामानसंपूजयित्वायथाक्रमंन्यसेत् २ओंडींडुंडमलवरयूंप्रविन्यै०२ अंआं
१६ममलकधातुंरक्षरक्षत्वगात्मनेनमः इतिविशुद्धौ कंठे २ रांरींरूंरमलवरयूंरा
किन्यैनमः कं१२ममरक्तधातुंरक्ष२ असृगात्मनेनमः हृदि २ लांलींलूंलमलवर
यूंकाकिन्यैनमः उं१० ममांसधातुंरक्ष२ मांसात्मनेनमः नाभौ २ कांकींकूंकम
लवरयूंकाकिन्यैनमः बं ९ ममंमेदोधातुंरक्ष२ मेदस्वरूपायैनमः लिंगमूले २
सांसींसूंसमलवरयूंसाकिन्यैनमः वं८ शंवसंममास्थिधातुंरक्ष२ अस्थिरूपायै०२
मूलाधारे २ हांहींहूंहमलवरयूंहाकिन्यैनमः हं७ ममंमज्जाधातुंरक्ष२ मज्जारूपा

यैनमः पुंमध्ये २ यांयींयूंयमलवरयूं यकिंयेनमः अंआंमित्यादिक्षमिंयंनमः
मशुक्रधातुरक्षः २ शुक्ररूपायेनमः ब्रह्मरंध्रेन्यसेत् इतिलघुयोनिनीन्यासः ॥
अथराशिन्यासः तत्रमूलेनप्राणायामंकृत्वाराशिनांध्यानंकुर्यात् यथा रक्तंश्वेतं
हरिद्वर्णंपांडुचित्रंसितंस्मरेत् पिंगोपिंगलंकटुकर्पूरारुणधूमलांन् इतिमेषादी
नूक्तमेषाध्यात्वान्यसेत् २ अंआंइंईरक्तवर्णायप्राणरूपायमेषायनमः दक्षगुल्फे
२ उंऊंऋंॠंश्वेतवर्णायअपामरूपायऋषभायनमः दक्षजानुनी २ लृंॡंहरिद्वर्णी
यउदानरूपायमिथुनायनमः दक्षऋषणे २ एंऐंपांडुरवर्णायध्यानरूपायकर्कटा
नमः दक्षकुक्षौ २ ओंऔंचित्रवर्णायसमानरूपायसिंहायनमः दक्षस्कंधे २ अं
अः शंषंहंसंसितवर्णायनागवायूरूपायकन्यारात्रायेनमः दक्षशिरोभागे २ कं ५
पिंगलवर्णायकूर्मवायुरूपायतुलारात्रायेनमः वामशिरोभागे २ खं ५ पिंगलवर्णाय
देवदत्तवायुरूपायवृश्चिकायनमः वामस्कंधे २ टं ५ कटुवर्णायदेवदत्तवायुरूपाय
धनुराशयेनमः वामकुक्षौ २ तं ५ कर्पूरवर्णायधनंजयवायुरूपायमकरराशयेनमः
वामऋषणे २ पं ५ अरुणवर्णायजीवात्मरूपिणेकुंभायनमः वामजानुनि २ यंरंलंवं

शंषूस्रवर्णायपरमात्मरूपायमीनायनमः वामगुल्फे इतिराशिन्यासः अथपीठन्या
सः तत्रप्राणायामपूर्वंनिजदेहेपंचात्मापीठंनिध्यायेत् सितासितारुणश्यामं
हरित्पीतान्यनुक्रमात् पुनःपुनःक्रमादेवंपंचात्मास्थानसंचये पीठानिसंस्मरेद्दिव्या
न्सर्वकामार्थसिद्धये इतिध्यात्वान्यसेत् २ अंकामरूपपीठायनमः ओंवाराणसी
पीठायनमः २ रंनेपालपीठायनमः २ उंपोंड्रवर्धनपीठायनमः उंपुरस्थिरपीठाय
नमः २ ऊंकाश्मीरपीठायनमः २ ऋंऊंकान्याकुब्जपीठायनमः २ ऋंपूर्णगिरिपीठा
यः २ ॠंअर्बुदपीठायः २ लृंआम्रातकेश्वरीपीठायः २ लृंएकाम्रपीठायः २
एंतिस्रोतःपीठायनमः ऐंकामकोटपीठायः २ ओंकेलासपीठायः २ औंश्रीपर्व
पीठायः २ अंकेदारपीठायः २ अः वंइंपुरपीठायः २ कंश्रीनगरपीठायः २ खंओं
कारपीठायः २ गंजालंधरपीठायः २ घंमालवपीठायः २ ङंकुलांतकपीठायः २
चंदेवीकोटिपीठायनमः २ छंगोकर्णपीठायः २ जंमारुतेश्वरपीः २ झंअट्टहासपीः २
ञंविरजपीः २ टंराजगृहपीः २ ठंमहापक्षपीः २ डंकोलगिरिपीठाः २ ढंएलापुरिपी
ः २ णंकालेश्वरपीठाः २ तंजयंतिकापीः २ थंउज्जयिनीपीः २ दंवारिनपुरपीः २

घंशिरकेपी०२ नंहस्तिनापुरपीठा०२ पंओड्डीशपी०२ फंप्रयागपी०२ बंराष्ट्रीशा
पी०२ भंमायापुरपी०२ मजलेश्वरपी०२ यंमलयगिरिपी०२ रंश्रीशैलपी०२ लंमे
रुपीठाय०२ वंगिरिवरपी०२ शंमहेंद्रपी०२ षंश्रीमन्नपुरपी०२ सेंहिरंण्यपुरपी०२ हं
महालक्ष्मेपुरपीठा०२ लंवओड्डीशपी०२ क्षंछागलांत्रापुरपीठायनमः २ इत्येक
पंचाशत्पीठानिमातृकास्थानेषुन्यसेत् इतिपीठन्यासः एवंयोन्यस्तगात्रस्तुसं
पूज्यःसर्वयोगिभिः नास्त्यस्यपूज्यालोकेषुपितमुद्योजनः सएवपूज्यः सर्वेषांस्व
सत्यंपरमेश्वरः षोढान्यासविद्देनंयंप्रणमेदेवपार्वति सोऽविद्यान्मृत्युमाप्नोति
नरकंचप्रपद्यते इतिलघुषोढान्यासः समाप्तिमगमत् ७ ७ ७ अथश्रीचक्रन्या
सः नचक्रंयोगिनीहृदये एवंषाढापुरस्कृत्याश्रीचक्रंन्यासमाचरेत् श्रीमत्त्रिपुरसुंद
र्याश्चक्रन्यासंशृणुप्रिये यन्नकस्यविदाख्यातंतनुशुद्धिकरंपरं अथसंहाश्रीच
क्रन्यासप्रयोगः तत्रमूलविद्यया प्राणायामत्रयंकृत्वा ऋष्यादिकरषडंगन्यासा
न्विधायपरदेवतात्मानमात्मानंध्यात्वाश्रीचक्ररूपंनिजदेहंध्यायेत् यथा॥
शरीरंविनयेद्देवीनिजंश्रीचक्ररूपिणं गत्वाधाकारनिर्मुक्तंज्वलत्कालाग्निस

राम ४९

प्रभं इतिनिजशरीरंश्रीचक्ररूपंध्यात्वास्वशिरसिद्वादशांतस्थंसहस्रकमलक
र्णिकांतर्गतत्रिकोणोपरिविदाकारेश्रीगुरुंध्यायेत् द्वादशांतेविदाकारेशिवत्र
यात्मकंगुरुं परंज्योतिर्ध्यायेद्योगमोक्षफलाप्तये इतिध्यात्वातच्चरणारवि
न्दमकरंदधाराभिरात्मदेहंपरिप्लुतंमत्वा आनंदमानंदकरंप्रसन्नंज्ञानस्वरूपं
निजभावयुक्तं योगीड्यंसर्वरोगघ्नंश्रीमद्गुरुंनित्यमहंनमामि इतिनत्वा
नदात्मानंमत्वानदनुज्ञयाश्रीचक्रन्यासंन्यसेत् तद्यथा २गंगणेशायनमः २वा
मनाभौ २खंक्षेत्रपालायनमः वामांसे २यांयोगिनीभ्यो० दक्षांसे २बंबटुकाय०
दक्षजानौ २लांक्षंक्षाय० दक्षपादाग्रे २रांआनंदाय० दक्षजानौ २यांयमाय० दक्ष
पार्श्वे २क्षांनिऋतये० दक्षांसे २वांवरुणाय० वामांसे २यांवायवे० वामपार्श्वे २
कुंकुबेराय० वामजानौ २हांईशानाय० वामपादाग्रे २ओंब्रह्मणे० ब्रह्मरंध्रे २
हींअनंताय० मूलाधारे २इतिगणेशादिक्षेत्रपालान्विन्यस्य २त्रैलोक्यमोहने
चक्राय० इतिसर्वांगेव्यापकंविन्यस्य २चतुरस्राधारेवायवे० इत्यनेनापिव्यापकं
कृत्वान्यसेत् २अणिमासिध्यै० दक्षांसदेशे २लघिमासिध्यै० दक्षपाण्यग्रे २

महिमासिध्यै० दक्षस्फिजि २ इत्वासिध्यै० दक्षपादांगुलिषु २ वशित्वसिध्यै० वामपादांगुलिषु २ प्राकाम्यसिध्यै० वामस्फिजि २ मुक्तिसिध्यै० वामपाण्यग्रे २ इच्छासिध्यै० वामांसदृष्टे २ प्राप्तिसिध्यै० चूडाधः २ सर्वकामसिध्यै० दृष्टे २ इति दक्षसिद्धिर्विन्यस्य चतुरस्रमध्येरेखायै० इतिव्यापकंकृत्वान्यसेत् २ आस्यै० पादांगुष्ठद्वये २ माहेश्वर्यै० दक्षपार्श्वे २ कौमार्यै० मूर्धनि २ वैष्णव्यै० वामपार्श्वे २ वाराह्यै० वामजान्वोर्बहिः २ इंद्राण्यै० दक्षजान्वोर्बहिः २ चामुंडायै० दक्षांसाद्बहिः २ महालक्ष्म्यै० वामांसाद्बहिः २ चतुरस्रात्रेरेखायै० इतिव्यापकंकृत्वा २ द्रां सर्वसंक्षोभिणीमुद्रायै० पादांगुष्ठद्वये २ द्रीं सर्वविद्राविणीमुद्रायै० दक्षपार्श्वे २ क्लीं सर्वाकर्षणीमुद्रायै० मूर्धि २ ब्लूं सर्ववशंकरीमुद्रायै० वामपार्श्वे २ सः सर्वोन्मादिनीमुद्रायै० वामजान्वोर्बहिः २ क्रों महांकुशमुद्रायै० दक्षजान्वोर्बहि २ स्त्रैं श्रं सर्वखेचरिमुद्रायै० दक्षांसाद्बहिः २ ह्रौं सर्वबीजमुद्रायै० ववामांसाद्बहि २ ह्सैं ह्स्क्लीं ह्सौं सर्वत्रिपुरवंशमुद्रायै० हृदये २ एं सर्वयोनिमुद्रायै० पादांगुष्ठयोः २ इतिविन्यस्यहृदये २ अं आं सों० त्रिपुरचक्रोधयै० नमः तस्याः दक्षेअणिमासिध्यै० वामेद्रां सर्वसंक्षोभिणीमुद्रायै० ॥

DR. BHAU DAJI MEMORIAL डाक्टर भाऊदाजी स्मारक

इतिविन्यस्य एताः प्रकटयोगिन्यस्त्रैलोक्यमोहनचक्रेसमुद्राः ससिध्यः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः पूजिताः संतुनमः इतिव्यापकंन्यसेत् इतिप्रथमावरणं सर्वाशापरिपूरकचक्रायनमः इतिव्यापकंविन्यस्य २ अकामाकर्षिणिनित्याकलायै० दक्षश्रोत्रदृष्टे २ आंबुध्याकर्षिणीनित्याकलायै० दक्षांसे २ इंअहंकाराकर्षिणीनित्याकलायै० दक्षकूर्परे २ ईंबलाकर्षिणीनित्याकलायै० २ दक्षकरदृष्टे २ उंप्रज्ञाकर्षिणीनित्याकलायै० दक्षोरौ २ ऊंक्षुधाकर्षिणीनित्याकलायै० दक्षजानुनि २ ऋंतृषाकर्षिणीनित्यायै० दक्षगुल्फे २ ॠंगंधाकर्षिणीनि० दक्षपादतले २ ऌंविनाकर्षिणीनि० वामपादतले २ ॡंधैर्याकर्षिणीनि० वामगुल्फे २ एंस्मृत्याकर्षिणीनि० वामजानुनि २ ऐंनामाकर्षिणीनि० वामोरौ २ ओंबीजाकर्षिणीनि० वामकरदृष्टे २ औंआत्माकर्षिणीनि० वामकूर्परे २ अंअमृताकर्षिणीनि० वामांसे २ अः शरीराकर्षिणीनि० वामश्रोत्रदृष्टे २ ऐंक्लीं सौः त्रिपुरत्रिवक्त्रेश्वर्यैनमः हृदये २ तस्याः दक्षे २ लघिमासिध्यै० वामे २ द्रीं द्राविणमुद्रायै० इतिविन्यस्य एताः गुप्तयोगिन्यः सर्वाशापरिपूरकेचक्रसमुद्राःस्मारियापकंकुर्यात् इतिद्वितीयावरणन्यासः

नमः सर्वसंक्षोभणचक्रायनमः इतिव्यापकंविन्यस्य २कं ५अनंगकुसुमेषियायेव० दक्ष
रोरे २वं ५अनंगमेखलायेव० दक्षजत्रणि २टं अनंगमेनेमदनायेव० दक्षोरो २ तं ५अनंगमद
नातुरायेव० दक्षगुल्फे २पं ५अनंगरेखायेव० वामगुल्फे २यं ४अनंगवेगिन्यैव० वामोरो २त्रों
दायवनस्पतिरसोत्पन्नोगंधाढ्योगंधउत्तमः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां इतिदेव्याः ना
साग्रेदर्शनेदर्शनेत्तियंकृत्वात्रयंवालयन्नीत्वाधूपंनिवेदयेत्निवेदनपूर्ववत् ततस्त्रांदेव्याःवाम
भागेस्थापयेत् नतुकंकालिकापुरतोवामतस्तुतथाधूपंमाग्नेयान्नतुदक्षिणेदेव्याः इतिशेषः अ
थदीपपात्रमानीयसुगंधघृतेनापूर्यतत्ररक्तपट्टसूत्रमयींवर्तिंवाकार्पासमयींवाकर्पूर
गर्भितांवर्तिंनिक्षिप्यंहीत्यात्रमालिंत्रेणमइतिमंत्रेणावर्तीप्रज्वाल्यधेनुमुद्रांप्रदर्श्यमहामुद्रयाप
रामृश्य सद्य श्रीम० दीपंपरिकल्पयामिनमः इतिउत्सृज्यपूर्ववत्घंटावादयन्दीपपात्रमादायसु
प्रकाशोमहादीपःसर्वत्रतिमिरापहः सबाह्याभ्यंतरंज्योतिर्दीपोयंप्रतिगृह्यतांइतिदेव्याःवामभागा्ग्रे
रणपर्यंतमानीयपुनर्दक्षभागेमस्तकस्योर्ध्वपर्यंतंनिवेदयेत्दृश्येवंत्रीःप्रदर्शयन्दीपंनि
वेदनपूर्ववत्प्रदद्यात् दीपपात्रंदेव्याःदक्षिणेस्थापयेत् नतुकंकालिकायै दक्षिणेसर्पिषादीपंतिल
तैलेनवामतः अथवैवेद्यंनिवेदयेत् घृतेनवर्तकरादुग्धंअपूपंकदलीफलं क्षीरंगुडंनारिकेलंफ
लंलाजान्तिलादधि पृथुकंचणकंमुद्गंपायसंचनिवेदयेत् प्रतिपदातिथिमारभ्यक्रमात्सेवेद्रास्त्र
पिकामेभ्यदिशक्तीनांसर्वासामपिवोदितं आद्यायाललितायस्तुसर्वान्येतानिसर्वदानि।।

नंत्रराजे शुद्धस्फटिकसंकाशांबरश्मिसमप्रभं शालिसन्दुलंदेविवारशुद्धोदनंप्रिये हिंगु
जीरकमरीचाद्यराढ्यकैरवितःप्रिये वटकःकुंकुमाकारःपायसान्नसमन्वितं दुग्धसंपारसकर्मगंधार्कशर्करापूर्प
रितं कपित्थाष्टसंयुक्तंमूर्जेचक्रमंडकाप्रिये शर्करांफणितादेविसूपंसुद्गोद्भवंतथा नानाविधानिरसयानि
व्यंजनानिबहून्यपि द्यत्याद्यन्नसमोपेतंनैवेद्यंकल्पयेद्बुधः मनःकल्पितरूपंवात्रिपुरायैनिवेदयेत्॥
इत्युक्तंभक्ष्यवर्ज्यंचोष्यलेह्यपेयात्मकंपंचविधमन्नंअन्याधनिवेदितंषड्रसोपेतंस्वर्णादिपात्रेस्थंआनी
यमूलविद्ययाभिरीक्ष्यसौःअस्त्रायफट्इतिप्रोक्ष्यपुनस्तेनैवकुन्त्रात्रयेणताडयित्वाऐंकवचायहुंइति
अष्टधाप्यैवंचतुर्विधसंस्कारंविधाय देव्याःपुरतश्चतुरस्रमंडलंविलिख्यगंधपुष्पाक्षतैरभ्यर्चतत्रा
धारंविन्यस्यतत्रनैवेद्यपात्रंस्थापयेत् ततःसामान्यार्घ्यजलेनमूलेनप्रोक्ष्यवक्ष्यमुद्रांप्रदर्श्ययित्वा
तदुपरिमूलविद्यामष्टधाजपित्वाधेनुमुद्रयामृतीकृत्यमहामुद्रयापरमीकुर्यात् ततोऽर्घ्यजलंचु
लुकेनादाय सश्रीमन्महात्रिपुरसुंदरीपादुकाभ्यांनैवेद्यंपरिकल्पयामिसुधाइतिनैवेद्यजलम
र्पयेत् हेमपात्रगतंदिव्यंपरमान्नंसुसंस्कृत्यैतंपंचधाषड्रसोपेतंगृहाणत्रिपुरेश्वरिइत्युच्चार्यज
लममृतीकृत्य ॐअमृतोपस्तरणमसिस्वाहेतिदेव्याहस्तेजलंदद्यात् ततोवामकरेणविकटो राम
त्पलसन्निभांश्चासमुद्रांप्रदर्श्यदक्षिणेनप्राणादिमुद्राःप्रदर्शयेत् पंचग्रासान्ग्राहयेत् यथा १०१

ऐंप्राणायस्वाहाइत्यंगुष्ठकनिष्ठिकानामिकाभिः क्लींअपानायस्वाहाइत्यंगुष्ठतर्जनीमध्यमाभिः
सौःव्यानायस्वाहाइत्यंगुष्ठनामिकाभिः ऐंक्लींउदानायस्वाहाइत्यंगुष्ठनामिकामध्यमातर्जनीभिः
ऐंक्लींसौःसमानायस्वाहाइत्यंगुष्ठादिदिसर्वाभिःइतिप्राणाहुतीग्राहइत्वात्सकारयेत् ऐंआत्म
तत्वव्यापिकाश्रीमहात्रिपुरसुंदरीतृप्यतु क्लींविद्यातत्वव्यापिश्रीमहात्रिपुरसुंदरितृप्यतु सौः
शिवतत्वव्यापिकाश्रीमहात्रिपुरसुंदरीतृप्यतु ऐंक्लींसौःसर्वतत्वव्यापिकाश्रीमहात्रिपुरसुंदरी
तृप्यतु इतितृप्तरूपोविभाव्यअस्त्रायफट्इतिअस्त्रमंत्रेणादरोवेष्टयेत् ततोवस्त्रायंतर्हित
देवीसुजनाध्यायेत् यथा ब्रह्मरंध्रेसरसमितःसूर्यावेष्टेसमेतासिंजद्धालव्यजननिकरै
र्वीज्यमानासखिभिः वर्मक्रीडाप्रहसनपरापेतिसोकुंकुमद्रवसंतीभुक्तेपात्रेकनकरजतेष्वनुसान्न
विद्धिलास्वा इतिध्यात्वा क्षणंविश्राम्यदेवीसुकृतीविभाव्यधेनुमुद्रयाजलममृतीकृत्य
नमस्तेदेवदेवेशिमहात्रिपुरसिकरंपरं शुद्धंस्फटीकसंकाशंस्वादुग्रहाणजलमुत्तमं इतिजलंसम
र्प्य ॐअमृतापिधानमसिस्वाहेतिदेव्याहस्तेउत्तरापोशानंदत्वाहस्तप्रक्षालनंगंडूषजलंद
त्वापुनराचमनीयंदत्वाहस्तप्रोंछनार्थसूक्ष्मवस्त्रंविधायतस्मैहापनयनापवरणेनकरोद्वर्त

नंकारपिलातादृशीभावयेत् ततोगतसारं नैवेद्यं नेत्रकृत्यादिस्थापयेत् ततःस्थानमध्येपात्रं
प्रोक्ष्यदेव्यैशुद्धावमनंदद्यात् ततःसामान्यार्घ्यजलेननैवेद्यनिवेदनंकुर्यात् ततोदेव्यैतां
बूलंदद्यात् स४ श्रीमहात्रिपुरसुंदरिपादुकाभ्यांताम्बूलंपकल्पयामिनमः इतिअस्त्रेणप्रोक्षि
तंपूगीफलेसकर्पूरंनागवल्लीदलेर्युतं सचूर्णंसखदिरंताम्बूलंप्रतिगृह्यतां इतिताम्बूलंसम
र्प्यनिवेदनंपूर्ववत् ततोमूलश्रीमन्महात्रिपुरसुंदरिपादुकांपूजयामितर्पयामिइतित्रीः
संपूज्यविशेषार्घ्यामृतेनतर्पयेत् ततः सामान्यार्घ्यजलेनअर्घंनंनिवेदयेत् ततः स४
श्रीमन्महात्रिपुरसुंदरिश्रीपादुकाभ्यांसकलसिद्धिंपरिकल्पयामीति द्वादशश्लोक्यास्तुयात् द्वाद
शश्लोकीयथा गणेशग्रहनक्षत्रयोगिनीराशिरूपिणी देवीमंत्रमयीनौमिमातृकांपीठ
रूपिणी १ प्रणमामिमहादेवीमातृकांपरमेश्वरीं कालहल्लोलकल्लोलनादहल्लोलकल्लोलनादराम
कारिणी २ यदक्षरैकमात्रेणसंसिद्धेस्पर्धतेनरः रविताक्ष्यंदुकंदर्पशंकरानलविष्णुभिः ३
यदक्षरराशिज्योत्स्नामंडितंभुवनत्रयं वंदेसर्वेश्वरीदेवीमहाश्रीसिद्धमातृकां ४ यदक्षरमहासूत्र राम
प्रोतमेतज्जगत्त्रयं ब्रह्मोडुदिकलानाथंनमोवंदेसिद्धमातृकां ५ यदेकादशमाधारबीजकोणत्रयोद्भवं २०२
ब्रह्मोडुदिकहीनंजगदाप्यायिदृश्यते ६ अकचादिटतोनह्पयशीक्षरवर्गिणी ज्येष्ठांगबाहु

दृष्टकटिपादनिवासिंनी ७ नामीकाक्षरोद्धारांसाराक्षरांपराक्षरां प्रणमामिमहादेवींपर
मानंदरूपिणीं ८ अद्यापियस्याजानंतिनमनागपिदेवताः केयंकस्मात्कुतोनेतिस्वरूपा
रूपभावनः ९ वंदेतामहमक्षय्यक्षकाराक्षररूपिणीं देवीकुलकलोलप्रलुसंतींपरांशिवां
१० वर्गानुक्रमयोगेनयस्यांमात्राष्टकंस्थितं वंदेतामष्टवर्गोत्थांमहासिद्धाष्टकेश्वरीं ११
वमपूर्णजकाराख्यश्रीपीठोत्थंनिवासिंनी चतुरास्यांकोटिसूर्यतानौमिश्रीत्रिपुरामहं १२ इति
द्वादशश्लोकैस्तवनंसर्वसिद्धिप्रदं देव्यास्त्रिखंडरूपायास्तवनंस्तवनप्रियः १३ इति
द्वादशीश्लोकी इतिस्तुत्वानिवेदनंपूर्ववत् ततोमूलंश्रीमहात्रिपुरसुंदरिश्रीपादुकाभ्यांपुष्पां
जलिंसमर्पयामि इतिपुष्पांजलित्रयंक्षिपेत् ।।निवेदनंपूर्ववत् ततः स४ श्रीमन्महात्रि
पुरसुंदरीश्रीपादुकाभ्यांअष्टांगेप्रणामंसमर्पयामिइतिप्रणमेत् अष्टांगोप्रणामोयथा उरसा
शिरसावैवमनसावचसातथा पद्भ्यांकराभ्यांजानुभ्यांप्रणामोष्टांगईरितः दंडवापंचवा
देवित्रयंवापिएकमेववा दंडप्रणामंकुर्वीतसाष्टांगोदेहभूशिरुत् एवंसाष्टांगंनत्वापंचप
णाममुद्रांसिर्नमेत् संरोधोसन्निधापश्चकमठंवितनंतथा योनिश्चेतिसमाख्याताः
प्रणामाः पंचमुद्रयामितिनिवेदयेत् निवेदनंजलंदद्याग्रतः क्षित्वात्रोत्तरेस्यजेत्।।

इतिषोडशोपचारपूजा इतिषोडशोपचारैःपूजयित्वालयांगखेनदेव्यंगेषडंगानिपूजयेत् यथा
हृ५ हृदयायनमः हृ५ शिरसेस्वाहा स४ शिखायैनमः हृ५ कवचायनमः हृ५ नेत्रत्र
यायनमः स४ अस्त्रायनमः इतिषडंगेषुध्यानमुद्रयापुष्पैःसंपूज्य मूलश्रीमन्माहात्रि
पुरसुंदरिपादुकांपूजयामितर्पयामिइतिविशेषार्घ्यामृतेनत्रीःसंतर्पयेत् ततःकरौमु
कलीकृत्यसविन्मयेपरेदेविपरामृतवरुप्रिये अनुज्ञांत्रिपुरेदेविपरिवारार्चनायमे
इत्यनेनदेव्यनुज्ञांगृहीत्वावाह्यावरणदेवतापूजयेत् तद्यथा तत्रादौषोडशनित्यापू
जयेत् तत्रबिंदुचक्रेपश्चिमेषोडशीनित्यांसंपूज्यतस्यांतद्दिनतिथिनित्यांपूजयित्वापुनः
षोडशींसंपूज्य यथाक्रमंनित्यामंडलंपूजयेत् इतिक्रमः तदुक्तंवामकेश्वरतंत्रे गीतवा
द्यैश्चनृत्यैश्चपूजयित्वामहेश्वरीं तत्रैवपूजयेन्नित्यांषोडशीतिथिरूपिणी मिति तथा
ज्ञानार्णवे कामेश्वर्यादिकानित्याविचित्रोतामहेश्वरि प्रतिपत्पौर्णमास्यंतंतिथिरू
पाःपूजयेत् प्रतिपत्तिथिमारभ्यपौर्णमास्यंतमद्रिजे एकैकंपूजयेन्नित्यांसर्वसौभाग्य
मापुयात् रुद्रयामलेमहेशानिपूजनेयेनिथिमंडलं विचित्राद्यावरारोहेयावत्कामेश्वरीम्
वेत् कामेश्वर्यादिकानित्याःपूजयित्वाक्रमान्ततः तिथिनित्यात्रिधादेविपूजयेद्ध्यानेन

तये पुनश्रीत्रिपुरानित्यांयजेत्सौभाग्यहेतवे इतिअस्यार्थः शुक्लपक्षेप्रतिपत्तिथिमारभ्यपौर्णि
मास्यंतंकामेश्वर्यादिविचित्रोतामतन्तिथिनित्याभवेति तत्तत्तिथौमहानित्यासंपुटितततद्दिन
तिथिनित्यांसंपूज्यततःकामेश्वर्यादिविचित्रोताःपंचदशपक्षेतुप्रतिपदारभ्यअमांतंविचित्रा
दिकामेश्वर्यंतान्ततदिनतिथिनित्याभवेतिदशनित्याक्रमेणततस्वस्वस्थानेषुपूजयेदितिक्र
मः अत्रकामेश्वर्यादिपंचदशतिथिनित्यानांपूजनेऽप्यपक्षेपिअनुलोमेनैवकार्यं॥
ततदिनतिथिनित्यानांपूजनंतुकामेश्वर्यायनुलोमेनशुक्लपक्षेकार्यं कृष्णपक्षेतुविचित्रादि
प्रतिलोमेनकार्यंशुक्लप्रतिपदिविचित्रातद्दिनतिथिनित्याभवेति द्वितीयेत्यादि द्वितीयायां
भगमालिनीतिक्रमः कृष्णप्रतिपदिविचित्रातद्दिनतिथिनित्याभवति द्वितीयायांभगमा
लिनीतिक्रमः ततःकामेश्वर्यादिपंचदशनित्याःक्रमेणयजेत् इतिनित्यापूजनं अथमे
रुयंत्रेवोक्तं विभाव्यबमहत्यस्यमध्यरक्षोत्तरक्रमात् रेखासुविलिखेत्तत्रपंचपंचक्रमेणहि
श्रावणाद्याःकृष्णिताःदक्षिणायादिविचिंतयेत् ततश्चपूर्वरेखायांदीर्घकोणादिपंचकं विलि
ख्योत्तररेखायांशक्त्यादिस्वरपंचकं अनुस्वरोत्तमनेनतुविसर्गांषोडशीमजेत् वामावर्तेन
देवेशिनित्याःषोडशकीर्तिताः इति तत्रमध्यत्रिकोणरेखास्थितिवतुःत्रातिमिलने तदु

३७भयपक्षेपि

ऋंनत्रेव त्रिकोणेतत्पुरनाथ्यौ यांप्रतिबिंबाकृतिंयजेत् तत्तिथिमयीनित्यांकाम्यकर्मानुसारि
णीमिति बिंदुचक्रेपरेतित्रराजमतं नदुक्तंनत्रेव मध्यस्थदेवीहृत्कैवषोऽउक्षाकारतस्थिता
यतस्तस्मात्तनोतस्यास्त्वन्याःपरदेवताश्चयेदिति तनोविंदात्यर्थः नदुक्तंमन्यत्र महाविं
दुमयीनित्यांयजेत्त्रिपुरसुंदरिमिति तथाचक्राद्बहिःस्वपुरःत्रिकोणंकृत्वातत्रतिथिनित्याः
पूजयेदितिकेषांचिन्मतं एवंमतभेदेसर्वगुरुसंमतमविरुद्धं नदुक्तंसकेतपत्रयां आगमा
नामतंत्रात्तुकर्तव्यंगुरुसंमतमिति तत्रपूजाक्रमः बिंदुचक्रेत्रिकोणेविभाव्यतस्यअग्नेको
णादक्षिणकोणांतंदक्षरेखायां अंआंइंईंउंऊंइतिपंचस्वरान्विभाव्य दक्षकोणादाम्रकोणां
तंपूर्वरेखायांऊंऋंॠंऌंॡंइतिपंचस्वरान्विभाव्य वामकोणादग्नितंउत्तररेखायांएंऐंओं
औंअंइतिपंचस्वरान्विभाव्य अःइतिमध्येभावयेत् तद्यथा ह्रींश्रींअःमूलंअःश्रीमन्महा
त्रिपुरसुंदरिमहानित्याश्रीपादुकांपूजयामितर्पयामिइतिविशेषार्घ्यंमूलेनत्रींःसंपूज्यसंतर्प्य
ननोतत्तत्स्वरसंपुटितंतत्तिथिनित्यांक्रमेणाश्रुकृतदिनतिथिनित्याश्रीपा०इतिविशेषार्घ्यं
मूलेननैवत्रींःसंपूज्यसंतर्प्यपुनःअःमूलंअःश्रीमन्महात्रिपुरसुंदरिमहानित्याश्रीपा०नद्विंदु
नात्रींःसंपूज्यतर्पयेत् इतिमध्येविसर्गीस्थानेपूजयेत् ततःकामेश्वर्यादिनित्याःस्वस्वस्थानेषु

यजेत् यथा दक्षरेखायां २अंऐंसकलह्रींनित्क्लिन्नेमदद्रवेसौः अंकामेश्वरीनित्याश्रीपादुकांपूजया
मितर्पयामि २ओंऐंभगाभृगोभगिनिभगोदरिभगमालेभगवहेभगगुह्येभगयोनिभगनिपातनिसर्व
भगवशंकरिभगरूपेनित्यक्लिन्नेभगस्वरूपेसर्वाणिभगानिमेवशमानयवरदेरमेस्मरेतेभगक्लिन्नेक्लिन्न
द्रवेक्लेदयशवयअमोघेभगविषेसुभगक्षोभयसर्वसत्वान्भगेश्वरिऐंद्रुंजंबूंसंबूंमोंबूंहेबूंहेक्लिं
न्नेसर्वाणिभगानिमेवशमानयस्त्रींहरखेंह्रींओंभगमालिनीनित्यांश्रीपा०ईंह्रींनित्यक्लिन्नेमद
द्रवेस्वाहाईंनित्याक्लिन्नित्याश्रीपा०२ईंॐक्रोंक्ष्त्रोंक्रोंस्त्रोंह्स्त्रौंज्त्रौंस्वाहा ईंपेरुंडानित्याश्रीपा०
२उंॐह्रींवह्निवासिन्यैनमः उंवह्निवासिनिनित्याश्रीपा०२द्वितीयरेखायांऊंह्रींक्लिन्नेऐंक्रोंनि
त्यमदद्रवेह्रींऊंवज्रेश्वरिनित्याश्रीपा०२ऋंह्रींशिवादूत्यैनमः ऋंशिवादूतीनित्याश्रीपा०२
ॠंह्रींहुंखेचरेद्वेषः स्त्रींहुंखेंफट्ऌंक्लेदिनीनित्याश्रीपा०२ऌंऐंह्रींक्लींसौः ऌंकुलसुंदरिनित्या
श्रीपा०२ॡंसकलरंडेंहसकलरंडीहसकलरंडोः ॡंनित्यानित्याश्रीपा०२तृतीयरेखायां२एंह्रींक्रें
स्त्रूंक्रोंओंक्लींऐंबूंनित्यमदद्रवेहुंफेंह्रींएंनीलपताकानित्याश्रीपा०२ऐंभमरयंक्रौंऔंऐंविजयानि
त्याश्रीपा०२ओंस्त्रोंओंसर्वमंगलानित्याश्रीपा०२ओंॐनमोभगवतिज्वालामालिनिदेवदेविस
र्वभूतसंहारकारिकेजातवेदसिज्वलतिज्वलज्वलप्रज्वलहांह्रींहूंरररररररज्वालामालिनिहुं

फट्स्वाहा ओंज्वालामालिनिनित्याश्रीपा०२ अंवकोंअंवित्रानित्यापादुका० इतिरेखात्रयेसंपूज्यपु
नःमध्येमहानित्यासंपुटितनद्दिनतिथिनित्योंत्रीःसंपूज्यसंनर्पयेत् ततोनिथिनित्यांपंचोपचारै
संपूज्यततनतिथिविहितनैवेद्यंदद्यात् यथा प्रतिपदिघृतं द्वितीयायांशर्करा तृतीयायांदुग्धं॥
चतुर्थ्यांभक्ष्यं पंचम्यांकदलीफलं ६षष्ठ्यांमाषिकं ७सप्तम्यांगुडं ८अष्टम्यांनारिकेलं ९नवम्यां
लाजा १० दशम्यांनिलाः ११ एकादश्यांदधिः १२ द्वादश्यांविपीटकाः १३ त्रयोदश्यांवणकाः १४ चतुर्द
श्यांमुद्गाः १५ पौर्णिमास्यांपायसं १६ एवंतत्तन्निथौतत्तन्निथिनिसायाःततनैवेद्यंसमर्प्यपंचदशा
मालासुततन्मालामंत्रेणपुष्पांजलिंदद्यात् तात्तत्त्व शुक्लमालातोमालास्वाहामालातर्पणमा
लाजयमालाइतिपंचधा तत्रशक्तिमालापंचकं शिवमालापंचकं मिथुनमालापंचकं एवंपंचदशा
मालाःक्रमेणाप्रतिपदादिपौर्णिमास्यंतंपंचदशनिथिषुजपेत् तत्रक्रमः शुक्लप्रतिपदिमहानित्या
संपुटितकामेश्वरीततिथिनित्यांमध्येसंपूज्यपुनःकामेश्वर्यादिचित्रांतापंचदशनित्याःत्रिकोणानि
रेखास्वतत्तत्स्वरेषुक्रमेणपूजयित्वापुनर्मोहानित्याःसंपुटितांकामेश्वरींततिथिनित्यांविसर्गपूज
यित्वागंधादिरीपांतैरुपचारैरुपचर्यघृतंनैवेद्यंदत्वाशुक्लशक्तिमालयापुष्पांजलिंसमर्प्ययो
निमुद्रयाप्रणमेत् ततःशुक्लद्वितीयायांमहानित्यांसंपुटिततत्तिथिनित्यांभगमालिनीसंपू

BHAU DAJI MEMORIAL

ज्यपुनःकामेश्वर्यादिपंचदशनित्याःक्रमेणसंपूज्यपुनर्मोहानित्यांसंपुटितांभगमालांपूजयित्वारीपां
तैरुपचारैरुपचार्यघृतंनैवेद्यंदत्वातन्मोशक्तिमालयापुष्पांजलिंसमर्प्ययोनिमुद्रयाप्रणमेत्
एवंशुक्लतृतीयायांतत्तन्नित्याक्लिन्नांसंपूज्यदुग्धंनैवेद्यंनिवेद्यस्वाहाशक्तिमालयापुष्पांजलिस
मर्प्यप्रणमेत् शुक्लचतुर्थ्यांतथैवभक्ष्यैरंतःसंपूज्यअभ्यर्चनैवेद्यंदत्वातर्पणशक्तिमालयापुष्पांजलिः
पंचम्यांवह्निवासिनीसंपूज्यकदलीफलंनैवेद्यंजयजयशक्तिमालयापुष्पांजलिः ततःपौर्णिमा
स्यांनेत्रमेषांततनिथिनित्यांसंपूज्यततनैवेद्यंदत्वाततन्मालयापुष्पांजलिः एवंकृष्णपक्षेपि॥
कृष्णप्रतिपदिमहानित्यासंपुटितचित्रांततिथिनित्यांसंपूज्यकामेश्वर्यादिचित्रांतापंचदशनित्याः
क्रमेणपूजयेत् पुनर्मोहानित्यासंपुटितांचित्रांसंपूज्यनथैवोपचार्यपायसंनैवेद्यंदत्वा२मिथु
नशक्तिमालयापुष्पांजलिंसमर्प्ययोनिमुद्रयाप्रणमेत् एवंकृष्णद्वितीयायांमहानित्यासंपुटितां
ज्वालामालिनीततिथिनित्यांसंपूज्यकामेश्वर्यादिनित्याक्रमेणपूजयित्वापुनस्तथैवज्वाल्म
मालिनींपूजयित्वामुद्गनैवेद्यंदत्वामिथुनतर्पणमालयापुष्पांजलिंनिवेद्यप्रणमेत् एवंअमां
तंततत्तिथिषुकामेश्वर्यंतास्तत्तन्नित्याःसंपूज्यततनैवेद्यंसमर्प्यततन्मालयापुष्पांजलिंदत्वा
योनिमुद्रयाप्रणमेत् उक्तयथाविन्यासेनैवमत्रतत्तत्तिथिनित्यापूजनेक्षयतिथौएकस्मिन्दिने

नित्याद्वयं दक्षिणाम्न्यांऽकानित्यादिनद्वयेपूजयेत् उदयव्यापिनीन्येवअहोरात्रिव्यापिकेति
संप्रदायः वोऽस्तानित्यापूजाक्रमः अत्रमहानित्यांतनिधिनित्यांविशेषार्घ्यमंत्रेनैवतर्पयेत्
कामेश्वर्यादिपंचदशनित्याः श्रीपात्रामृतेनतर्पयेत् अथगुरुपंक्तिपूजाक्रमः मध्यप्राक्
त्र्यस्रमध्यांतनिधिनित्यार्चनादधः श्रीभोग्यापूजयेत्मंत्रीगुरुपादुकामावलिं तथा नाथां
स्कष्टमोदिव्याः जयनिधिमलोत्तरमिति तथाच मध्यत्रिकोणष्टांतरालेरेखात्रयेस्मरेत्
नास्कदिव्यौघसिध्यौघमानवौघत्रिकंयजेत् तथयथा मध्यप्राक्त्र्यस्रमध्यांतरलेखि
मलाजयिन्योर्मध्येदक्षिणोत्तरायतास्तिस्त्रोरेखाःस्मरेत्तासुस्वदक्षादिवामोत्तरदिव्यौ
घसिध्यौघमानवौघान्पूजयेत् तत्रप्रथमरेखायां २ दिव्यौघेभ्यो: परारत्रेभ्योगुरुभ्यो न
मः इतिपुष्पांजलिंनिक्षिप्यपूर्वोक्तदिव्यौघान्पूजयेत् अत्रअमुकानंदनाथश्रीपादु
कांपूजयामितर्पयामि इतियोगः नाथपदस्थानेत्रोक्तिपदंदद्यात् स्वमंडलेषुनाथांता
न्कांश्चाः देविमंडलेमिननेत्रराजवत्रनात् द्वितीयरेखायांपरापरारत्र्यौघसिध्यौघगु
रुभ्योनमः इतिपुष्पांजलिर्निक्षिप्यपूर्वोक्तसिध्यौघान्पूजयेत् २ तृतीयरेखायां
पराररत्र्यौघमानवौघगुरुभ्योनमः इतिपुष्पांजलिर्निक्षिप्यपूर्वोक्तसिध्यौघान्पूजये

त् मानवौघांतिकेस्वगुरुपंक्तिंसंपूज्यस्वगुरुपादुकाविद्ययास्वगुरुंसंपूज्यगुरुमूलेनपुष्पांजलिंदत्वा
योनिमुद्रयाप्रणमेत् अत्रगुरुपूजनंअंतर्यागोक्तंकार्यं इतिगुरुपंक्तिपूजा श्रीगुरोर्दक्षिणामूर्ति
भक्तानुग्रहविग्रह अनुज्ञांदेहिभगवन्श्रीचक्रपूजनायमे इतिगुर्वनुज्ञांप्राप्यार्घ्यंअंगपूजांकु
र्यात् अस्मिन्नेवसमयेपंचपंचिकाविधिमिःपंचासिहासनंयजेदिति ज्ञानार्णवदक्षिणामूर्ति
संहितायोर्मतं नवावरणपूजांतेपूजयेत्पंचपंचिकामितियामलादिमते उभयोर्मध्येउत्तरपक्षः
समीचीनइतितांत्रिकाः ज्ञानार्णवादिसुस्वीकटाहन्यायेनप्रसंगयतिनत्योक्तरिति वामकेश्व
रतंत्रराजोक्तपंचपंचिकापूजनमेवनोक्तं ततोऽष्टारत्रिकोणाष्टकोणारंतरालेषुआनीत्वाक्रमा
यव्ययमध्यरिक्तवेगेपूजनमितिसुक्तं भोगांगरेखनाःध्यात्वायजेत् तुषारस्फटिकरूप्यमनी
लरक्तारुणासिंधः वरदाभयधारिण्यःप्रधानतःनवस्त्रियः इतिध्यात्वापूजयेत् २ह्रः
सर्वज्ञायेहृदयायनमः हृदयशक्तिश्रीपा० आग्नेये २ह्रः नित्यतृप्तायेशिरसेस्वाहाशिरः
शक्तिश्री० ईशान्ये २स्रः अनादिबोधायेशिखायैवषट् शिखाशक्तिश्रीपा० नैऋत्ये २
ह्रः स्वतंत्रायैकवचायहुंकवचशक्तिश्रीपा० वायव्ये २ह्रः निस्समलुप्तायैनेत्रत्रयायवौष
ट्नेत्रशक्तिश्रीपा० इतिमध्ये २स्रः अनंतशक्तयेअस्त्रायफट्अस्त्रशक्तिश्रीपा० वसु

दिक्षु॥संपूज्यसतर्प्य॥षडंगयुवतिपूजा॥अथनवावरणपूजा॥तत्रैव२समस्तप्रकटनिसमष्टिमंत्रेण
पुष्पांजलिनासमस्तचक्रंसंपूज्य॥पश्चात्व्यष्टिचक्रपूजामारभेत्॥यथा॥२ॐश्रींसौंत्रैलोक्य
मोहनचक्रायनमःप्रकटयोगिनीभ्योनमःइतिचतुरस्रेपुष्पांजलिंदत्वा॥२चतुरस्राग्रेरक्तवर्णेन
मङ्गलिपुष्पांजलिंदत्वोद्व्यष्टादिदिक्षुरेखात्रयेमध्येनिर्ऋतिवरुणयोर्मध्येनिवृत्तयेमध्येदशसिद्धिपाशांकुशयु
क्तषड्भुजकराःरक्तवर्णाःसान्नाय्यवरासिद्धिवाहनस्वाध्यायंपूजयेत्॥तत्रपश्चमादिद्वारचतुष्टयस्यद
क्षभागे२अणिमासिद्धिश्रीपादुकांपूजयामितर्पयामि२लघिमासिद्धिश्रीपा०२महिमासिद्धिश्री
पा०२ईशित्वसिद्धिश्रीपा०२वशित्वसिद्धिश्रीपा०२प्राकाम्यसिद्धिश्रीपा०
२भुक्तिसिद्धिश्रीपा०२इच्छासिद्धिश्रीपा०२दक्षेशानयोर्मध्येऊर्ध्वप्राप्तिसिद्धिश्रीपा०२निर्ऋति
वरुणयोर्मध्येअधःसर्वकामसिद्धिश्रीपा०चतुरस्रमध्येरेखात्रयेनमः इतिपुष्पांजलिंदत्वातत्रत्रिकोणे
रक्तहस्तानीलवर्णीरक्तवस्त्राभरणाःब्राह्मादयोष्टमातर्ऊर्ध्वाद्यायुधाद्यग्रादिकूटद्वाराणांवामभागेषुवि
दिक्कोणेषुवापूजयेत्२ब्रां ब्रह्मीश्रीपा०२मां माहेश्वरीश्रीपा०२कौं कौमारीश्रीपा०२वैं वैष्णवी श्रीपा०२ राम
वाराहीश्रीपादु०२इंद्राणीश्रीपा३०२चामुंडाश्रीपा०२महालक्ष्मीश्रीपा०अत्राष्टमातरोदीर्घस्वराद्याः १०७
पूज्याःइतिकेचित्॥तत२ॐअंआंश्चतुरस्रेरेखायेनमःइतिपुष्पांजलिंदत्वातत्रत्रिकाःपाशांकुशाःख

३४ क्लीं सर्वाकर्षिणीमुद्राश्रीपा०२ब्लूं सर्वविद्रावणीमुद्राश्रीपा०२सः सर्वोन्मादिनीमुद्राश्रीपा०क्रों सर्वमहांकुशामुद्राश्रीपा०४३

मुद्राकिलमस्तकाःअनुग्रहंकुरुमेभीष्टंमुद्रादेवताःपाशांकुशास्वस्वमुद्रांकिलवहंतुभुजाःरक्ताःत्रि
नेत्राःसालंकाराःदेवामुद्राःध्यात्वा प्रथमरेखायांतत्रादिशिष्यंनपूजयेत्२मुं मुद्रांसर्वसंक्षोभिणीमुद्रा
श्रीपा०द्रीं सर्वविद्राविणीमुद्राश्रीपा०क्लीं क्लेंसर्ववशंकरीमुद्राश्रीपा०२ब्लूं सर्वबीजमुद्राश्रीपा०ऐंस
र्वयोनिमुद्राश्रीपा०क्लीं सर्वत्रिखंडमुद्राश्रीपा०२ततोअणिमासिद्धेपुरः त्रिपुरास्फटिकाभासा
मुक्तारत्नविभूषिताः पुस्तकंवरदंपाशमालंचकपालंपद्ममुत्तमं बिभ्रतीसिद्धयेवीत्यामहापाशपविनाशनी इ
तिध्यात्वा२ॐओंसौंत्रिपुरचक्रेश्वरिश्रीपा०तस्याः दद्मे२अणिमासिद्धिश्रीपादुकां०नमः ऐं क्लीं सर्वसं
क्षोभिणीमुद्राश्रीपा०२द्रांसर्वसंक्षोभिणीमुद्रांप्रदर्श्य२एताःप्रकटयोगिन्यस्त्रैलोक्यमोहनेचक्रेसमुद्राः
ससिद्धयःसायुधाससनाःसवाहनाःसपरिवाराःसर्वोपचारैःपूजिताःसंतुमेनमः इतिसामा
न्यार्घोदकगंधपुष्पाक्षतैश्चक्रेश्वरीयामहस्तेचक्रंपूजांसमर्प्यमूलंश्रीमन्महात्रिपुरसुंदरीश्रीपा०
इतिशेषार्घ्यंतेन पुनःमूलंअभिष्टसिद्धिमेहृदेहिशरणागतवत्सले भक्त्यासमर्पयेत्तुभ्यंपूजा
मावरणार्चनं इतिपुष्पांजलिंसमर्प्यपुनर्मूलमुच्चार्यप्रकटयोगिनीमयूरखंडायेश्रीमहात्रिपुरसुंदरी
यैनमः इतियोगिनीमुद्रांप्रणमेत्॥इतिपथमावरणं२ऐं क्लीं सौंः सर्वाशापरिपूरकचक्रायनमः
गुप्तयोगिनीभ्योनमः इतिषोडशारेषुपुष्पांजलिंदत्वातद्रेषुदेव्यष्टदलमारभ्यनामावर्चनं

कामाकर्षिण्यादिनित्याकलाः षोडशासंपूज्यतर्पयेत् यथा रक्ताः पाशांकुशाकराः कलानित्याः क
लानिधेः आकर्षसुमनमाभिष्टषोडशाक्षरिशक्तयः २ ॐ कामाकर्षिणी नित्याकलाश्रीपा०२ ॐ
बुध्याकर्षिणीनित्याकलाश्रीपा०२ हूं अहंकाराकर्षिणीनित्याकलाश्रीपा०२ ईं शब्दाकर्षिणीनित्या
कलाश्रीपा०२ उं स्पर्शाकर्षिणीनित्याकलाश्रीपा०२ ऊं रूपाकर्षिणीनित्याकलाश्रीपा०२ ऋं रस
कर्षिणीनित्याकलाश्रीपा०२ ॠं गंधाकर्षिणीनित्याकलाश्रीपा०२ ऌं चित्ताकर्षिणीनित्याकला
श्रीपा०२ ॡं धैर्याकर्षिणीनित्याकलाश्रीपा०२ एं स्मृत्याकर्षिणीनित्याकलाश्रीपा०२ ऐं नामा
कर्षिणीनित्याकलाश्रीपा०२ ओं बीजाकर्षिणीनित्याकलाश्रीपा०२ औं आत्माकर्षिणीनित्याश्री
पा०२ अं धर्माकर्षिणीनित्याकलाश्रीपा०२ अः शरीराकर्षिणीनित्याकलाश्रीपा०२ कामा
कर्षण्यङ्कुशीभुभ्रोगरागरूपगोकपूरशकलोज्वलां पाशांकुशौमहेच्छानिदक्षवामकरेणवे वर
दाभयशोभाढ्यासमरूपारश्चतप्रदोधृतिध्यात्वा २ ऐं क्लीं सौः त्रिपुराचक्रेश्वरीश्रीपा० तर्पये २
लघिमासिद्धिश्री०२ खामेशीसर्वसिद्धाविणीमुद्राश्रीपा०२ द्रीद्रांविमुद्रांप्रदर्श्य २ एतागुप्त योगि
न्यः सर्वक्षोभणचक्रेसमुद्रास्त्यादिपूर्ववदुच्चार्यसामान्यार्घ्योदकेनचक्रेश्वर्याः वामहस्तेचक्र राम
पूजोसमर्थ्यमूलेनमूलदेवीसंपूज्यसंतर्प्यमूलं अभिष्टसिद्धिमदेहीतिपुष्पांजलिंसमर्प्यपुनर्मूलंगुप्त १०८

योगिनीमयुक्तायैश्रीमहात्रिपुरसुंदर्यैनमः इतियोगिनीमुद्रयाप्रणमेत् इतीद्वितीयावरणं २ क्लीं क्लीं
सौः सर्वसंक्षोभणचक्रायनमः गुप्ततरयोगिनीभ्योनमः इत्यष्टदलेषुपुष्पांजलिंनिक्षिप्य अनंगकुसु
मागाढ्यरक्तरक्तकंचुकशोभिताः वेणीतललसत्केशाश्चापपाशधराः शुभाः इतिध्यात्वाद्यः पृष्ठद
लमारभ्यपूर्वादिचतुर्दिक्षुअग्न्यादिविदिक्षुप्रादक्षिण्यक्रमेणअष्टावनंगशक्तीः पूजयेत् २ कं ५
अनंगकुसुमश्री०२ वं ५ अनंगमेखलाश्रीपा०२ टं ५ अनंगमदनाश्रीपा०२ तं ५ अनंगमदनातु
राश्रीपा०२ पं ५ अनंगरेखाश्रीपा०२ यं ४ अनंगवेगिनीश्री०२ शं ४ अनंगांकुशाश्री०२ लं क्षं अ
नंगमालिनीश्रीपा० अनंगकुसुमाद्येसुंदरिकेकुमलायासर्वालंकारभूषिता पुस्तकेक्षसमा
लांवविभ्रतीवरदाभये २ क्लीं क्लीं सौः त्रिपुरसुंदरीचक्रेश्वरीश्रीपा० तर्पयामहिमासिद्धिश्री
पा० वामे २ क्लीं आकर्षिणीमुद्राश्रीपा० आकर्षिणीमुद्रांप्रदर्श्य २ एतागुप्ततरयोगिन्यः स
र्वसंक्षोभणेचक्रेसमुद्रास्त्यादिपूर्ववदुच्चार्यसामान्यार्घ्योदकेनचक्रेश्वर्याः वामहस्तेचक्रपूजां
समर्प्यपुनर्मूलयादेवीमाराध्य २ मूलमुच्चार्यआपीष्टसिद्धिमदेहीत्युच्चार्यतृतीयावरणा र्चन
मिति देव्यैपुष्पांजलिंनिक्षिप्य पुनर्मूलमुच्चार्यगुप्ततरयोगिनीमहात्रिपुरसुंदर्यैनमः इति
योगिनीमुद्रयाप्रणमेत् इतितृतीयावरणं २ ह्रीं क्लीं ह्सौः सर्वसौभाग्यदायकचक्रायनमः॥

संप्रदाययोगिनीभ्योनमः इतिचतुरश्रारेपुष्पांजलिंदत्वादेव्यग्रेकोणमारभ्यवामावर्त्तेनसर्व
संक्षोभिण्यादिचतुरश्रान्तर्गीर्ध्यात्मापूजयेत् इंद्रगोपनिभांसर्वासर्वावामंत्रदेवताः पात्रांकु
शोदर्पणंचपानपात्रंसुधामयं विभ्रत्यः सर्वसौभाग्यौः ध्यातव्याः परमेश्वरि २ कंसर्वसंक्षोभिणी
शक्तिश्रीपा॰२ खंसर्वविद्राविणीशक्तिश्रीपा॰२ गंसर्वाकर्षिणीशक्तिश्री॰२ घंसर्वाह्लादिनी
शक्तिश्री॰२ ङंसर्वसंमोहिनीशक्तिश्रीपा॰२ चंसर्वस्तंभिनीशक्तिश्री॰२ छंसर्वजृंभिणीश
क्तिश्री॰२ जंसर्ववशंकरीशक्तिश्री॰२ झंसर्वरंजनीशक्तिश्री॰२ ञंसर्वोन्मादिनीशक्तिश्री॰
२ टंसर्वार्थसाधिनीशक्तिश्री॰२ ठंसर्वसंपत्तिरूपिणीशक्तिश्री॰२ डंसर्वमंत्रमयीशक्तिश्री॰
२ ढंसर्वद्वंद्वक्षयंकरीशक्तिश्री॰२ सर्वसौभाग्यदायचक्रायनमः सर्वसंक्षोभिण्यग्रेसर्वालंकारसंपन्नापुस्तकंचाक्षमालिकां
वरामयेवरदधतीवासिताहसिताननाहेंक्लींह्सौंः त्रिपुरवासिनीचक्रेश्वरीश्रीपा॰ तद्ध्सेहरि
त्वसिद्धिश्रीपा॰ वामेभ्रूंवशंकरीमुद्राश्रीपा॰२ भ्रूंवशंकरीमुद्रांप्रदर्श्य २एताः संप्रदाययोगिन्यः
सर्वसौभाग्यदायकेचक्रेसमुद्राद्यादिपूर्ववदुद्धार्यश्रीपात्रोदकेनचक्रेश्वरीवामहस्तेचक्रपूजां
समर्प्यवित्रोषार्घ्यजलेनमूलदेवींसंपूज्यसंतर्प्य २ मूलमुद्धार्यअभिष्टसिद्धिमिस्याशुद्धार्यचतु
र्थावरणार्चनमितिदेव्यैपुष्पांजलिंनिवेद्यपुनर्मूलंसंप्रदाययोगिनीमपूरयेत्श्रीमात्रिपु

रसुंदर्यैनमः इतियोनिमुद्रयाप्रणमेत् इतिचतुर्थावरणं २ ह्रैं ह्रींह्सौंः सर्वार्थसाधकचक्रायनमः
कुलकौलयोगिनीभ्योनमः इतिबाह्यदशारेपुष्पांजलिंदत्वाध्यायेत्तूजेत् शुभ्रांवराभयशूलो
वंदेविश्वकुलेश्वरि सर्वसिद्धिप्रदाद्यास्ताः स्वनामार्थफलप्रदा एवंध्यात्वादेव्यग्रेकोणमारभ्यव
मावर्त्तेनसंपूज्य २ णंसर्वसिद्धिप्रदादेवीश्रीपा॰२ तंसर्वसंपत्प्रदादेवीश्रीपा॰२ थंसर्वप्रियंकरी
देवीश्रीपा॰२ दंसर्वमंगलकारिणीदेवीश्रीपा॰२ धंसर्वकामप्रदादेवीश्रीपा॰२ नंसर्वदुःखविमो
चनीदेवीश्री॰२ पंसर्वमृत्युप्रशमनीदेवीश्रीपा॰२ फंसर्वविघ्नविनाशनीदेवीश्रीपा॰२ बंसर्वी
गसंदरादेवीश्रीपा॰२ भंसर्वसौभाग्यदायिनीदेवीश्रीपा॰२ सर्वसिद्धिप्रदाग्रेआरक्तलोच
नप्रांतमहामदविघूर्णिता त्रिपुराश्रीमहेशानिपीनशृंगघनस्तनी उद्यद्भानुसहस्राभादि
व्यालंकारमंडिता पुस्तकंजपमालंवरदंवामयेकरैः दधतीसकलानाम्नाध्येयाःसर्वसम्प्र
दाय इतिध्यात्वा २ ह्रैं ह्रींह्सौंः त्रिपुराश्रीचक्रेश्वरीश्रीपा॰२ तद्ध्से २ वशिलसिद्धिश्रीपा॰२
वामेसः सर्वोन्मादिनीमुद्राश्रीपा॰ सः उन्मादिनीमुद्रांश्रीपा॰ सः उन्मादमुद्रांप्रदर्श्य एताः कु
लकौलियोगिन्यः सर्वार्थसाधकेचक्रेसमुद्राद्यादिपूर्ववदुद्धार्यश्रीपात्रोदकेनचक्रेश्वरीहस्ते
चक्रपूजांसमर्प्य मूलयात्रोषार्घ्योदकेनदेवीमाराध्यपुनर्मूलमुद्धार्यकुलकौलयोगिनी

मयूखायैश्रीमहात्रिपुरसुंदर्यैनमः इतियोनिमुद्रयाप्रणमेत् इतिपंचमावरणं २ ह्रींक्लींब्लूं सर्वरक्षाकरचक्रायनमः निगर्भयोगिनीभ्योनमः इतिपुष्पांजलिं अंतर्द्वारेनिक्षिप्यतत्र सर्वज्ञादिशक्तीर्ध्यात्वापूजयेत् सर्वरक्षाकरेचक्रेसर्वरक्षाकरापराः सर्वज्ञाद्याःस्थिताःश्चेताःसहपुस्तकमालिकाः इतिध्यात्वादेव्यग्रकोणमारभ्यवामावर्त्तेनदेवीःपूजयेत् २ मंसर्वज्ञादेवीश्रीपा० २ यंसर्वशक्तिदेवीश्रीपा० २ रंसर्वैश्वर्यप्रदादेवीश्रीपा० २ लंसर्वज्ञानमयीदेवीश्रीपा० २ वंसर्वव्याधिविनाशिनीदेवीश्रीपा० २ शंसर्वाधारस्वरूपादेवीश्रीपा० २ षंसर्वपापहरादेवीश्रीपा० २ संसर्वानंदमयीदेवीश्रीपा० २ हंसर्वरक्षास्वरूपिणीदेवीश्रीपा० २ लंसंसर्वेप्सितफलप्रदादेविश्रीपा० २ सर्वज्ञाग्नेदूतोपनिषादेविपाशांकुशाकपालिनीमें॥ महात्रिपुरसुंदरीप्रत्यंगदेवतामनीसाधकानांसपरिवाराणां २ ह्रींक्लींब्लूंत्रिपुरमालिनीचक्रेश्वरीश्रीपा० २ तद्दक्षे प्रा० काम्यसिद्धिश्रीपां० वामेक्रोंमहांकुशामुद्राश्रीपा० क्रोंमहांकुशामुद्रांप्रदर्श्य २ एताःनिगर्भयोगिन्यःसर्वरक्षाकरेचक्रेसमुद्रास्त्यादिपूर्ववदुद्वार्यश्रीपात्रामृतेनचक्रेश्वरीहस्तेचक्रं पूजांसमर्थ्यमूलयादेवीमाराध्य २ मूलमुद्वार्यअभिष्टसिद्धिमित्याद्यावर्यषष्ठमावरणार्चनमितिदेव्यैपुष्पांजलिंनिवेद्यपुनर्मूलंनिगर्भयोगिनीमयूखायैमहात्रिपुरसुंदर्यैनमः॥

MEMORIAL

इतियोनिमुद्रयाप्रणमेत् इतिषष्ठमावरणं ह्रींश्रींसौः सर्वरोगहरचक्रायनमः रहस्ययोगिनीभ्योनमः इतिअष्टारेपुष्पांजलिंनिक्षिप्यतत्रवशिन्याद्याःरक्तवर्णावराभयकरान्विताः पुस्तकेजपमालांवदधानाःसिद्धयोगिनी इतिध्यात्वादेव्यग्रकोणमारभ्यवामावर्त्तेनाष्टारेअष्टौवाग्देवताःपूजयेत् २ ॐओं १६ र ह्रूं वशिनिवाग्देवताश्रीपा० २ कं५ कलह्रींकामेश्वरीवाग्देवताश्रीपा० २ वं५ क्लीं मोदिनीवाग्देवताश्रीपा० २ टं५ सौं विमलावाग्देवताश्रीपा० २ तं५ ज्म्रीं अरुणावाग्देवताश्रीपा० २ पं५ ह्स्त्र्यूं जयिनीवाग्देवताश्रीपा० २ यं५ ह्स्त्रीं सर्वेश्वरीवाग्देवताश्रीपा० २ रों ६ ह्स्त्रीं कौलिनीवाग्देवताश्रीपा० २ वशिनीपुरतःसिद्धयपरमेश्वरीज्ञानींध्यायेद्बीजविलासिनीं पाशांकुशौकपालंवामपार्श्वेवदधतींकरे ह्रींश्रींसौः त्रिपुरासिद्धाचक्रेश्वरीश्रीपा० नदक्षेपुस्तकंसिद्धिश्रीपा० ह्स्त्रूं क्रेवरीमुद्राश्रीपा० खेचरीमुद्रांप्रदर्श्यएताः रहस्ययोगिन्यःसर्वरोगहरेचक्रेसमुद्रास्त्यादिपूर्ववदुद्वार्यश्रीपात्रामृतेनेश्वरीहस्तेचक्रंपूजांसमर्थ्यविद्येषार्घ्यामृतेनमूलयादेवीमाराध्य मूलंउभिष्टसिद्धिमितिउद्वार्यसप्तमावरणार्चनमितिदेव्यैपुष्पांजलिंनिवेद्यपुनर्मूलं रहस्ययोगिनीमयूखायैश्रीमहात्रिपुरसुंदर्यैनमः इतियोनिमुद्रयाप्रणमेत् इतिसप्तमावरणं त्रिकोणाष्टकोणयोरंतरालेदेव्यास्तंत्रदुर्वासस्थानेवाय

वादीशानांतंवामावर्त्तेनआयुधशक्तीपूजयेत् आयुधास्त्रिशिरक्ताभास्वाःयुधोज्वलमस्तका
वरदाभयहस्ताश्चपुंस्त्रीवशविधायिनः यांरांलांवांसांशांक्षींह्रींब्लूंसेःसर्वजनंमनकामेश्वरी
बाणशक्तिश्रीपा०वायव्ये २यंधेसर्वमोहनकामेश्वरकामेश्वरीधनुषशक्तिश्रीपा०नैऋत्ये।
२हींओंसर्ववशीकरणकामेश्वरकामेश्वरीपाशशक्तिश्रीपा०आग्नेये २क्रोंक्रोंसर्वस्तंभनका
मेश्वरकामेश्वरीअंकुशशक्तिश्रीपा०ईशान्ये नेदमावरणंवक्त्रेश्वरीवक्त्रनामाभावात् इ
तिआयुधपूजा ह्रैंह्रींह्रौंः सर्वसिद्धिप्रदचक्रायनमः परापररहस्ययोगिनीभ्योनमइति
त्रिकोणेषुपुष्पांजलिंदत्वा देव्यादक्षेवामकोणेषुकामेश्वरीदिकाध्यात्वायजेत् यथा पाशां
कुशाभयतलपालवराभयांकेहस्तेश्चतुर्भिरभिरामंमहारुणांगीं कोणाग्रगात्रिनयनांतरु
टांरुवृडाकामेश्वरीममदासुसमस्तकामान्ध्रदिध्यात्वा ह५ अग्निवक्त्रेकामगिरिपीठे
मित्रीशानोथात्मकेजाग्रद्शाधिष्ठायकेइच्छाशक्त्यात्मकरुद्रात्मशक्तिश्रीकामेश्वरीदेव्यंबा
श्रीपा० अग्रकोणे बालप्रवालरुचिराकारषट्कसंगिबाणेक्षुपाशस्त्रिपुस्तकमातुलिंगा
वज्रेश्वरीप्रथितदक्षिणकोणवामावज्रोज्वालाभिदिशोममबोधितानि ह५ सूर्यव
क्त्रेजालंधरपीठेषष्ठीशानाथात्मकेज्ञानशक्त्यात्मकविष्णुवासुकशा

क्तिश्रीवक्त्रेश्वरीदेव्यंबाश्रीपा०दक्षकोणेऽक्षशशांकरुचिराश्रितवामकोणेपाशांकुशाक्ष
गुणपुस्तकशस्तहस्ता उड्डाषयन्तिशामडूनपूरित्वाक्तिपीगर्ग्याश्रियंभगवतीभगमालि
नीमे स५ सोमवक्त्रेपूर्णगिरिपीठेउड्डीशनाथात्मकेपुंसुषुप्तिदशाधिष्ठायकेक्रियाशक्त्या
त्मकब्रह्मशक्तिश्रीभगमालिनीदेव्यंबाश्रीपा०वामकोणे कामेश्वर्यग्रे पंचमुंडासनासीनां
मुंडमालाविभूतां पाशांकुशाभयकरांध्यायेद्वदनमातरो इतिवक्त्रेश्वरींध्यात्वा ह्रैंह्रीं
स्त्रीः त्रिपुरांबावक्त्रेश्वरीश्रीपा०नदक्षेइच्छासिद्धिश्रीपा०वामेसोः बीजमुद्राश्रीपा०स्त्रीः बी
जमुद्रांप्रदर्श्यएताःपरापररहस्ययोगिन्यः सर्वसिद्धिप्रदेवक्त्रेसमुद्रादित्यादिपूर्ववदुद्धार्यश्री
पात्रामतेनवक्त्रेश्वरीहस्तेवक्त्रंपूजांसमर्प्य विशेषार्घ्यंस्वेनमूलदेवीमाराध्यपुनर्मूलमु
द्धार्यअभिष्टसिद्धिमेदेहिशरणागतवत्सले भक्त्यासमर्पयेत्तुभ्यंअष्टमावरणार्चनमि
तिदेव्यैपुष्पांजलिंनिवेद्यपुनर्मूलंपरापररहस्ययोगिनीमयूरव्यायेश्रीमहात्रिपुरसुंदर्यै
नमः इतियोनिमुद्रयाप्रणमेत् इतिअष्टमावरणं २मूलंसर्वानंदमयचक्रायनमः आ
नंदरहस्ययोगिनीभ्योनमः इतिबिंदुचक्रेपुष्पांजलिदत्वा सूर्येंदुवह्निमयभास्वरपीठगे
हास्वेतारुणसितरुणिपाशाब्जेक्षुरुचांवालेंदुमौलिमरुणाभत्रिणेत्रांनिजानमामि

महतीमहनीयमूर्त्तिं इतिध्यात्वा मूलपंचवदनीमुद्धार्यब्रह्मबक्त्रेओड्यानपीठेवर्यानाथात्मके तुरीयदशाधिष्ठायकेपरब्रह्मशक्तिश्रीमन्महात्रिपुरसुंदरिश्रीपा० २ मूलषोडशीमुद्धार्यब्रह्मानं दपीठेब्रह्मनाथात्मकेतुरीयातीतदशाधिष्ठायकेपरब्रह्मस्वरूपिणीश्रीमन्महात्रिपुरसुंदरिश्री० २ तुरीयविद्यामुद्धार्यशून्याशून्यविवर्जितेअनामाख्यदेवीश्रीपा० २ इतिविंशबक्त्रेसंपूज्यदेवेशे पादांबुजौशिरोधायेंत्रिलोचनं प्रसन्नवदनोनित्योनोमिबक्त्रेश्वरीपरां॥ इतिध्यात्वा मूलंपंचवदनात्रिपुरीविद्यामुद्धार्यश्रीमन्महात्रिपुरसुंदरीबक्त्रेश्वरीश्रीपा० २ नदक्षभागे प्रोक्षसिद्धिश्रीपादुकांपू० २ सर्वकामसिद्धिश्रीपा० वामे २ योनिमुद्राश्रीपा० २ ह्रैंक्लीं ह्रीं: सर्वत्रिखंडमुद्राश्रीपादुकां० योनिमुद्रांत्रिखंडामुद्रांप्रदर्श्य २ एताःअति रहस्ययोगिनीसर्वानंदमयेमहाबक्त्रेबैंदवेपरब्रह्मस्वरूपिणीससुद्राससिद्धासायुधासा सन्नासवाहनासपरिवारासर्वोपचारैःपूजिताःतर्पिताःसंतुनमइतिविशेषार्घ्यंमूलेनगंधाक्ष तांकुसुमैश्चक्रपार्श्वयोःवामहस्तेबक्त्रपूजांसमर्प्यपुनर्मूलेनमूलदेवींसंपूज्यसंतर्प्य॥ पुनर्मूलमुद्धार्यअभिष्टसिद्धिमेदेहिशरणागतवत्सले भक्त्यासमर्पयेत्तुभ्यंनवमावर णार्चनं इतिदेव्यैपुष्पांजलिंनिवेद्यपुनर्मूलमुद्धार्यअतिरहस्ययोगिनीमयूरबाणेश्रीमहात्रिपु

रसुंदर्यैनमः इतियोनिमुद्रयाप्रणमेत् इतिनवमावरणं सच्चिदानंदनाथेनउन्मन्यानंदसेवि ना चित्तशुद्ध्यर्थमाख्यातंत्रिपुरापूजनक्रमः इतित्रिपुरापूजनक्रमेअर्घ्यस्थानादिनवमा वरणानांनाख्यश्चतुर्थपरिछेदः अत्रपूजिताःसर्वावरणदेवताःमूलदेव्याश्चमुद्रयोपविष्टाज्ञानद्या: स्तनवावरणार्चननित्यमावश्यकं अत्रप्राचीदिशेवप्राचीनपूज्यपूजकयोरंतरालेप्राची अणि मापश्चिमेपूज्याद्यत्रदेव्यायदलस्थाख्यानात् देव्यग्रदलंपश्चिमदिक्भवति सायथास्थितप श्चिमा अग्रदलंतुपूज्यपूजकयोरंतरालंभवति नथावाच्यत् अनंगकुसुमापूर्वआत्रापिदेव्याः पृष्टदलस्थाख्यानात् देव्याःपृष्ठभागएवप्राचीसायथास्थितपूर्वा अत्रसमंतंनथावर्त्तं देव्यग्रेस्थ स्थवापश्चेनतुप्राचीप्रकल्प्येत् प्राच्येनप्राचीवेदिथमंत्रशास्त्रविदोबुधैः ५अतएवज्ञानार्णवे दक्षि णाज्ञामुखोमंत्रीयदादेवीप्रपूजयेत् दक्षिणाज्ञोवपूर्वाज्ञानदाभवतिनिश्चितं पश्चिमाज्ञामुखो मंत्रीयदादेवीप्रपूजयेत् पश्चिमाज्ञोवपूर्वाज्ञानदाभवतिनिश्चितं उत्तराज्ञामुखोमंत्रीयदादेवी प्रपूजयेत् उत्तराज्ञोवपूर्वाज्ञानदाभवतिनिश्चितं पूर्वाज्ञामिमुखोमंत्रीयदादेवीं प्रपूजयेत् पूर्वाज्ञोव नुपूर्वाज्ञानदाभवतिनिश्चितं तस्मात्देव्यग्रदलंपश्चिमाज्ञा देवीपृष्टदलंपूर्वाज्ञाइतिसिद्धांतः नवावरणपूजासुप्रारंभेदेवताग्रतः दूत्यादिवाक्येषुक्रमभंगोभवति अणिमापश्चिमे अनंगकु

रूपमार्च्चे इतिक्रमेस्यदेवतोग्रएवसमायातं तदाक्रमतंगोपवसेव अमंक्रनंगकुमावीत्या
तिरिक्तसर्वावरणेषुपश्चिमादिवामावर्त्तनेतिवदंति तत्रापिअग्रदलदारभ्येति व्याख्या अतोऽपिमा
याःदेव्याग्रभागेपूजनं अनेगकुसुमायाःपृष्टभागेपूजनमितिसाप्रदायिकाः तस्मान्महाविद्योपासना
यांदेव्याःपृष्टदलेप्रावी देव्यग्रदलंपश्चिमा अन्योपासनार्थंपूजापूजकयोरन्तरालंप्रावीतिव्या
ख्यं तत्राह देवस्यमुखमारभ्यदिशंप्रावीप्रकल्प्यतेरिति इतिप्रावीविधानं अत्रआयुधपूजा
देव्यास्तद्वुजस्थानेत्रिकोणाद्वहिरितिकेदिमतेपश्चिमादिचतुर्दिक्स्थितेनिसातंत्रेप्रतिपा
दनाद्दिक्त्यःदेव्यास्तद्वुजस्थानेकोर्थः वायव्यादीशानांतंकोणचतुष्टयेत्यर्थः अत्रैवस
मयेविमलाजयिन्योंतरालेनाथाः पूज्याइतिकामादिमतं अत्रैवसमयेआयुधपूजानंतरं
मित्यर्थः नित्यातंत्रेतुयथातथोक्तमधस्तात् ग्रहआयुधपूजानंतरं अंगदेव्योयष्टव्याइतिकेचि
त् अन्येतुमध्येदेवीमपिपूज्यांगदेवताःपूज्याइत्याहुः एदेव्याःशरीरएवादावंतेवापूज्याइत्य
एकरसंप्रदायः इहैवसमयेपूर्वोक्तःपंचदशानित्याःदेव्याशरीरेपूजयेदितिकामादिमतं आवर्य
पापूजांतःपूर्वमेवदेव्यास्तनोत्रिकोणत्रिरेखासुवाइतिनित्याकौलिनंत्रादिके अत्रसर्वत्रपाडुकांपूजया
मीत्यस्यपूर्वंश्रीगुरुंवुकिञ्चशक्तिगुरुंसंप्रदायादिछंतितिकेचित् काचिन्मतेदिमतेतुकामेश्वर्यादित्रि

कएवश्रीगुरुंदेवीगुरौतेयोसंप्रदायात् एवंमहात्रिपुरसुंदर्यांमहाछद्मश्रीगुरुयुगंदेवीगुरुंवद
यात् त्रिपुराद्यासुवक्त्रेश्वरीषुबीजद्वयंवक्त्रेश्वरीगुरुंवदद्यात् नवमवक्त्रेश्वर्यां२श्रीगुरुयुगंवक्त्रेश्व
रीगुरुंवदद्यात् इतिमनोरमाकारः अत्रसंहारक्रमेणपूजोक्ताः केचित्सृष्टिक्रमेणेतिसंप्रदायइत्यैतिष्ठ
न्ति नित्यार्चनेसृष्टिसंहारयोर्मध्येएकतमेनकार्यं नैमित्तिकार्चनंतुचतुरस्रादिंदुवक्त्रांतंचतुरस्रांत
मितिप्रतिलोमानुलोमतःकार्यमितिविशेषः अत्रचतुरस्रषोडशदलाष्टदलवक्त्राणिसंहारवक्त्राणि
चतुर्दशारबहिर्दशारांतर्दशारवक्त्राणिस्थितिवक्त्राणि अष्टारत्रिकोणबिंदुवक्त्राणिसृष्टिवक्त्राणि
इतित्रिधात्रिगुणात्मकश्चक्रसंकेतः अत्रसर्वत्रविशेषार्घ्यसंतर्पणमूलदेव्यास्तर्पणं समस्तावरणदेव
तातर्पणंश्रीपात्रामृतेनेति ततोमूलेनपुष्पांजलिंदत्वापूर्वोक्तैःषडंगमंत्रैर्देव्याःशरीरेअंगानिपूज
येत् अथफालिपिपूजा ततोभूतमंत्रैर्देव्याःशरीरेयजेदितितंत्रराजमंत्रं तद्यथा २अआएक
वटनपयणप्राणशक्तिपा०२ईईरवक्रठथफरसअग्निशक्तिपा०२उऊंओंगजडदबलईशा
त्मशक्तिपा०इतिभूतलिपिपूजा२ऋॠंओंपसटधफबसअंबुशक्तिपा०२ऌॡंअंः अपानमरुद्
त्मशक्तिपा० इतिभूतलिपिपूजा ततोआत्माक्षरैरेणपूजनंयेत् यथा ॐह्रींहंसःसोहंस्वाहा
आत्मशक्तिपा० अत्रआत्मपूजायांसप्ताक्षरीयोगोनास्ति आत्मनेनमः इतिप्रयोगः देवीमंत्रेस

प्रारंरी योगेनत्रात्मकंपूजयेत् इतिविंदौविशेषविंजलेनत्रयंजेत् इतिआत्मपूजा ततोअस्मिन्नेवस
मयेपंचपंचिकाविद्याभिपंचसिंहासनंयजेत् तदुक्तंदक्षिणामूर्तिसंहितायां श्रीविद्यावत्तथालक्ष्मी
महालक्ष्मीतथैवच त्रिशक्तिःसर्वसाम्राज्यलक्ष्मीःपंचप्रकीर्तिताः तत्रबिंदुचक्रेमध्यवायव्यईशा
नअग्निनैऋत्येषुतत्तन्मंत्रेणमध्यादिप्रादक्षिण्येनयेजेत् २ यथा २मूलंपंचदशीमुच्चार्यमहा
लक्ष्मीश्वरीहृदंमंडितासनसंस्थितासर्वसौभाग्यजननीश्रीमहात्रिपुरसुंदरीलक्ष्म्यंबा
श्रीपा० इतिमध्येसंपूज्यविंशोपार्घ्यामृतेनतर्पयेत् २श्रीमहालक्ष्मीश्वरीहृदंमंडितासनेसं
स्थितासर्वसौभाग्यजननीलक्ष्म्यंबाश्रीपा० वायव्यकोणे २ ॐश्रींह्रींकमलेकमलालयेप्रसीद
प्रसीदश्रींह्रींश्रीॐमहालक्ष्म्यैनमः महालक्ष्मीश्वरीहृदंमंडितासनसंस्थितासर्वसौभाग्यज
ननीमहालक्ष्म्यंबाश्रीपा० ईशान्ये २श्रींह्रींक्लींमहालक्ष्मीश्वरीहृं० त्रिशक्तिलक्ष्म्यंबाश्रीपा०
आग्नेये २श्रीसहकलह्रींमहालक्ष्मीश्वरिहृं० सांम्राज्यलक्ष्म्यंबाश्रीपा० नैऋत्ये २रत्नचतुष्ट
यंश्रीपात्रामृतेनतर्पयेत् इतिपंचलक्ष्मीः ततोमध्येवायव्यादिकोणचतुष्टयेपंचकोशाविद्याः
पूजयेत् श्रीविद्यावपैरंज्योतिःपरनिष्कलदेवताः अजपामातृकावेतिपंचकोशाःप्रकीर्तिताः
२ मूलंमहाकोशेश्वरीहृदंमंडितासनसंस्थितासर्वसौभाग्यजननीश्रीमहात्रिपुरसुंदरि

DR. BHAU DAJI MEMORIAL

कोशांबाश्रीपा० इतिविंशोपविंदुनामध्येपूजयेत् ॐह्रींहंसःसोहंस्वाहामहाकोशेश्वरीहृ० परंज्यो
तिकोशांबाश्रीपा० २ॐ महाकोशेश्वरीहृ० परनिष्कलकोशांबाश्रीपा० २ हंसःमहाकोशेश्वरीहृ०
अजपाकोशांबाश्रीपा० २समस्तमातृकाअ११महाकोशेश्वरीहृं० मातृकाकोशांबाश्रीपा० इतिपात्रा
मृतेन इतिपंचकोशाः ततोमध्येवायव्यादिकोणचतुष्टयेप्रादक्षिण्येनपंचकल्पलताःपूजयेत् श्री
विद्यापारिजातेश्रीपंचकामेश्वरीतथा पंचबाणेश्वरीबालापंचकल्पलताप्रिये २ मूलंमहाकल्पल
तेश्वरीहृंदमंडितासनसंस्थितासर्वसौभाग्यजननीश्रीमहात्रिपुरसुंदरिकल्पलतांबाश्रीपा० इ
तिविंशोपजलेन ओंह्रींह्रींॐसरस्वत्यैनमः महाकल्पलतेश्वरीहृं० पारिजातेश्वरिकल्पलतां
बाश्रीपा० २ह्रींक्लींऐंबूंस्त्रींमहाकल्पलतेश्वरीहृंदमंडिता० पंचकामेश्वरीकल्पलतांबाश्रीपा० २
द्रांद्रींक्लींब्लूंसःमहाकल्पलतेश्वरीहृं० पंचबाणेश्वरीकल्पलतांबाश्रीपा० २ क्लींऐंसोःमहाकल्पलते
श्वरिहृं० कुमारीकल्पलतांबाश्रीपा० श्रीपात्रामृतेनेति इतिपंचकल्पलताः ततोमध्येवायव्या
दिकोणचतुष्टयेपादक्षिण्येनपंचरत्नविद्याः प्रपूजयेत् श्रीविद्यासिद्धिविद्यामातंगीभुवनेश्वरी
बालाहीतिचसंपोक्ताः पंचरत्नप्रकीर्तिताः २मूलंमहारत्नेश्वरीहृंदमंडितासनसंस्थितासर्वसौभाग्य
जननीश्रीमहात्रिपुरसुंदरिरत्नांबाश्रीपाद० ॐह्रींश्रींक्लींनमोभगवतिमाहेश्वरिअन्नपूर्णेस्वाहा

रत्नेश्वरीवं० अन्नपूर्णारत्नोंबाश्रीपा० २ ऐंक्लीं सौः ऐंह्रीं श्रीं ॐ नमो भगवति मांतंगेश्वरि सर्वजनम
नोहरि सर्वराजवशंकरि सर्वमुखरंजनि सर्वस्त्रीपुरुषवशंकरी सर्वदुष्टप्रदुष्टवशंकरि सर्वलोकवशंक
रि ह्रीं श्रीं क्लीं ऐं महारत्नेश्वरीवं० मातंगेश्वरिरत्नोंबाश्रीपा० २ ह्रीं महारत्नेश्वरिवं० भुवनेश्वरिरत्नों
बाश्रीपा० २ ऐं ग्लौं ऐं नमो भगवति वाराहि वाराहि लिवाराहि वाराहि मुखि वाराहमुखि अंधे अं
धिनि नमः रुंधे रुंधिनि नमः जंभे जंभिनि नमः मोहे मोहिनि नमः स्तंभे स्तंभिनि नमः
सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुर्मुखगतिनिर्द्रावणं कुरु कुरु श्रीं घ्रीं वश्यं कुरु कुरु
ऐं ग्लौं ढः ढः ढः ढः हुं फट् स्वाहा महारत्नेश्वरीवं० वाराहीरत्नोंबाश्रीपा० इति श्रीपात्रामृतेन इति
पंचरत्नेश्वरी ततो मध्यवाय्यादिकोणचतुष्टये प्रादक्षिण्येन पंचकामदुघाः पूजयेत् २ श्रीवि
द्यासंजीवनीसुधाकरामृतेश्वरी अन्नपूर्णेति संप्रोक्ताः पंचकामदुघाप्रिये अत्रकल्पलता
नांतरं कामदुघाः पूज्याः पश्चात्तु रत्नदेवतेति मंतव्ये २ मूलं महाकामदुघेश्वरिवं० दमंडितासन सं
स्थितासर्वसौभाग्यजननीश्रीमहात्रिपुरसुंदरिकामदुघोंबाश्रीपा० विद्योद्यन्मूर्त्तिनेत्रमेत्र २ ह्रीं हंसः संजीवनीजूंजीवप्राणाग्रंथिस्थं कुरु सः स्वाहा महाकल्पदुघेश्वरीवं० अमृतसंजीवनि
कामदुघोंबाश्रीपा० २ वरवरवाग्वादिनि क्लीं क्लेश्वरिनि महाक्षोभं कुरु कुरु हूं क्रीं ॐ मोक्षं कुरु

राम
२१५

कुरु ह्रौं: महाकामदुघेश्वरीवं० सुधासूः कामदुघोंबाश्रीपा० २ ऐं पूं ह्रौं जूं सः अमृतेअमृतोद्भवेअमृतेश्वरि
अमृतवर्षिणिअमृतश्रावयश्रावय स्वाहा महाकामदुघेश्वरीवं० अमृतेश्वरिकामदुघोंबाश्रीपा० २ ह्रीं
सौः श्रीं क्लीं नमो भगवति अन्नपूर्णे मम सिलषितं अन्नं देहि स्वाहा महाकामदुघेश्वरीवं० दमंडितासन सं
स्थितासर्वसौभाग्यजननीअन्नपूर्णीकामदुघोंबाश्रीपा० इति श्रीपात्रामृतेन तर्पयेत् इति पंचकाम
दुघाः कल्पलतासुद्वितीयावरिनेतिनिस्थानेचं संहितायांतुयथोक्तं प्राक् एवंरत्नविद्यासंहि
तीयासिद्धलक्ष्मीसंहितायांमंत्रभेदव्यवस्थाज्ञेया इति पंचपंचिकापूजा अथपंचसिं
हासनेविद्याः बिंदावेवपूजयेत् यथा मूलमुच्चार्यउर्ध्वसिंहासनविद्याश्रीमत्त्रिपुरसुंदरीश्रीपा० ऐं क्लीं
सौः पूर्वसिंहासनविद्यात्रिपुरेश्वरीश्रीपा० २ ह्रीं ऐं क्लीं सौः १ २ क्लीं २ सौं सः क्लीं सौः ३ दक्षिणेसिंह
सनविद्यालालिताकामेश्वरीरक्तनेत्राश्रीपा० २ ह्रीं हंसः संजीवनीजूंजीवंप्राणाग्रंथिस्थं कुरु सः
स्वाहा २ वरवरवाग्वादिनि क्लीं क्लेक्लिन्ने क्लेदिनि महाक्षोभं कुरु कुरु ह्रौं: २ क्लीं क्लिन्ने ऐं क्लीं नित्यमदद्रवे ह्रीं ३ २
ह्रौं हंसकलह्रीं सौः उत्तरसिंहासनविद्यासंजीवनिमृत्युंजयावज्रप्रस्तारणित्रिपुरभैरवीश्रीपा० हंसैं
सकलह्रौं ४ पश्चिम ४ उत्तरसिंहासनविद्याडामरभैरवीश्रीपा० इति श्रीपात्रामृतेन तर्पयेत् इतिपंचसिं
हासनविद्यापूजा ५ स्त्रीस्त्रीश्रीसकलह्रीं पूर्वाम्नायेदुर्गाभगमालिनीदेवीश्रीपा० चतुर्दक्षात्रि

केबिंदौवा ॐऐंक्लीं नेंक्लीं नदइवेकुलेस्त्रौं: दक्षिणाम्नायेश्वरीभोगिनीदेवीश्रीपां० चतुर्दशा
दित्रिकेबिंदौवा ऐंह्रींश्रीं स्त्रेंह्रौं: नमोभगवतित्रैलोक्यकुब्जिकायैक्षौं क्ष्रीं हुं अघोरेअघोरेमुखिविच्चि
च्चिकिणिकिणिविच्चे त्रौं: स्त्रैं त्रौंश्रीं ह्रीं ऐंपश्चिमाम्नायेश्वरिकुब्जिकादेविश्रीपा० अष्टारा
दित्रिकेबिंदौवा २ स्त्रेंक्रैं महावेउयोगेश्वरिउत्तराम्नायेश्वरिकालिकादेवीश्रीपा० समष्टिवक्रे
बिंदौवा इतिश्रीपात्रामृतेनपूजयेत् इतिचतुराम्नायपूजा २त्रौं: अनुत्तराम्नायदेवतापरांबाश्री
पा० इतिविद्येषार्घ्यामृतेनाबिंदौपूजयेत् इति अनुत्तराम्नायपूजा अथविद्येश्वरूपांकामकलां
पूजयेत् तद्यथा बिंदौपंचदशाक्षरीरूपेपातांएकैकाक्षरलेयेनांनिमनुरीयस्वरावद्येषेणेश्वरस्व
रूपांप्रकाशशक्त्यात्मकपरमत्रिकोणगतविश्वरूपांप्रकाशमानांध्यात्वा २ ईंपरमसंवित्कला
श्रीमहात्रिपुरसुंदरिश्रीपा० इतिविद्येषार्घ्यामृतेनत्रीसंपूज्यसंतर्प्य तत्रैवाग्रेवामदक्षमध्ये
षुचरणचतुष्टयंपूजयेत् २ईंह्रैं ईंह्रीं: प्रकाशचरणश्रीपा० २ ह्रैंग्रेंरैं ईंह्रीं: सोहं विमर्शचरणश्री
पां० वामे ईंस४हंसैं: सोहं प्रकाशमर्शमंत्रीचरणश्रीपा० दक्षे २ईंतुरीयविद्याहंसः त्रिकः त्रौं: सो
हं निर्वाणचरणश्रीपा० मध्ये इतिविद्येषार्घ्यबिंदुनासंपूज्यतर्पयेत् इतिकामकलापूजा पूर्णाभिषेकं
कार्यनान्यैरिदाश्रवणात् अथऊर्ध्वाम्नायपूजांसंतर्प्यश्रीसुचरणेपूजनंकुर्यात् २ऐंह्रींश्रीं

बिंदुचक्रे २त्रौं: प्रासादपरांबाश्रीपा० २ त्रौं: परप्रासादपरांबाश्रीपा० इतिविद्येषार्घ्यामृतेनसंतर्प्यश्रीसु
चरणपूजनंकुर्यात् २ऐंह्रींश्रीत्रौं: त्रौं: ह५सच्चिदानंदज्योतिरहंप्रकाशचरणश्रीपा० २ऐंह्रींश्रीत्रौं:
त्रौं: ह५सच्चिदानंदज्योतिरहमेवविमर्शचरणश्रीपा० २ऐंह्रींश्रीह्रौं: त्रौं: स४सच्चिदानंदज्योति
रहमेवास्मिसोहंस्वप्रकाशपरिपूर्णपरापरविश्रांतिचरणश्रीपा० ऐंह्रींश्रीत्रौं: त्रौं: तुरीयविद्याॐ
सोहमसिअहमस्मिब्रह्माहमस्मिसोहंस्वप्रकाशपरिपूर्णपरापरमहाप्रकाशपरिपूर्णानंदना
थचरणश्रीपा० विद्येषार्घ्यामृतेनसंपूज्यतर्पयेत् इतिऊर्ध्वाम्नायपूजा इयंऊर्ध्वाम्नायोपा
सकैः कार्यानान्यैरिति ततोबिंदुचक्रेविद्येषार्घ्यामृतेनश्रीपादुकचरणंपूजयेत् तद्यथा ॐऐंह्रींश्री
त्रैंह्रौं: स्त्रूंऐंफें स्त्रूंत्रौं: त्रैंश्रींह्रीं ऐंॐपरेभ्यरानंदनाथशुक्लचरणश्रीपा० ॐऐंह्रींश्रीत्रैं
त्रौं: स्त्रूंऐंफें स्त्रूंत्रौं: त्रैंश्रींह्रीं ऐंॐपरेभ्यपरमेष्ठिनाथचरणश्रीपा० ॐऐंह्रींश्रीत्रैंत्रौं: स्त्रूं
ऐंफें स्त्रूंत्रौं: त्रैंश्रींह्रीं ऐंॐपरेश्वरपरेश्वरीमिश्रचरणश्रीपा० इयंश्रीपादुकादीक्षितैः कार्या
नान्यैः इतिश्रीपादुकचरणपूजा इयंआम्नायपूजांकृत्वासमयपूजांकुर्यात् बिंदौअग्रेवादक्षम
ध्येचतुःसमयदेवताःपूजयेत् यथा २पूर्वोक्तांकामेश्वरिनित्यामुद्यायेकामेश्वरीसमयदेवताश्री
पा० दक्षेत्रे २पूर्वोक्तवज्रेश्वरीनित्यामुद्यायेवज्रेश्वरीसमयदेवताश्रीपा० वामे पूर्वोक्तभगमालि

नित्यामुद्यार्यभगमालिनीसमयदेवीतर्पयेत् देवतात्रयंश्रीपा०दक्षे २मूलंश्रीमहात्रिपुरसुंदरिसमयदे
वताश्रीपा०मध्ये इतिविशेषार्घ्यान्तेन मूलदेवीतर्पयेत् देवतात्रयंश्रीपात्रामृतेन इतिवतुसमयपू
जा ततःषट्दर्शनानियजेत् यथा २ॐह्रींश्रींहुंफट्नारादेव्यधिष्ठितबौधदर्शनश्रीपा०त्रैलोक्य
मोहनचक्रेचतुरस्रे ॐभूर्भुवस्वःतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधीयोयोनःप्रचोदयात् गा
यत्र्यधिष्ठितवेदिकदर्शनश्रीपा०इतिषोडशदले २ॐह्रींहौंनमः दिवायरुद्रदेवताधिष्ठितशै
वदर्शनश्रीपा०इतिअष्टदले ॐह्रींघृणिःसूर्यादित्यःश्रीसूर्यदेवताधिष्ठितसौरदर्शनश्रीपा०
चतुर्द्वारे २ॐनमोनारायणायविष्णुदेवताधिष्ठितवैष्णवदर्शनश्रीपा०दशारद्वये ह्रींभुवने
श्वरीदेवताधिष्ठितशाक्तदर्शनश्रीपा०नवयोनिचक्रे इतिश्रीपात्रबिंदुभिस्तर्पयेत् इतिदर्शनद
त्तावामकेश्वरतंत्रानुसारात् नित्यातंत्रेतुशैवशाक्तब्राह्मवैष्णवसौरबौधानीतिदर्शनक्रमः इति
दर्शनपूजा ततः २मूलंसमस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यपरापररहस्यअति
रहस्ययोगिनीहृदयसहितश्रीचक्रगतसमस्तदेवताःपादुकाःपूजितास्तर्पिताःसंतुष्टाःसंतुनमः इति
पुष्पांजलिंनिक्षिप्यश्रीचक्राद्बहिःइंद्रादयो वज्रितारूपाःपूज्याः यथा २लेइंद्रशक्तिभ्योनमः २
रंअग्निशक्तिभ्योनमः २यंयमशक्तिभ्योनमः २क्षंनिर्ऋतिशक्तिभ्योनमः २वंवरुणशक्तिभ्योनमः २यं

वायुशक्तिभ्योनमः २सेसोमशक्तिभ्योनमः २हंईशानशक्तिभ्यःईशानयोर्मध्येऽनंतशक्तिभ्यः
ओंब्रह्मशक्तिभ्योनमः निर्ऋतिवरुणयोर्मध्ये २ह्रींअनंतशक्तिभ्योनमः इतिपूर्वादिदशादिक्षुसंपूज्य॥
इतिदिक्पालपूजा ततइंद्रादीनांसमीपेतदस्त्राणिपूजयेत् यथा वज्रशक्तिभ्योनमः २शक्तिश
क्तिभ्योनमः २दंडशक्तिभ्योनमः २खड्गशक्तिभ्योनमः २पाशशक्तिभ्योनमः २अंकुशशक्तिभ्योनमः २गदाश
क्तिभ्योनमः २त्रिशूलशक्तिभ्योनमः २पद्मशक्तिभ्योनमः २ऊर्ध्वचक्रशक्तिभ्योनमः २अधः इतिसंपूज्यश्री
पात्रबिंदुभिस्तर्पयेत् इतिअस्त्रपूजा इतिलोकपालावरणं पुनर्मूलेनमूलदेवीसंपूज्यसंतर्प्यसम
स्तचक्रेश्वरीमूलेनगंधादिदिपोत्तेरुपचारैरुपचर्यप्राग्वन्नैवेद्यंनिवेद्यमूलदेवीधाजपित्वासमर्प्य
योनिमुद्रयाप्रणमेत् नित्यहोमंकुर्यात् ततुक्तशारदातिलके एवंसंपूज्यविधिवन्नैवेद्यांतेत
तोगुरुः दक्षिणेस्थंडिलंकृत्वातत्राधायहुताशनं संस्कृत्यविधिवद्विद्वान्वैश्वदेवंसमाचरेत्
दक्षिणेपूजास्थानादक्षिणस्यांदिशिस्थरसेवादेवीदक्षभागेवेतिनैवेद्यांतेनित्यहोमहुतिदक्षि
णामूर्तिस्थानार्पणप्रपंचसादशारदातिलकदीनांमतं तंत्रराजेतुजपांतेनित्यहोमः वामकेश्वरतंत्र
षट्शतीमतयोर्विसर्जनांतेनित्यहोमइति नमस्कृत्यविसर्ज्यथथोक्तफलसाधकः जुहु
याद्विधिवद्विधिज्ञोदशांशेनसमाहितमिति दशांशेननित्यजपदशांशेन तंत्रोक्तरेतुमूलेन

षोऽग्नाहुतीरावरणानांएकैकाहुतिरिति भुजंगवल्यां ज्ञानार्णवनित्यासंहितयोस्तंवृप्रा
णमंत्रैःपंचाहुतिरिति तंत्रराजेषोऽग्नाहुतिरिति अत्रनित्यहोमाकारणाशक्तौनित्यहोमसंख्या
द्विगुणांजपंकुर्यादिति तत्रपूजामंडलस्यईशानभागेगोमयोपलिप्तायांभूमौसलक्षणंकुंडं अ
थवाचतुरंगुलोच्चंवाअंगुष्ठपर्वोच्चंवाअंगुष्ठतलमात्रोच्चंवालुकागौरमृत्तिकाशालितंडुलचूर्णगो
धूमचूर्णान्यतमानिर्मितस्थंडिलंहस्तमात्रायामविस्तारंवायथेष्टप्रमाणंवेदिकांवाचक्रघ
टितमृन्मयीलोहमय्यन्यतमांशाकटीवाबुलीवायथाशक्तीहोमस्थानंविधायतत्रप्राङ्मुखस्था
सनेसमुपविश्यहोमंकुर्यात् यथा तत्रादौगुरुवादेनपूर्वकंमूलेनप्राणायामंविधायमूलवि
द्ययाःऋष्यादिकरषडंगन्यासकरशुद्धिंचतुरासनषडंगयुक्तिंवादेवतान्यासान्विधायमूले
नाग्निमंत्रंध्येनुमुद्यामतीत्यनेनजलेनमूलेनकुंडेकुंडादिकंप्रोक्ष्य कुंडादौमूलविद्यांदि
निनित्यांविद्यामुच्चार्यप्रागग्रायांउदग्ग्राश्चतश्रश्चतस्रोरेखाःकुशामूलेनविलिख्यपुनर्मूले
नकुंडेःप्रोक्ष्यमन्मयादिपात्रेवह्निमानीय २ क्रव्यादेभ्योहुंफट्स्वाहाग्निमंत्रेणपात्रव्यादांशमेकमंगा
रंनैर्ऋत्यादित्रिपरित्यज्यअवशिष्टदेवांशंमूलेनाग्निमंत्रंध्येनुद्यामतीत्यमध्येकोष्टेवह्निं
स्थापयेत् ततस्तदुपरिशुष्ककाष्टानिविन्यसेत्यमूलविद्यांदिनिनित्यांविद्यांवोच्चरन्मुखेनफु

त्कृत्यैवमंत्रैःप्राज्वालयेत् ततोव्यजनादिनाअनलंपटुकृत्य २ अग्निंप्रज्वलितंवदेज्ञातवेदहुता
शानं सप्तवर्णंवर्णमननंसमिधंसर्वतोमुखं इत्यनेनप्रणमेत् वह्नारिश्वेत्यस्यमंत्रस्यगौत
मऋषिः अग्निर्देवतात्रिष्टुप्छंदः अग्निमूर्त्तिध्यानेविनियोगः ॐवह्नारिश्वेतिमंत्रस्यो अस्यपा
रादेशीर्षसप्तहस्तासोअस्य त्रिधाबद्धोवृषभोरोरवितिमहादेवोमर्त्यांआविवेशेति अग्निंध्या
त्वा सप्तजिह्वामुद्रांप्रदर्श्य ततोमूलविद्ययादिनित्यांविद्ययावह्निंत्रीःपरिषिंच्यउदग्रेःप्राग
ग्रेश्चदर्भैरीशानादिशानपर्यंतंप्रादक्षिण्येनपरिस्तीर्य अग्निमंत्रस्यभृगुऋषिः गायत्रीछंदः
अग्निर्देवता अग्निपूजनेविनियोगः ॐभूर्भुवस्वःहृदयायनमः अग्निर्जातवेदसिरसेस्वाहा
रुहावहशिखायैवषट् सर्वकर्माणिकवचायहुं साधयनेत्रत्रयायवौषट् स्वाहाअस्त्रायफ
ट् अंसप्तरूपवर्णमालमरुणस्रक्वदनालंरक्तं ज्वालोपुंजजटाकपालविलसन्मौलिंस
शुक्लांशुकं शक्तिंस्रुक्स्रुवदर्भमुष्टिकजपाक्षस्रक्करुक्रयाक्षीवरान्दोर्भिर्बिभ्रतमंबिकांत्रि
नयनंरक्तांगमग्निंभजे अस्यार्थः स्कंधस्थितहेममालाधारयंतं आरक्तपुष्पवदनैरलंकृतं
ज्वालापुंजरूपजटाभिःरक्तमुकुटं श्वेतोदरंधारयंतं त्रिनेत्रं एवमग्निंध्यात्वा २ अग्नेत्वंसुहो
गच्छागच्छेत्यावाह्य २ अष्टभुजेरक्तभुजैःशक्तिंदर्भमुष्टिंस्रुवेअक्षयेदधानं वामभुजैःस्रुक्स्रुवकारमाबुध

Digitized by Siddhanta eGangotri Gyaan

आवाहनादिमुद्राःप्रदर्श्य विज्योतिषस्यमंत्रस्यदत्राऋषिः अग्निर्देवता त्रिष्टुप्छंदः अग्नि
सन्मुखीकरणेविनियोगः विज्योतिषारहनाभात्यग्निराविर्विश्वानिकृणुतेमहित्वा प्रादेवीर्मा
यासहलेदुरेवासीसीतेश्रंगोरक्षसेविनिक्षेएषहिदेवः प्रदिशोनुसर्वाःपूर्वीहिजातःसउगर्भे
अंतः सविजायमाणः सजनिष्यमाणः प्रत्येंमुखास्तिष्ठतुविश्वतोमुखः सन्मुखोभव
इत्यग्निंसन्मुखीकृत्य ॐभूर्भुवस्वः अग्निर्जातवेदइहावहसर्वकर्माणिसाधयस्वाहा अ
ग्निपादुकांपूजयामिनमः इतिपुष्पांजलिंदत्वा अग्नयेआवाहनंकल्पयामिनमः इत्यासनंद
त्वा विश्वानिनोइतिनिसप्तांआग्नेयोवसुश्रुतऋषिः अग्निर्देवतात्रिष्टुप्छंदः अग्निअ
लंकरणेविनियोगः विश्वानिनोदुर्गहाजातवेदसिंधुंननावादुरितातिपर्षि अग्नेअत्रिव
न्मनसागृणानोअस्माकंबोध्यविताततनूनां।यस्त्वाहृदाकीरिणामन्यमानोमर्त्यंमर्त्यजोहवीमि जातवे
दोयशोअस्मासुधेहिप्रजाभिरग्नेअमृतत्वमश्याः। इत्यष्टपोदेरष्टदिक्षुपूर्वादिप्रादक्षिण्येनसंपूज्यप्रार्थयेत्
यस्मेत्वंसुकृतेजातवेदउलोकमग्नेकृणवःस्योनं।अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिंनशतेस्वस्ति।
इतिकरसंपुटंप्रार्थ्य ॐभूर्भुवःस्वःअग्निर्जातवेदइहावह।सर्वकर्माणिसाधयस्वाहा।इत्यग्निमंत्रेणगं
धपुष्पैर्नैवेद्यांतैरुपचारैरग्निमभ्यर्च्यतत्परितोअष्टदलेषुअग्नाप्रादक्षिण्येनपरिवारपूजांकुर्यात्।ॐ

DR. BHAU DAJI MEMORIAL डॉक्टर भाऊदाजीद्वारास्थापितम्

जातवेदसेनमः।सप्तजिह्वायनमः ॐहव्यवाहनायनमः।ॐअश्वोदरायनमः।ॐवैश्वानराय
नमः।ॐकौमारतेजसेनमः।ॐविश्वतोमुखायनमः।ॐदेवमुखायनमः।इतिसंपूज्यतत्परितो
पूर्वादिसप्तकोष्टेषुप्रादक्षिण्येनसप्तजिह्वांपूजयेत्।२।हिरण्यायेनमः।कनकायेनमः२रक्तायै
नमः।२कृष्णायै२सुप्रभायै२अतिरक्तायै२बहुरूपायै।पुनरग्निंअग्निमंत्रेणसंपूज्यआज्य
मानीयमूलेनार्घ्यादकेनप्रोक्ष्यवमितिधेनुमुद्रयाअमृतीकृत्यमूलेनत्रिवारमभिमंत्र्यॐ
भूर्भुवःस्वःअग्निर्जातवेदइहावहसर्वकर्माणिसाधयस्वाहा।इत्यग्निमंत्रमुच्चार्यआज्याकुति
त्रयंअग्निमुखेकृत्वाअग्नयइदंनमइतिपठित्वा।ततःहिरण्यायेस्वाहाइतिसप्तजिह्वाना
सप्ताकुतिंकृत्वायोनिमुद्रयाप्रणमेत्।ततोवह्नेर्देवीमावाह्यसाधारणंध्यात्वामूलेनपुष्पां
जलिंनिक्षिप्यपंचोपचारैरभ्यर्च्यावह्निदेवतयोरैक्यंविभाव्यमित्यहोमद्रव्यंमूलेनार्घ्योदके
नप्रोक्ष्यप्रश्नोणसंरक्ष्यकवचेनावगुण्यमूलेनसंवीक्ष्यइतिचतुःसंस्कारैःसंस्कृत्यवमिति
धेनुमुद्रयाअमृतीकृत्यमूलेनाष्टधाराभिमंत्रतेनद्रव्येणपंचायतनीचेत्।गणेशविष्णुसू
र्यशिवेभ्यस्तत्तन्मंत्रेणप्रत्येकमाकृतित्रयंएकांवाकृत्वामूलदेवेमूलंस्वाहा।श्रीमहात्रिपुरा
सुंदर्यैइदंनममइतिषोडशाकृतिंकृत्वापूजाक्रमेणप्रत्येकंपरिवारदेवताभ्योएकैकामाकृतिंकृ

हुयात् अथवा समस्तावरणदेवताप्रीत्यर्थं समष्टिमंत्रेण स्वाहांतेन आहुतित्रयं जुहुयात् ततो ॐ भूः स्वाहा अग्नये इदं न मम ॐ भुवः स्वाहा वायवे इदं न मम ॐ स्वः स्वाहा सूर्याय इदं न मम ॐ भूर्भुवस्वः स्वाहा प्रजापतये इदं न मम इत्येकैकां आहुतिं हुत्वा ततो हृतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यां उदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा। इत्याकुतिमेकां जुहुयात्। ततो वोषडंतया मूलविद्यया द्वात्रिंशं जुहुयात्। इति पूर्णाहुतिः ततो प्रधानहोमसमसंख्यं जपित्वा। गुह्यातिगुह्यगोप्त्रीत्यनेन दैव्या हस्तेजपंनिवेद्य योनिमुद्रया प्रणमेत्। नित्यहोमद्रव्याणि तु। घृतान्नपायसतिलतंडुलतदुभयं रक्तपुष्पाणि सुगंधपुष्पाणि किंशुकपुष्पाणि बिल्वदलानि एषु द्रव्येषु अन्यतमेन त्रिमधुयुक्तेन होमः कार्यः। ततो मूलविद्यया देवीं संपूज्य स्कंदं वा प्रणम्य वह्निसकाशात् संहारचक्रं यावद्विसृज्य भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक कर्मांतरेपि संप्राप्ते सांनिध्यं गुरुसादरं। इति वह्निं प्रार्थ्य संहारमुद्रया गच्छ गच्छ परस्थानं स्वस्थानं परमेश्वरि यत्र ब्रह्मादयः सर्वे करास्तिष्ठंति मे हृदि इत्यग्निं स्वात्मनि संहृत्य ततो विभूतिधारणं कुर्यात्। मूलमंत्रेण मानस्तोक इत्यस्य मंत्रस्य कुत्सऋषिः। ऋग्वेदे दृतीयमंडले महाव्रते ब्रह्मणाच्छंसिशस्त्रे त्रिष्टुप्छंदः। विभूतिधारणे विनि०। मानस्तोके तनये मान आयौ मानो गोषु मानो अश्वेषु

रीरिषः वीरान्मानो रुद्रभामितोवधीर्हविष्मंतो नमसा विधेमते सदमित्त्वा हवामहे आयुषं जमदग्नेः कश्यपस्य त्रियायुषं अगस्त्यस्य त्रियायुषं यद्देवानां त्रियायुषं तन्मेअस्तु त्रियायुषं सातायुषं ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्

वषट् सर्वकर्माणि कवचायहुं साधय नेत्रत्रयाय वौषट् स्वाहा अस्त्रायफट् आसासक्त सुवर्णमाले
मरुणास्त्रकृत्संदनालंकृतं ज्वालापुष्पसजटाकलापविलसन्मौलिं सश्मश्रुकांशुकं वह्निं स्वस्तिकपीठदर्भ
मुष्टिकजपाक्षसूत्रकुक्कावाक्षीवरान् दोर्भिर्बिभ्राणमंबिकंत्रिनयनंरक्ताभमग्निं भजे इतिध्यात्वा।।
विद्यातृतीयखंडादिनित्याभ्यो वह्निं परिषिंच्य कुशैः परिस्तीर्य ॐ भूर्भुवस्वः अग्निर्जातवेद इहावह
सर्वकर्माणि साधय स्वाहा इत्यग्निमंत्रेणअग्निपात्रेः संपूज्यतत्परितः पूर्वादिप्रादक्षिण्येन सप्त
जिह्वाः पूजयेत् हिरण्यपाउकांपूजयामि २ कनकपा०२ रक्तापा०२ कृष्णापा०२ सुप्रभापा०२ बहुरूपा०
२ अतिरक्तापा०२ इतिसंपूज्य ॐ भूर्भुवस्वः अग्निर्जातवेद इहावह सर्वकर्माणि साधय स्वाहा
अग्नयइदंनममा इत्याज्याहुतित्रयंहुत्वातत्परितःहिरण्यायेस्वाहा इतिसप्तजिह्वाहुनिंहुत्वापुनः
अग्निमंत्रेणअग्निपाउकांपूजयामि इतिवह्निकुंडेपुष्पांजलिंदत्वाप्रणम्यवह्नेदेवीमावाह्यआवाह
नादिमुद्राः प्रदर्श्यमूलेनपंचोपचारैः संपूज्य आज्यादिकंविद्यातृतीयखंडादिनानित्याभ्यांप्रो
क्ष्यमूलेनत्रिधाभिमंत्र्यमूलंस्वाहाश्रीमहात्रिपुरसुंदर्यैइदंनममा इतिस्वाहान्तेनमूलेनषोडशा राम
वारंहुत्वासमस्तपक्वेतिसमष्टिमंत्रेणस्वाहान्तेनत्रिवारंहुत्वादद्येमूलेनपुष्पांजलिंदत्वाहुतसमं सप्तरत्नं १२९
मसंस्थंजपित्वासमर्प्ययोनिमुद्रयाप्रणम्यतत्र ऋष्यादिषडंगंविधायदेवीं यथास्थानेविन्य

ज्यंजेत् क्रोधोवह्निमहाराक्षसेसर्वकर्मसाधक कर्मांतरेसप्रोक्षेसान्निध्यंकुरुसादरं इतिव
ह्निं प्रार्थ्यसंहारमुद्रयास्वात्मन्युद्वास्यनमस्कुर्यात् इतिनित्यहोमः मणिबंधस्थितौकृत्वा
प्रसृतौजिह्मिकौकरौ कनिष्ठांगुष्ठयुगलेमिलितौतः प्रसारयेत् सप्तजिह्वारूपमुद्रेयंदेव्यानरपि
येकरी इतिसप्तजिह्वमुद्रा इतिसर्वतंत्रसंमतोहोमः कादिमतेतु कुंडेवास्थंडिलेवाविद्यातृतीय
खंडादिनित्याभ्यांअर्घ्यंविनाकुशैरास्तृत्यकुशामूलेनप्रागग्रउदगग्राश्चतस्रश्चतस्रोरेखाः कृत्वा
तत्रनवमेमध्येकोष्ठेतृतीयखंडादिनित्याभ्यांपरिषिंच्यकुशैः परिस्तीर्यतत्रैववह्निंसंपूज्यवह्नेर्दे
वीश्चक्रमानीयमूलेनसंपूज्यविद्यातृतीयादिनित्याभ्यांतज्जिह्वास्मरणपूर्वकंसप्तवारंहुतिंजुहुयात्
ततःपूजाक्रमेणसर्वाभरणदेवताभ्योहुत्वादद्येषोडशवारंहुत्वापूजयित्वाहुतसमंसप्तरत्नं
जपित्वादेवींबिंदुगेधाभिसयोजयेत् इतिकादिमतोक्तहोमः नित्यातंत्रसहितेयोक्तपूर्व
वद्देवीस्थापयित्वापूज्यमूलेनाहुतीः पंचहुत्वाषडंगमंत्रैः षडाहुतिर्दद्यादितिनित्यहोमः अ
थदेव्याः पार्श्वदेवीभ्योकुरुकुल्लादिभ्योबलिंदद्यात् तत्रादौकुरुकुल्लाबलिः तत्रदेव्यग्रेकिंचित्त्व
वामेभूमौवंदनादिनाचतुरस्रंरत्नत्रिकोणमंडलंकृत्वा ॐ कुरुकुल्लेस्वाहा इतिसप्तार्णमंत्रेण

अनयैवदिशीयपात्रेदद्यात् कुरुकुल्लायाः ॐकुरुकुल्ले ह्रींममसर्वजनंवशमानयह्रींस्वाहा ×
×नयैवदक्षीयपात्रेदद्यात् अथएकस्मिन्पात्रेमंत्रत्रयमुच्चार्यकुरुपुत्रेएषतेबलिर्नमइतिदक्षि×

संउलंसंपूज्य तत्रसाधारंसान्नव्यंजनंबुपूर्णंसगंधपुष्पंपात्रंसंस्थाप्यएवंमंउलत्रयेणपात्रत्रयंस्व
वामादिक्रमेणसंस्थाप्यएकंवापात्रंसंस्थाप्यातत्रद्विषार्घ्यंविंदूंदत्वाकुरुकुल्लायाः बलिंदद्या
यनमःइतिसंपूज्य तत्रकुरुकुल्लायाः ॐकुरुकुल्लेह्रीःस्वाहाइतित्रयोदशार्णमंत्रेणावाह्यआ
कर्षनादिमुद्राःप्रदर्श्यविकीर्णकुंतलारक्तांरक्तमानंदविग्रहांदधानांवीक्षयंतंवामपार्श्वस्थ
णिःकरैःइतिध्यात्वा बालाबीजत्रयषडंगेनसंकल्पीकृत्य कुरुकुल्लायाः कुरुकुल्लेह्रींममसर्व
जनंवशमानयह्रींस्वाहाइतिपंचविंशार्णमंत्रेणपुष्पांजलिंदत्वा ह्रींश्रीं ॐकुरुकुल्लेस्वाहा
ह्रींकुरुकुल्लेएषतेबलिर्नमः इतिदक्षिणहस्तोधृतविशेषार्घ्यजलधारांवामकरांगुलिभिः
सहप्रथमपात्रेदद्यात् ॐ२ कुरुकुल्लाया ॐकुरुकुल्लेह्रीः स्वाहाहंसोधृतविशेषार्घ्यजलधारां
वामकरांगुलिभिःसहदद्यात् नारावमुद्रांप्रदर्श्यपंचविंशार्णमूलविद्ययापुष्पांजलिंदत्वा॥
तत्रकासहिन्योनिमुद्रयाप्रणमेत्। इतिकुरुकुल्लाबलिः तेनोकुरुदेव्यग्रेकुरुकुल्लादक्षेत्रिको
णवृत्तचतुरस्रंमंउलंकृत्वा तत्रवाराहिबलिमंउलायनमः इतिसंपूज्य तत्रसाधारंसा
न्नव्यंजनांबुपूर्णपात्रंनिधाय तत्रऐंनमोभगवतिवाराह्यै नमः इतिमंत्रेणावा
ह्याभावाहनादिमुद्राःप्रदर्श्यमूलेपुष्पांजलिंदत्वा ऐंनमोभगवतिवातालिवाराहिवाराहि

मुखीअंधेअंधिन्येनमःरुंधेरुंधिन्येनमःजंभेजंभिन्येनमःमोहेमोहिन्येनमःस्तं
भेस्तंभिन्येनमःसमुकंस्तंभयस्तंभयसर्वदुष्टप्रदुष्टानांमर्वेषांसर्वेजिह्वांस्तंभंकुरुकुरुशीघ्रंवश्यं
कुरुकुरुऐंक्लोंठंठंफट्स्वाहाश्रीवाराहिएषतेबलिर्नमः इतिविशेषार्घ्यंजलधारांवामकरांगुलि
भिर्बलिभिबलिपात्रंदत्वा नारावमुद्रांप्रदर्श्ययोनिमुद्रयाप्रणमेत्॥जयंवारामंत्राः तंत्रराजोक्ताःपंच
चिकायासहितोक्तोलिखितोस्ति॥इतिवाराहिबलिः॥श्रीचक्रस्यईशानभागेप्रबोधदेवनचंदनादिना
त्रिकोणवृत्तचतुरस्रात्मकंमंउलंकृत्वाऐंह्रींव्यापकमंउलायनमः इतिमंउलंसंपूज्यतत्रसान्नव्यंजनांबु
पूर्णंसाधारंपात्रंसंस्थाप्यतत्रबाबुकायनमः इतिमंत्रेणावाह्य बांबीबुबैबौबइतिषडंगेनसकलीकृत्य
कपोतयोनिमुद्रेप्रदर्श्यबांबटुकायनमः इतिपुष्पांजलिंदत्वा २ रौंहिरेविपुत्रबटुकनाथकपिलजटा
भारभास्वरत्रिनेत्रज्वालमुखसर्वविघ्नान्नाशयनाशयसर्वोपचारसहितंबलिंगृह्णगृह्णस्वा
हाबटुकएषतेबलिर्नमः इतिदक्षहस्तोधृतश्रीपात्रोदकधारांवामांगुष्ठानामिकाभ्यांसहबलि
पात्रेदद्यात्मूलेनावमुद्रांप्रदर्श्य पुष्पांजलिमादायबलिदानेननसंतुष्टोबटुकःसर्वसिद्धिदः शां
णंजपंकुर्यात् अत्रापियथाशक्तिन्यासपूजाविधायजपेत् तर्पणमार्जनादिकमपिकुर्यात् अ
न्यःपर्यायमाह सप्तिसप्तयोगेनमातृकोसंपुटंमनुं शतावर्त्तनमात्रेणमासिसिध्योषधेन
नुः ऋमोक्षममातृकासंपुटितंमंत्रंप्रतिदिनमष्टोत्तरशतंजपेत् आद्येत्यादिअमुकमंत्र
सिद्धिकामः ऋमोक्षममातृकासंपुटितस्याऽमुकमंत्रस्यमासमात्रंप्रतिदिनमष्टोत्तरशतं
जपेन्महंकरिष्येइतिसंकल्प्य होमतर्पणादिकंप्रतिदिनमेतावदंशेनकुर्यात् तर्पणां
तरमाह मंत्रीतुप्रजपन्मंत्रंभूतलीप्यासंपुटं ऋमोक्षमशतावर्त्तिमासमात्रेणसिध्यति॥
तथाचकुलप्रकाशतंत्रे मंत्रंजपेन्महारविभूतलिप्यर्णसंपुटं ऋमोक्षमासहस्रंतुतस्य
सिध्योषधेन्मनुः पूर्ववत्संकल्पंकृत्वाभूतलिपिसंपुटितंमंत्रंमासमात्रंजपेत् सर्वंपूर्ववत्॥
अन्यच्च रात्रौत्रिकालपूजनंकुर्यात् आद्येत्यादिअमुकमंत्रसिद्धिकामः रात्रौत्रिकालपूज
नमहंकरिष्येइतिसंकल्पः इदंत्रिकालपूजनंकुर्वंदिनकार्यंअन्यत्रमातृकावर्णौषधिनि
र्मितवर्णसंख्यागुटिकानांधारणंविलेपनेकथनेपूजावसानेस्नाननद्यस्नधारणंतत्कृषय

स्नानेन पंचाशद्दोषधान्युच्यते चंदनागरुकर्पूरोशीरगोजलघुसृणकंकोलजातीमांसीमु
स्तोरग्रंथिरोचनानागपत्राः पिप्पलबिल्वगुहारुणतृणकलशीकाहकुंकुमीवंदिन्यः सो दुंब
रिकाद्विमिरिकास्थिराकंदरपुष्पकामपूरशिरवा १ प्लक्षोग्निमंथसिंहीकुशाकंदर्शाश्वत्थकृष्ण
रत्पुष्पी रोहिणीदुष्कृहनीपाटलिवित्रातुलस्यपामार्गा शतमत्वलताद्विरेफेविष्णुक्रांतामु
शल्यंबुजलिनी दूर्वाश्रीदेवीसहदेवीलक्ष्मीसदाभद्रे इतिओषध्य अपरश्च भूर्जपत्रेगोरोच
नागंधाभ्यांअष्टदलंपद्मंनिर्मायकर्णिकायांसाधकानामवर्णाविदर्भितंमंत्रंविलिख्य आद्य
तंसकलंनामपदंबहिर्विलिख्यपत्रेषुस्वरान्दिशाअग्न्यादिप्रादक्षिण्येनविलिख्यपवित्रतंतु
नासंवेष्यमधुरत्रयपूरितस्वपूर्णपात्रेतन्निक्षिप्यक्षीरपूरितेनवीनेकुंभेतत्पात्रंनिक्षिप्य
ॐआधेत्यादिअमुकमंत्रसिद्धिकामःमंत्रसाधकयोरेकःसिध्यर्थंअष्टोत्तरसहस्रंजप
महंकरित्वे अष्टोत्तरशतंत्रिमधुरैर्होममहंकरित्वेतिसंकल्प्य जप्त्वा दुग्धाज्याक्तांतिलां
कुंभेसपातंनिक्षिप्यहोमांतेतंकुंभंजलाशयेनिक्षिपेत् श्रीगुरुंब्राह्मणांश्चगंधादिभिःसंपू
ज्य अन्नादिभिस्तोषयेत् पुनस्तावत्प्रजप्त्वातैस्तत्सिद्धोभवेत्स्वं पुनश्चानुष्ठितोमं
त्रोयदिसिद्धोनजायते यदिमंत्रोनसिध्यति मंत्रसाधकयोरेकंभवति एवंविधैःपुरश्चर

उपायस्तत्र कर्तव्याः सप्तत्रोंकरभाषिताः द्रावणंरोधनंचैव वश्यपीडनंपोषशोषणेदाहनंतथा
मनःकुर्यात् ततःसिद्धोपवेधवं तत्रद्रावणं वरुणबजग्रथितंमंत्रंकर्पूरकुंकुममनः शि
लागोरोचनाउशीरैर्भूर्जेविलिख्यदुग्धमधुघृतजलमेकीकृत्यकृतन्मध्येनिक्षिप्यपूजाहो
मानुकुर्यात् अथरोधनं नागपत्रपुटितंमंत्रंअष्टोत्तरशतंजपेत् अथवशीकरणं भूर्जपत्रेचं
दनदारुहरिद्राकस्तूरीनैमनःशिलाकिःमंत्रमालिख्यकंठेधारयेदिति अथपीडनं अधरोत्तर
भावेनप्रतिलोमानुलोमेनमंत्रंप्रजपदेवतामपिध्यात्वाअर्कदुग्धेनभूर्जेमंत्रमालिख्यापादेना
क्रम्यधैअधरोत्तरक्रमपठितमंत्रेणअष्टोत्तरशतंहोमंकुर्यात् अथशोषणं बालातृतीयबीज
पुटितंमंत्रंगव्यदुग्धमधुघृतैर्विलिख्यहस्तेधारयेत् अथशोषणेऽपत्यभस्मनावायुबीजं
विदर्भितंमंत्रंभूर्जेविलिख्यकंठेधारयेत् अथदाहनं पलाशतैलेनक्लिबीजसंपुटितंमं
त्रंस्यकेकाक्षरंभूर्जेविलिख्यप्रतिवर्णंअधश्चोर्ध्ववह्निबीजंमालिख्यकंठेधारयेदिति एष
संस्कारेषुअनुरूपजपहोमसंख्यायांअष्टोत्तरशतं सर्वेषुआवरपूजाहोमादिकंकृत्वायेके
कंदिनेधारयेदिति शोषणसंस्कारेवायुबीजविदर्भितंमंत्रेतिरेदित्युक्तंतत्रविदर्भिमाह
मंत्रार्णंहृन्मध्यस्थंवायुबीजंसमालिखेत् विदर्भणंविद्वेषः तदुक्तंतंत्रराजे आदौयोगो

मवेदन्नैपल्लवःसंपुटोद्वयोः एकांतरंयथनंविदर्भो द्योतरीतनः अथमंत्राणोदशासंस्कारान्व
ह नदुक्तंशारदानिलके जननंजीवनंपश्चाताउनंबोधनंतथा अथाभिषेकोविमलीकर
णाप्यायनेपुनः तर्पणंदीपनंगुप्तिदशैतेमंत्रसक्रियाः दशासंस्काराःमंत्रसिध्यैहिलुप्तानां
तत्रजननमाह मंत्राणांमातृकामध्यादुधारोजननंस्मृतं फूर्जीदौकुंकुमादीनामातृ
कामलंसमालिख्ययथाविधिमातृकांसंपूज्यक्रमेणमंत्रानूत्समुध्यनेनैवडव्येणएथक्
लिखेत् एतन्मंत्रस्यजन्म जीवनमाह प्रणवांतरितान्रूत्वामंत्रवर्णान्जपेत्सुधीः ए
तज्जीवनमित्याहुमंत्रतंत्रविशारदाः प्रणवंततोमंत्रार्णमेकंपुनः प्रणवंपुनर्मंत्रार्णमेकंपु
नःप्रणवंअनेनप्रकारेणमंत्रांतरितान्त्वएवमष्टोत्तरशतसंख्यायामंत्रंजपेःकार्यः मंत्रजी
वनमेतत् यथा ॐ ॐ ॐनऽॐमः ॐह्रीॐवाॐयॐइति अस्यसंस्कारस्यजीवनं
रक्षिणास्याःवंदंति बीजनेकाश्मीराःवदंति ताउनमाह मंत्रवर्णान्समालिख्यताउर्ध्व
ऊर्ध्वनांभसा प्रत्येकंवायुनामंत्रीताउनंतदुदाहृतं फूर्जीपीठदौकुंकुमगोरोचनादिद्रव्येण
मंत्रंविलिख्यवंदनवारिणायमिनिवायुबीजमुच्चरन्पुष्पेणतज्जलमादायप्रत्येकंमंत्रवर्णा
न्ताउर्ध्वेतआसमाप्तिः एतन्ताउनंबोधनमाह विलिख्यमंत्रंतन्मंत्रीप्रसूनैःकरवीर

जैः तन्मंत्राक्षरसंज्ञातेर्हन्यायोनेनबोधनं फूर्जीदौकुंकुमादीनामंत्रंविलिख्यमंत्राक्षरसं
ख्यायाकरवीरपुष्पाण्यादायएकमेकाक्षरंएकैकेनपुष्पेणयोनेनसानुस्वारेणरेफेणरहितेने
नप्रत्येकंक्रमेणहन्यात्यावन्मंत्रस्यसमाप्तिः एतद्बोधनं प्रोक्षणमाह स्वातंत्र्योक्तविधा
नेनमंत्रीमंत्रार्णसंख्यया अभ्यक्तपल्लवैर्मंत्रंमभिषिंच्येद्विशुद्धये पूर्ववन्मंत्रविलिख्यमं
त्रार्णसंख्ययापिप्पलपल्लवैरेकैकपल्लवेनएकमेकंमंत्रार्णक्रमेणगंगागतीर्थांबुनाअमुष्य
मंत्रस्यरुद्रमक्षरमभिषिंचामिनमः एवंविधयोगेनमंत्रनामपतेर्पणनामतच्चरन्अभिषि
ंचेत् सांप्रदायिकास्तुअमृतबीजपूर्वकमभिषेकमाहुः पल्लवास्तुमंत्रार्णसंख्याकाःहेयाः
एतत्प्रोक्षणं विमलीकरणमाह संचिंत्यमनसामंत्रंज्योतिर्मंत्रेणनिर्दहेत् मंत्रंमलत्रयं
मंत्रंविमलीकरणंत्विदं नारव्योमाग्निमनुपुकूर्दंडीज्योतिर्मनुर्मनः तरंप्रणवं व्योमहकारः
अग्निःरेफः मनुश्चतुर्दशस्वरः दंडीअनुस्वरः विंदुःसोमिति ज्योतिर्मंत्रोयं मंत्रंमन
सास्मरन् ॐह्रींअमुष्यमंत्रस्यआगंतुमलंविनिर्दहामिनमः एवंप्रयोगः पुनर्मंत्रमु
च्चार्य ॐह्रींअमुष्यमंत्रस्यसहजमलंनिर्दहामिनमः पुनर्मंत्रमुच्चार्य ॐह्रींअमुष्यमं
त्रस्यकार्मकमलंनिर्दहामिनमः विमलीकरणमेतत् ततःपूर्वज्योतिर्मंत्रसर्वमंत्रसाधा

रणीयंदीपिनीविद्या साध्यमंत्रंमनसाध्यायन् ज्योतिर्मंत्रमष्टरूत्या जपेत् तदनुसोध्याजपः प
वेरूतेमंत्रोदीप्तोभवति यस्यमंत्रस्यविशोषतयादीपिनीउक्तावर्तेतेतस्यैवदीपिनीविशेषोत्प
अनुक्तस्येयंसामान्यादीपिनीरितिशेषदायिकाः वंदंति आप्यायनमाह कुशोदकेनजलेनप्र
त्यर्पणेक्षणमंत्रोः तेनमंत्रेणविधिवत्यतदाप्ययनमतं भूर्जेकुंकुमादिनामंत्राक्षराणिविलिख्यकु
शोदकमष्टोत्तरशतवारंमंत्रितंगृहीत्वाकुशैर्नैवमूलमंत्रमुच्चार्यएकैकमस्त्रंक्षेप्तव्यंतत्
यावन्मंत्रसमाप्तिः एतदाप्ययनं अत्रापिमंत्रांतेअमुष्यमंत्रस्यअमुकमस्त्रमाप्याययामिन
मः इतिप्रयोगेपाभाव्यं तर्पणमाह मंत्रेणवारिणामंत्रेतर्पयेत्तर्पणंस्मृतं भूर्जोदेकुंकु
मादीनामंत्रंविलिख्यमूलमुच्चार्यमअमुकबीजंवाअमुकमंत्रंतर्पयामिनमः इतिप्रयोगे
णाभुक्षवारिणा अंजलिनापात्रेणवालिखितमंत्रस्योपरिअष्टोत्तरशतवारंतर्पणंकुर्यात्
दीपनमाह तारमायायोगोमनोदीपनमुच्यते तारः प्रणवः मायास्वबीजंश्रीरमाश्रीः एतद्बीज
त्रमुच्चार्यैतदंतेसाध्यमंत्रंवदेत् यथा ॐह्रीश्रींॐनमः शिवायेतिससप्तलाजपेत्तदीप
नमेतत् गुप्तिमाह जप्यमानस्यमंत्रस्यगोपनंप्रकाशनं जप्यमानसाध्यमंत्रंकदाचित्
कस्यापिनवदेत् अस्योगोपनसंस्कारः मूलमष्टोत्तरशतवारमुपांशुजपेत्तदयंगुप्तिः ॥

DR. BHAU DAJI MEMORIAL

संस्कारदशासंप्रोक्ताः सर्वमंत्रेषुगोपिताः यानूक्त्वासंप्रदायेनमंत्रीवांछितमश्नुते अत्रसर्वत्रसुवर्ण
दक्षिणाकपालेखननंकार्यं इतिदशासंस्कारः एवंसंस्कारेमंत्रंसंशुद्ध्यउक्तनियमपूर्वकंवर्णल
क्षंपुरश्चरणंकृत्वाहोमादिकंकुर्यात् अथवाअनेकपर्यायाः पुरश्चरणएवप्रोक्तास्तेःसर्वैः
पुरश्चरणंकुर्यात् अथवातेषुअन्यतमप्रकारेणपुरश्चरणंविधायपलाशकुसुमादिभिःद
शमंशंहोमंकुंडेस्थंडिलेवाग्निस्थापनंकृत्वाहोमंकुर्यात् तद्दशांशेनतर्पणंतद्दशांशेनमा
र्जनंतद्दशांशेब्राह्मणभोजनंकृत्वामंत्रसिद्धिर्भवति देवताप्रसन्नास्यात् तदुक्तंकुलप्रका
शतंत्रे जप्यंध्यानंस्तवोयंत्रंनापरोस्तिहेकश्चन तस्माज्जपेनधर्मार्थकाममोक्षांश्चसाधयेत्
संसारेदुरंभूपिष्टेयदच्छेत्सिद्धिमात्मनः एवंगोपासनेनैवमंत्रजापीसुखंभजेत् पूजात्रैकालि
कीनित्यंजपतर्पणमेवच होमोब्राह्मणभुक्तिश्चपुरश्चरणमुच्यते यद्यदंगंविहीयेतत्तत्संख्या
द्विगुणोजपः कुर्याद्विस्तरतः पंचसंख्यांसाधकोन्मः कुर्वीतसंसारंसिध्यर्थंतदशांकी
यमन्वितः सर्वेदंगविहीयेतमंत्रीनष्टमवाप्नुयात् अनेश्चतुर्विधैर्विपदार्थैः षड्डुसान्वि
तैः सुपक्वाजितेषुविप्रेषुसर्वंहिसफलंभवेत् सम्यक्सिध्येकमंत्रस्यपंचांगोपासनेनैवच ॥
सर्वमंत्राश्चसिध्यंतितत्प्रभावाल्कुलेश्वरी उपदेशस्यसामर्थ्यात्श्रीगुरोश्चप्रसादतः ॥

मंत्रप्रभावाद्वत्यावमंत्रसिद्धिप्रजाते सिद्धमंत्रोगुरोर्वक्त्रात्लब्धोयंसिद्धिभाक्प्रभवेत्
पूर्वजन्मकृताभ्यासान्मंत्रोवासीघ्रसिद्धिदः दीक्षापूर्वकुलेशानिपारंपर्यक्रमागतं न्या
यलब्धंतुयेमंत्रंतत्रसिद्धिस्संशयः सच्चिदानंदनाथेनउन्मन्यानंदसेविनाविनश्यु
ध्यर्थमाख्यातात्रिपुरापूजनक्रमः इतिश्रीत्रिपुरापूजनक्रमेपुरश्चरणाख्यःषष्ठः
परिच्छेदः एवंपुरश्चरणंगजपंवोल्काकामनाजपमाह तत्रुक्तंकामकेश्वरिमतेत्रयो
लक्षमात्रजपाद्देवीमहापापैःप्रमुच्यते लक्षद्वयेनपापानिसप्तजन्मकृतान्यपि नाशय
त्रिपुरादेविसाधकस्यनसंशयः जप्त्वालक्षत्रयंह्येमंत्रीयंत्रितोमंत्रविग्रहः पातकैना
शयेदाशुयद्विजन्मसहस्रजं जप्त्वाविद्यांवतुर्लक्षंमहायोगीश्वरोभवेत् पंचलक्ष
दरिद्रोपिसाक्षाद्देश्रवणायते जप्त्वाषट्लक्षमेवास्यान्महाविद्याधरोभवेत् जप्ते
वसप्तलक्षाणिखेचरीमेलनंभवेत् अष्टलक्षप्रमाणंतुजप्त्वाविद्यामहेश्वरिं अपि
माद्यष्टसिद्धीशोजायतेदेवपूजितः नवलक्षंप्रमाणंतुजप्त्वात्रिपुरसुंदरी विधिव
ज्जपतेमंत्रीरुद्रमूर्तिरियापरः कर्त्ताहर्त्तास्वयंसाक्षाल्लोकेत्रतिहतप्रभः निगदेन
वयज्ञलंचोपांशुनास्मृतं मानसेनमहेशानिकोटिजाप्यफलंलभेत् इतिका

म्यजपः अथहोमविचारः तत्रवाप्यासंहितायां अथअग्निकार्यंवक्ष्यामिकुंडेवास्थंडिलेपिवा॥
वेद्यामप्यायसेपात्रेमन्मयेवानवेश्मसे तथाज्ञानार्णवे नित्यंनैमित्तिकंहोमंस्थंडिलेवासमा
चरेत् गोमयेनोपलिप्तायांपूर्वोत्थस्थलरूपकं हस्तमात्रंतुतत्कुर्यात्वालुकाभिसमुद्भवं॥
अंगुलोत्सेधसंयुक्तंचतुरस्रंसमंततः तथाचत्रिष्टः हस्तमात्रेस्थंडिलेंवासंक्षिप्तेहोमकर्म
णि अत्रसंक्षिप्तइत्यभिधानात्सहस्रादिसंख्याहोमोस्थंडिलेकर्त्तव्यइतिकेचित् तन्न॥
हेमाद्रिलिखितवचनस्यविरोधात् वायुपुराणे होमंसमाचरेत्कुंडेस्थंडिलेवाथपूजिते अ
ग्निप्रणयनंकृत्वाह्याचार्यःसर्ववेदवित् तिलहोमंव्याहृतिभिःशतोत्तरसहस्रकं तथाव
ह्निपुराणे कुंडेवास्थंडिलेवापितत्रहोमंविधीयते अयुतोहोमसंख्यावपालाशसमिधस्तथे
ति अथकुंडं तत्रवाताधिकेपवेदशोहीनेधेनुधरेनक्षयः यत्रकुंडेनुसंतापोमरणंलि
ंगमेखले मेखलारहितेशोकोभ्यधिकेवित्तसंक्षयः भार्याविनाशकंप्रोक्तंकुंडयोन्याविं
नाशनं अपत्यध्वंसनंप्रोक्तंकुंडंयत्कंठवर्जितं इतिविश्वकर्मवचनात् न्यूनाधिकप्रमा
णायत्कुंडंस्रुवैरमेखलं श्रृंगाररहितंयच्चयजमानविनाशनं इतिक्रियासारवचनात्॥
मानहीनपवेद्याधिरधिकेशत्रुवर्धनं योनिहीनेजपस्मारोवाकुंडेःकंठवर्जिते इतिसिद्धां

तत्रोक्तखरवचनात् सूत्राधिकेसुहृद्वेषोमानहीनेदरिद्रता वाग्रोधः कंठहीनेस्यात् असिधिर्न
नखवतके असिधिकेवास्करोभागोमानेनाधिकमेखले व्याधयः संप्रवर्धतेवियोनोस्यात्पर
पुस्त्रीतिः उक्तारस्फुटितेछिद्रेसंकुचोवाक्यतोभवेत् इतिजयद्रथयामलवचनात् न्यूनाधिका
दोषिंदाश्रवणाद्यथोक्तलक्षणमेवकुंडंकर्तव्यं तत्रप्रथमसारे विंशद्विश्वतुरधिकाभिरंगुलीभिः
सूत्रेणाथपरिसूत्र्यभूमिभागं तामिश्वप्रखनुतावतीभिरंशैत्यत्कावांगुलिमपिरखश्च
कार्यः तावतीभिश्चतुर्विंशतिभिः तथावधानार्णवे कुंडविरच्यविधिवत् सर्वलक्षणालक्षि
तं योनिकुंडंवाकूपदस्यादशुभिःकरणंतथा १ लक्ष्मीप्रदंवर्तुलंवत्रार्धेहृदयंभवेत् नव
त्रिकोणकुंडंवरवैरीसिद्धिदायकं २ चतुरस्रंशोभिलक्ष्मीपुष्टिध्यासुगारकं भवेत्सर्व
समध्येहिधनसौभाग्यवर्धनं ३ पद्मकंसर्वसपत्तिःकारकंसुरवंदिते अष्टपत्रंवरारोहे
समीहितफलप्रदं ४ एतानिसर्वकार्याणिचतुरस्रेभवंतिहि शृणुदेवीप्रवक्ष्यामिचतुरस्र
स्यलक्षणं ५ चतुरस्रंसमंहस्तांमात्रंविरिच्ययेसुधी मेखलासहितंदेवीशृणुलक्षणमु
त्तमं ६ पंचदशांगुलात्खातंरमणीयंयथाभवेत् कंठदेशांगुलत्यक्तानवांगुलसमुन्नता ७
षडंगुलस्फुविस्तारामेखलाप्रथमाभवेत् द्वितीयामेखलादेविचतुरंगुलविस्तरा ८ ॥

सप्तांगुलोच्छ्रायकर्तव्यातृतीयामेखलाततः पंचांगुलोच्छ्रायदेवेशीविस्तारेद्व्यंगुलोभवेत् ९ कुंडस्यपश्चि
मेभागेयोनिंकुर्यात्सुलक्षणां द्वादशांगुलिदीर्घांतुचतुरंगुलविस्तरां १० अश्वत्थपर्णरूपांतुत्रिकोणां
वाविलक्षणः चतुरंगुलविस्ताराषडंगुलसमुन्नता ११ तथाचशारदातिलके हस्तमोन्नमितोभूमे
परितःपरिसूत्रयेत् समानंकुंडमेतस्यात्चतुरस्रंशुभावहं हस्तमात्रंसूत्रंकृत्वा तेनआग्नेयां
दिक्कृत्वाऽरेखांन्यांमाकृष्यतत्रऋजुंकृत्वातेनऋजुंयेआग्नेयादाकृष्यतत्रदिक्कृत्वावायव्येआकृष्य
तत्रदिक्कृत्वादिदिगंतदिक्चतुष्टयंभवेत् दिक्चतुष्टयेरज्जुंप्रासार्यचतुरस्रंसाधयेत् य
तनंतत्रैव यावत्कुंडस्यविस्तारःखननेतादेवहि विश्वकर्माप्याह यावन्मात्रंकुंडविस्तारउक्त
स्तावन्मात्रंतस्यखातंप्रतिदिष्टं वायवीयसंहितायांकुंडविस्तारवन्निम्नमिति तथाप्रयोगसारे
चतुरस्रंचतुष्कोणंसूत्रैःकृत्वापथापुरा हस्तमात्रंततन्मध्येतावन्निम्नायतंखनेत् तथागुणेपरा
मर्शिन्यां चतुर्विंशांगुलायामंतावत्खातसमन्वितमिति तथादक्षिणामूर्तिसंहितायां चतुर्दिशं
तिसंख्याभिरंगुलीभिःसुविस्तृतं खातंतुरचयेत्कुंडंसर्वत्रसमानोहरमिति एतावताखननंमेख
लादिवत्कुंडांगंभवति अत्रकेचिन्मेखलायाःसहहस्तंखातंवदंति तदुक्तहोमसारोत्तरे॥
हस्तमात्रंखनेत्तत्रपर्यंतऊर्ध्वमेखलायासहेति प्रतिष्ठासारसंग्रहे पंचत्रिमेखलोच्छ्रायंकृत्वा

शषमध्यःखनेदिति तथाविश्वकर्मामाह व्यासात्खलःकरंपोक्तेनिम्नंनिध्यंगुलेनैतु प्रथमतं
त्रिपि खातंजिनोगुलैस्तीर्यक्कूर्ध्वंमेखलयासहेति तथासिद्धांतशेखरे खातेकुंडप्रमाणेस्य
ऊर्ध्वंमेखलयासहेति एतत्सर्वकुंडेषुन खातेकुंडायतेस्तुल्यंअंगत्वंतस्यकीर्त्तिनं सन्निपा
त्योपकारेण मेखलादेर्विशिष्यते इतियोगिनीहृदयवचनात् अंगंगिनोःसहावर्योत्स्वध
र्मइति न्यायात् धर्मधर्मिणोःसाहचर्यंस्यात् उक्तपक्षस्यैवयुक्तत्वात् तस्मान्मेखलयास
हखात × सन्निपत्योपकारकोगंखातंभवति आराउपकारकांगलंमेखलयाःअतोखातस्यमेख
लायाःसहनिर्वाहोनोचित्यात् × वचनान्निरस्तिकहस्तादिकुंडेषुपंचाशादादिहोमविधानेखा
ताधिक्यप्रयोजनाभावात् तद्विषयाणीतेहेयं अथमेखलामाह क्रियासारे नाभियोनिस
मायुक्तंकुंडंश्रेष्ठंत्रिमेखलं कुंडंद्विमेखलंमध्यंनीचंस्यादेकमेखलं अप्रधानमेखलेस्वेधंमुक्त
मंत्रनवांगुलं तद्वाग्रमेखलोत्सेधंपंचांगुलमितिस्मृतं तद्वाग्रमेखलेत्सेधमंगुलद्वितयंक
मात् चतुस्त्र्यंगुलोत्सेधमेखलात्रितयस्यतु तथालक्षणसंग्रहे प्रथमाद्यंगुलायामउन्न
तासनवांगुलेः मध्यमात्र्यंगुलाद्वाद्येतनीयात्तयमांगुलो तथावकपिलमूहापंचरात्रे कुंड
षड्भागिकलाद्यादितायाऽष्टांशाकास्मला तृतीयाद्वादशांशास्यादिति तथासिद्धांतशेखरे

चतुर्विंशतिमोभागः कुंडनालंस्मृतं तथासोमशंभोय— तुर्विंशोभागःसांगुलसंज्ञकः विभा
ज्यानेनकर्तव्यामेखलाकुंडनाभयः इतिद्विहस्तादोक्तमयारीत्यामेखलाःकर्तव्याः प्रपंच
सारे सलक्षणपूर्वकगुणान्वितः क्रमाद्वादशाष्टचतुरंगुलोच्छ्रिताः सर्वतोंगुलचतुष्कविस्तृता
मेखलाः सकलासिद्धिदामताः तथापयोगसारे सात्रिकीमेखलाप्रथाविस्तृत्याद्वादशां
गुलाः द्वितीयाराजसीप्रोक्तामेखलांष्टांगुलेस्मृतः तृतीयामेखलारयातातामसीचतुरां
गुला एषकुविस्तारमेतासुचतुरंगुलमानतः तथायोगिनीहृदये मेखलाश्चपुमेदेद्विह
स्तादिषुविशेषतः षट्नागांकसमंभागेर्मिताःस्फोगीपिताःशुभाः तथामेखलद्वयपक्षे
षष्टांशेनाष्टमांशेनमेखलाहृदयेमतामितिएकमेस्त्रीखलपक्षे पिंगलमते एकषडंगुलोत्सेध
विस्तारमेखलामता सिद्धांतशेखरे कुंडनोमेखलाकुर्यात्एकोत्तरात्रिरंगुलैः शक्तिष
ड्भं तथाकपिलः चतुर्थांशविस्तारएकामेखलेति अथकंठः तत्रवशिष्टः कंठोष्टपवमात्र
स्यात्कुंडलेनुकरमात्रके तत्रथाखातादाद्यांगुलः कंठः सर्वकुंडेष्वयंविधिः चतुर्विंशतिमे
भागेअंगुलंपरिकल्प्येरिति तथाकपिलः चतुर्विंशतिभागेनकंठोवेपरिकीर्तितइति अ
धयोनिः तत्रसोमशंभुः नाभ्यासुपरियोनिःस्यात्मध्येभ्वष्टदलाकृतिः तथाक्रियासारे होम

कूसुरतस्थापदक्षिणपश्चिमेपिवेति तथा शारदातिलके होतुरग्नेयोनिरासातुपर्यश्वत्थपत्रवदं
ति मुष्टयरत्नेकहस्तानांकुंडानांयोनिरितिषट्चतुर्थैर्ध्यंगुलायामविस्तारोन्नतित्रांगुलिनी प
कांगुलंतुयोन्यग्रंकुर्यादीषदधोमुखं तथाषट्चतुःद्वादशांशैरायामविस्तारोन्नतियुक्तासर्व
त्रयोनिः कार्यत्यर्थः उक्तंच तुर्यषष्ठंद्वादशांशैर्योनिःकुंडायतेर्पिवेत् आयतविस्तृतातुंगासिनां
द्वीननद्यंकमिति केचित्द्वादशांगुलदैर्ध्यांअंगुष्ठांगुलविस्तारा द्व्यंगुलोच्छ्रिताद्दति तदुक्तं
स्यंपुराणे मेरवलामध्यतोयोनिःकुंडार्धांत्र्यंशविस्तृता सिक्थोनदीर्घखरे दीर्घांकर्णवीमिर्योनि
विस्तारत्र्यंशभागतः उन्नतिर्द्व्यंगुलोनास्याःइति प्रयोगसारे त्रिभागमध्यतोयोनिरायामे
द्वादशांगुला द्व्यंगुलोच्छ्रिताकुर्यात्किंचिदुन्निवेरानीति एवंबहुमतेषुसिद्धयाहं होता
होमकर्तात्वस्यायंभागेआस्तेमेरवलानामध्येप्रथममेरवलायाःमध्यभागेयोनिर्निवेश्य वतु
र्विंशांशेनयोन्यग्रेंषट्अधोमुखंकुंडंप्रविष्टंकुर्यादितिसर्थः तथाचवशिष्टः योनिश्चपश्चिमे
भागेप्राङ्मुखीमध्यतःस्थिता दृष्टान्नानागजोष्टवक्षछिद्रावाग्रनिम्नगा विस्तरतोनाव
दादिभागेअश्वत्थपत्रवदिस्मृतेः अथनालमाह शारदातिलके स्थलादारभ्यनालंस्याद्यो
निमध्येसरंध्रकं नवांशतृतीयमेरवलासंलग्नस्थलतः योनेःपश्चार्धमध्यपर्यंतंनालंविदध्यात्

राम
१५३

एतस्यदैर्घ्यंमेरोर्दीर्घतास्थलात्योनिमध्यंयावत् नालस्यमध्यंसरंध्रमीप्सिते तत्रर्षिकादि न
नाकार्यं नालेतुमन्त्रिकायाकार्यं उक्तंचपेरशत्रे स्थलादारभ्यनालंस्याद्वाह्यमेरवलयासहेति
प्रयोगसारे योन्यापश्चिमतोनालमायामेचतुरंगुलं त्रिदोकांगुलविस्तारंक्रमोन्यूनाग्रमीप्सित
इति अथनाभिः शारदातिलके कुंडानांकल्पयेदेतन्नाभिमंबुजसन्निभं ततःकुंडानुरूपंव
मानमस्यनिगद्यते मुष्टयरत्नेकहस्तानांनाभिरत्नेधनुःशतमः नेत्रवेदांगुलोपेतःकुंडेषन्येषु
वर्धयेत् कुंडरत्नमध्येअष्टदलकमलाकारेणनाभिरत्नंस्थापयेत् नाभिरंध्रेत्रिधामिला
मध्येकुर्यान्नकर्णिकां बहिरंशद्वयेनाष्टोपत्राणिपरिकल्पयेत् पद्माकारंकुंडाकारंवानाभिरत्ना
रत्नमध्येस्थापयेत् नाभेरकरणेनिंदाश्रवणात्अवकाशोकार्यः प्रपंचसारादौनोक्तः अथ
अंगुलिमानं तत्रशारदातिलके कर्तुर्दक्षिणहस्तस्यमध्यमांगुलिपर्वणि मध्यस्यदीर्घमान
नमानांगुलिमितिरितं त्रिंशदंगुलिमध्यतः पर्वणोनंतरार्धमा
नांगुलमुदाहृतं यागोपकरणान्यत्रकुर्यान्मानांगुलेनवे आदित्यपुराणे जालांतरगतेभानौ
यत्सूक्ष्मंदृश्यतेरजः प्रथमंतत्प्रमाणानांत्रसरेणुप्रचक्षते तत्रत्रेणुस्तुदिसेयोयेष्टोस्फः प
रमाणवः त्रसरेणवस्तुतेसप्तेष्टोरथरेणुस्तुसंस्मृतः रथरेणवस्तुतेसप्तेष्टोवालाग्रंतत्स्मृतंबुधैः

वालाग्रन्यष्टनिष्कानुपूकालिक्षाष्टकंस्मृतं अष्टौयुकायवेमाहुःअंगुलेनुयवाष्टकं रलिस्तेगुणि
पर्वाणिविज्ञेयास्त्वेकविंशतिः चत्वारिविंशतिश्चैवहस्तस्यादंगुलान्वितः अंगुष्ठांगुलमोवयत्र
यत्रोपदिश्यते तत्रतत्रहस्तर्वग्रंथिभिर्मायतेसदा आगमेषुनुपूर्वयस्युर्मध्यमोंगुलिपर्वणः॥
मध्यस्यदेध्यमानेयत्तदंगुलमुदाहृतं तेश्चतुर्भिर्भवेन्मुष्टिर्विलस्तैस्त्रिभिरुच्यते अर
लिस्तद्वयेनस्याध्यस्तस्तद्वयतःस्त्रिवे अरलिहस्तोपर्यायवाचको तथावपेवरात्रे वाताप्यनप
थेपाप्ययोनिरविरन्ध्रमयः तेषुसूक्ष्माविसर्पनेरेणवस्त्रसरेणवा परमाणवस्तेष्टस्युःरेणवः
स्युस्तदष्टभिः तेष्टोवालाग्रकंतेष्टोलिक्षाएकानदृष्टकं तदृष्टकंयवास्तेष्टोअंगुलंसमुदाहृतं॥
विन्यस्तैस्तीर्यगष्टाभिर्यवैर्मानांतरांगुलं ऋजुन्यस्तैस्त्रिभिर्मानोत्तरांगुलं अथहोम
संख्याकुंडमानमाह मुष्टिमात्रमितंकुंडंज्ञानार्थंसंप्रकीर्तितं ज्ञानहोमेरत्निमात्रंहस्तमात्रं
हस्तैस्त्रके द्विहस्तमथवेतलक्षेचतुर्हस्तमुदीरितं दशलक्षेषषट्हस्तकोय्यमष्टकरस्मृतं
पक्षांतरमाह एकहस्तमितंकुंडंलक्षहोमविधीयते लक्षार्णादशकंयावन्नावक्षस्तेनवर्धं
येत् दशहस्तमितंकुंडंकोटिहोमेविधीयते एकहस्तमितेकुंडेलक्षहोमंआज्यादिहोमा
दिपूर्वंतेयंमितिपक्षांतरं लक्षहोमेएकहस्तकुंडोक्तिः तथाद्विलक्षहोमेद्विहस्तं त्रिलक्षेत्रि०

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी लाड्यसंग्रहालयस्य संग्रहाकम्
रम
१५४

एवंएकैकलक्षहोमेवृध्या एकैकेहस्तंवर्धयेत् दशलक्षहोमेदशहस्तंहस्तंकुंडंकुर्यात् तत्रश्चकोटिहो
मात्ऊर्ध्वहोमसंख्यानास्ति दशहस्तकुंडादूर्ध्वंकुंडंनास्ति तदुक्तंमंत्रदर्पणे दशहस्तान्नकुंडंहिपर
मस्तिमहीतले कोटिहोमात्परोहोमोनास्तीतिजगतीतले अत्रहस्तमितंचतुरस्रंस्यात्वासनाभ्रीधरार्य
रुक्ता समलेबकचतुरस्रेत्र्यस्रेसेत्रेवज्रायनेकरणे फूवदूनंसमासार्द्धमध्यलंबनेनसगुणयेदि
दिति अत्रचतुरस्रस्यफूश्चतुर्विंशत्यंगुलात्मिका वदनंचतावन्मितं अनयोःसमासेहतेअष्टाचत्वा
रिंशदंगुलानिस्युः एतदर्धंचतुर्विंशत्यंगुलमध्यंलंबनेनचतुर्विंशत्यंगुलात्मकेनगुणयेत् अत्र
सदृशाद्विराशिघातोजातः एतस्यरूपमितिस्यात्या सदृशाद्विराशिकेघातःरूपनिरिनवनात्
एवंरूपेषट्सप्तत्युत्तरशतीअंगुलानांक्षेत्रफलंभवति एतत्क्षेत्रफलंसर्वत्रयोज्यानिसर्वकु
ंडसाधारणंभवति एतत्क्षेत्रफलंद्विहस्तस्यद्विगुणंत्रिहस्तस्यत्रिगुणंचतुर्गुणंचतुर्ह
स्तस्यएवंदशहस्तानांतेयं एतेनएकहस्तस्यकर्णसूत्रेद्विहस्तायामसूत्रेद्विहस्तत्रिहस्तचतु
र्हस्तपंचहस्तानांकर्णसूत्राणि षट्हस्ताष्टहस्तदशहस्तानामायामसूत्राणिभवंति तेयं॥
तथाचलीलावत्यां भास्कराचार्यैः समश्चतोतुल्यचतुर्भुजेपितथायतेस्तद्गुनकोटिघातः स
क्कोत्यादिषमाकृतिंद्विगुणयेन्मूलंसमेतहतेसक्कालब्धकृतानदारिविषमालब्धंद्विनिघ्नंन्य

सेतत् पंक्त्यापंक्तिहसमेन्यविषमात्यक्तात्ववर्गीफलं पंक्त्यायद्विगुणंन्यसेदिति मुहुःपक्तेर्दलंस्या
त्तदं इतिभास्कराचार्योक्तपर्यायेणमूलमानयेत् इतिकुंडविचारः अथकुंडानांस्वनामाहज्ञाना
र्णवे द्वात्रिंशद्दंगुलेकुंडंत्रिकोणंपरितःपृथक् खातंतुपूर्ववत्कुर्यात्कंठेहित्वागुलंतथा पूर्वमे
खलाकार्यैकापिखातथाभवेत् योनिस्तद्वन्महेज्ञानित्रिकोणंपरिकीर्तितं चतुरस्त्रेणकुंडेनसमं
कुंडंयथाभवेत् तथापिपरितेकुर्यात्त्रिकोणादिकमर्हिजे योनिकुंडेयोनिरूपेभगोकंभगरूपकं॥
कुर्यात्त्रिकोणवद्वृत्तेवीचतुरस्त्रस्यसंख्यया चतुर्हस्तमितंसूत्रंवर्तुलाकृतियोजयेत् वर्तुलंय
त्वयेत्तेनखननंपूर्ववद्भवेत् मेखलापूर्ववद्योनिस्तथैवपरिकीर्तिता अर्धचंद्रंतुकुंडंहिपरिवेषक्र
मेणच चतुर्हस्तमितंकुर्याद्दर्द्वंद्वयथाभवेत् मेखलायोनिसहितापूर्ववत्सुरसेश्वरी नव
त्रिकोणकुंडमुक्तंयत्तन्मिवरानने मध्यत्रिकोणादेवेशि त्रिकोणमिवपूर्ववत् मेखलारहितेनेननवकोणंयथाभवेत् संधिभेदक्रमेणैवनतःकोणाष्ट
केप्रिये खनेत्तत्रकरैरेणगणितेनयथाक्रमं मेखलापूर्ववत्कार्योत्यक्तकंठेंगुलक्रमात्॥ राम
योनितंथैवखनेत्सर्वसौभाग्यवर्धनी अष्टपत्रंमहेज्ञानिकमलाकृतिवैभवेत् चतुरस्रस्य १५५
मानेननयावाष्टदलंभवेत् एकत्रखननंवास्यतथानेत्रसुखप्रदं मेखलापूर्ववत्कार्यापद्मा

कृतिसुखावहा योनिस्तथैवदेवेशिकुर्यात्सर्वेसमृद्धये एकंकुंडानिसर्वाणिकुर्याद्धीमान्विचक्षणः
अथवर्णविशेषकुंडविशेषमाह ज्ञारदातिलके विप्राणांचतुरस्रंस्यात्तत्राक्षोवर्तुलमिष्यते वैश्यानां
मर्धचंद्राभंशूद्राणांत्र्यस्रमीरितं चतुरस्रंतुसर्वेषांकेचिदिच्छंतिसूरयः विप्रादीनामुक्तचतुरस्रादिकुं
डानिसाधारण्येनभवंति अन्यानितुकामनाविशेषाकांक्षायांभवंतीत्यर्थः एकेआचार्याः चतुरस्रं
सर्ववर्णसाधारण्येनभवंतिहुः सर्वकामनासमंचाणाहुः इतिकुंडनिरूपणं अथश्रीकरस्वो ज्ञारदाति
लके श्रीपर्णीत्रिंशुपाक्षीरज्ञारविश्वैकतमंगुरुः गृहीत्वाविप्रजेत्यस्तुमात्रेषट्त्रिंशतापुनः त्रिंशत्से
मविदंउवेदीनेरष्टभिर्भवेत् एकोद्योनिमितःकंठःसप्तभागमितंमुखं वेदीत्रिंशेनविस्तारःकंठस्यप
रिकीर्तितः मुखंकंठसमानंस्यान्मुखमार्गप्रकल्पयेत् कनिष्ठांगुलिमानेनसर्पिषोनिर्गमायव
वेदीमध्येविधातव्याभागेनैकेनकर्णिका विदधीतबहिस्तस्यमेकांद्योनाभिवोवटं नस्यखातेत्रिभिर्भा
गैर्वृत्तमर्धांशतोबहिः अंशेनैकेनपरितोदलानिपरिकल्पयेत् मेखलामुखवेद्योस्यात्परितो
धींशमानतः दंडमूलाग्रयोःकुंभोगुणवेदांगुलैःक्रमात् गंडीयुगंयमांशेस्यात्तदूर्ध्वस्यानाहईरितः
षड्भिरंशैःपृष्ठभागोवेद्याःकूर्मोन्नतिर्भवेत् हयस्यवाहस्तिनोवापोत्रिणोवामुखंखनेत् मुखस्यपृ
ष्ठभागेस्याःसंप्रोक्तंलक्षणंस्वं श्रीपर्णीकाश्मिरीसिवनीतिप्रसिद्धा त्रिंशुपासिसवा क्षीरया

रिक्तनभश्चक्षुर्वस्वंशैरङ्गुलादिमध्येऽन्यतमस्याङ्गुलस्यादायहस्तमात्रेदीर्घाकारेणागृहीत्वातत्
अंगुलमात्रंषट्त्रिंशद्भागैर्विभजेत् तत्रमूलभागात्त्रिंशद्भागैर्दंडोभवेत् ततःअष्टभिरंशैर्वेदी
भवेत् तस्याग्रेएकभागोमानेनैवविस्तृतंशिरश्चयेत् तत्रएतंत्रामितंकंठंकुर्यात् सप्तभागमि
तंमुखंकुर्यात् तत्रकनिष्ठांगुलिमानेनमुखेप्रणालिकाकारेणआज्यनिर्गमनायमार्गंकुर्यात्॥
तन्मार्गःकंठैरंशैर्वाविभिन्नाकर्णिकांतंकुर्यात् नंयथा तत्रस्थआज्यान्नघृतमायाति तदुक्तंमेत्र
मुक्तावल्यां कंठाधःकारयेन्मार्गंविद्वान्मार्गेनाज्यस्यनिर्गमेवेधंवतुर्थेखतःकुर्यात्तत्रशलो
हशिलाकयेति वसिष्ठसंहितायां सुषिरंकंठदेशंस्याद्दिशोद्याक्कनीयसीति कनीयसीक
र्णिकायां वेदीरचनामाह वेदीति अष्टांशायतनाविद्वत्तासमन्वतुरस्राविदिः तस्याःमध्ये
एकांशमानेनकर्णिकांरचयेत् कर्णिकारचानमध्येवाकार्या कर्णिकायाःअर्धमानेन
पत्रमणात्अवटंरचयेत् एवंरूपेभागत्रयात्मकमवटंभवति रचानंगंभीरत्वंत्रिभिर्भागै
रेवकुर्यात् अवटस्यपरितःपादार्धमानेनमध्यात्पत्रमणात्रत्नेभ्रमयेत् तत्राद्दहिःएकां
शाध्यामध्यात्पत्रमणेनरत्नंरचाअष्टदलंपद्मंरचयेत् अत्रपद्मरचनारूपनिरूपनया
त्रिनेत्रसंपरायात्पत्रेषुरचननानुपदेशात् एवंषड्भागाःजाताः ततःपत्राद्दहिःअंशा

र्धमानेनमध्यात्रत्नंभ्रमयेत् तत्रमेखलांअंशार्धमानेनरत्नाकारस्यात् एवंसप्तभागाः
जाताः वेद्यामेखलायाःपरितोअर्धांशमानेनरत्नंरचयेत् अन्यश्चएवमेवतिष्ठति तद्बहिश्च
तुरस्रंस्यात् मुखस्यापिप्रणालिकायाःपरितोअर्धोभागमानेनमेखलाकार्या त्रिभिर्भागैरं
गुलिद्वयेनबहिरवटस्यमेखलेति अर्धांशमानेनमुखेपिमेखलारत्नाकाराकार्या नेनत्रैकेन
कर्णिकाद्वाभ्यांअवटः एकेनरत्नंअंशाद्वयेनदलानि एकेनमेखला अर्धार्धभागेनपरितः
समचतुरस्रसीमाघटनाकार्यः उक्तंमेत्रमुक्तावल्यां अर्धांगुलाभावेत्रोमासमावात्रिभिर्वा
अर्धांगुलाअर्धांशेति कुंभघटनामाह विंशत्यंशैःदंडउक्तः तस्यमूलभागेघटस्त्रिभिरंशैः
स्यात् घटमुखंतुवेदेःसंमुखतयाकार्या दंडाग्रभागस्तोघटश्चतुर्भिरंशैःस्यात्वेदीसंलग्नं
घटमुखंकार्यं अंशात्रयेअंगुलवाविंशाद्या मूलंकुंभलग्नाद्यंशागंडीकंकणाकाराकार्या न
दुक्तंसोमशंभुना मूलेत्रायेवदंडस्यगंडीकंकणवद्भवेत् एतेनएकादशांशाःगताः नवांशमितो
दंडोधारणार्थमवशिष्यते तदुक्तंचकपिलेन रसांगुलैर्भवेद्दंडइति रसांगुलैःषडंगुलैरिति
अस्याःऋजवअनाहोविज्ञाताःषड्भिरंशैः तदुक्तंमेत्रमुक्तावल्यां षडंगुलपरिणाहोदंडमध्यत
दाहृतइति अस्याश्चवःमुखस्यएष्टमागेहंसारेमुखलिखेदिति संबंधः वेद्याःअधस्तात्
अंशत्रयमितरत्नार्धेनभ्रमणात्षडंगमितरत्नेनकछपाकारंतांष्टमागेसंपादयेत् कूर्मिका

रतया उपरि वेद्यार्धः मध्यभागे उन्नतखलवत् मध्ये संग्रहः कार्यः प्रणालिका स्रुक्मुखस्याधोभागे
हंसास्यमुखं हस्तिनोवाक्राहस्यवामुखाकारनीकुर्यात् एवंस्रुक्लक्षणं अथस्रुवमाह श्रुवश्चे
तुर्विंशांगुलमितनिम्नमागेरोवायेतन्मूले द्वात्रिंशत्यादंमानंअंशोरतंस्यप्रकीर्तितं दंडमूलायवो
गंडीभवेत्कणाक्षुण्णिता स्रुवस्यविधिरारब्धानृतिश्रुवः हस्तमितेश्चतुर्भिरंशोनाहः कर्षाग्र्यो
हितशिरः अंशाद्वयेननिखननमेतत् पंकेमृगपदाकृतिश्चषट्त्रिंशादंशैर्विभक्तस्यस्रुवस्तुर्यांशभा
गमितः हस्तस्यतृतीयांशोनमितोश्रुवोपवर्तते श्रुवोपिश्रीपर्ण्यादिदारुजोत्र एवंकुर्यात्
विभागदर्शनात्श्रुवदीर्घताचषट्त्रिंशादंशैर्विभजेत् तत्रद्वात्रिंशादंशैर्दंडः अंशाचतुर्थमुखस्य
अनाहःदैर्घ्ये तन्मुखंतथाकुर्यात् यथाकर्षमात्रस्यघृतस्ययाहीभवति कर्षलक्षणंश्रीधरावा
र्यीये माषोद्वात्रिंशद्गुंजःस्यात्तोडत्रामाषोनिगद्यतेकर्षः अशीतिरिंशिकानांकर्षः पंकेमृगपदंयथा
दृश्यतेतदाकारेणमध्येसीमासहितंश्रुवमुखेउभयतोवृत्तार्धकारेणअंशाद्वयमितंखनेत्॥
खनेत्तोत्राद्वयमितंनिम्नंकुर्यात् दंडस्यमूलायवोःपूर्वोक्तंदंडीकुर्यात् दंडमूलभागेचतुर्भि
रंशोन्नयभागेद्वयेनदंडिकेफणालंकृताकार्या अवशिष्टोदंडोधारणार्थंवर्तुलःकार्यः कुंभोपूर्व
वत् त्रिदोषविधानाभावादिति वायवीयसंहितायां स्रुक्श्रुवेतेजसोग्राह्योनकांस्यायस
सीसकोयसदारुमयोवापितोत्रिकोत्रिलिंगसंमतो पर्णीवृक्षस्यवृक्षादेरछिद्रेमध्यतस्थिते

कू

पालाशपर्णीपिप्पलोडुंबरेति इतिस्रुक्श्रुवलक्षणं अथसमिधः नारदपंचरात्रे
समित्सादेशमात्रेणसमछेदान्वितानघा विस्तीर्णाद्विदलाकृत्वाचक्राम्रकृशादिभा स्व
मिदश्चदीर्घाश्चनिस्स्रवःपरिवर्जिताः विस्तीर्णाएःक्षयंकुर्यात्द्विदलाव्याधिसंभवा कृ
स्वायोमरणमाप्नोतिवक्राविघ्नाकरीतथा स्थूलाग्निर्हरतेलक्ष्मीकृशायोजायतेक्षयः द्वि
धायोनेत्रदोषास्युःकीटदष्टार्थनाशिना हेयंप्रकुरुतेदीर्घाप्राणघ्नीनिस्स्रवस्मृताः सक्षी
रानाधिकान्यूनासमिधःसर्वकामदाः आदत्स्वधामदीधयेदानजेन्यंगुलवर्तुलां ईदृशीहो
मयेत्साक्षात्प्राप्नोतिविपुलांश्रियं श्रौतेस्मार्तेचतेत्रोक्तेसमिधःपरिकीर्तिताः वायवीसंहिता
यां ताःपलाशपरागपियलीयाःद्वादशांगुलाः अथकाअस्पर्शमुक्ताःसत्वचोनिर्व्रणाःसमाः
द्वादशांगुलाविहिताःकनिष्ठांगुलिसंमिताः प्रादेशमात्रालाक्षासेवहोतव्याःसकलाअपि प्र
योगसारेपि श्लेष्मांतकपिप्पलावतरुंसक्कान्यग्यःसोमयेत्समिधाःइति तथागोभिलः अ
थेध्मानमुकल्पयेत्खदिरान्पलाशान्वाखदिरपलाशाभावेबिल्वार्कनिंबुकाम्रनी
पनिंबराजवृक्षशाल्मलीबदरिपकोविरंदरश्लेष्मांतकर्जे सर्ववनस्पतीनांरूक्षोयधा
र्थस्यात् इतिसमिधालक्षणं अथहोमकालः तत्रनारदपंचरात्रे शुभग्रहेसुनक्षत्रे

शुक्रपर्यंतिथिष्वपि शुभग्रहेपुरश्चरणोक्तग्रहादौ अथग्रहचक्रमाहहोमादौ मिहरबितभ्यु
मास्करीवेदमःकुजस्करेज्यविधूनुदकेतुषु रविभतोदिनभंगणयेत्क्रमात्पतिगतंत्रिन
यंत्रितयंन्यसेत् सौम्येसौख्यंविजानीयात्क्रूरेदुःखस्यसंभवः अत्रहोमारंभकालेसूर्य
नक्षत्रात्दिननक्षत्रपर्यंतंगणयित्वात्रिपिग्रहेषुन्यसेत् दिननक्षत्रंयस्मिन्ग्रहेआयाति
तस्मिन्दिनेतत्ग्रहमुखेआहुतिः सौम्येग्रहेहोमसिद्धिः क्रूरेअनिष्टफलंददाति तथा
चतंत्रोत्तरे ।त्रीणित्रीणिन्यसेद्भानिसूर्यर्क्षादनुक्रमात् आदित्येवसवेद्रोगोबुधेवैवध
नागमः शुक्रेलाभंविजानीयात्स्नानोपीडानशंतायः वंद्रोलाभप्रदश्चैवभोमेवधबंधन
बृहस्पतौसुतश्चाग्निःसराहुःकेतोवहानिदो इतिग्रहचक्रं अथहोमादौअग्निचक्रमाह५
तिथिवारंचैकमिश्रंवृतुभिर्भागमाहरेत् एकेनवसनिस्वर्गो द्वाभ्यांपातालगःस्त्रियी त्रि
भिःभूलोकसंस्थोज्ञेअग्निश्चक्रमुदाहृतं अथतिथिवारमिलितंगणनोरुत्वावतुर्भिर्भा
गंहृत्वायल्लब्धंशिष्टंतत्र एकसंख्यावशिष्टेस्वर्गवासीवह्निःप्रमाणनाशकृत् द्विसंख्याव
शिष्टेपातालवासीवह्निःअर्थनाशकृत् त्रिसंख्यावशिष्टेभूलोकवासीअग्निःशुभःसो
म्यकृत् एवंप्रारंभदिनेपश्येत् तथाचतंत्रोत्तरे स्तोकातिथिवारयुताकृत्वात्रीषेगुणाभ्रेषु

विवर्द्धितासः सौख्यायचंद्रद्वितयावशेषप्राणार्थनाशोदितिभूतलेच भूतलेवास्थलेस्थितिः एतच्चक्र
द्वयंनित्यनैमित्तिकहोमेकृतात्कृतं काम्येअत्यावश्यकं एवंविचार्य शुभकालेहोमारंभःकार्यः तत्र
प्रातःस्नात्वानित्यक्रियांविधाय न्यासादिस्नात्वाचक्रमंसमाधायकुंडसमीपेआगत्यस्वासनंसंपूज्यतत्रपा
स्त्रउपविश्यआद्येत्यादितिथूलेखनांतेअमुकमंत्रपुरश्चरणस्यदशांशहोमंमहंकरिष्यइतिसंकल्प्य
ज्ञानार्णवदक्षिणामूर्तिशारदातिलकादितंत्रानुसारेणअग्निमुखेलिखेत् तत्रादौकुंडंअष्टदलासं
स्कारैःसंस्कुर्यात् तत्रपूर्ववत्सामान्यार्घ्यसंस्थापनजलैःकुंडादिनामभिस्तथाकुर्यादितिसंपदय
तत्रमूलमंत्रंसंस्मरन्दिव्यदृष्ट्याकुंडंनिरीक्ष्य १मूलास्त्रेणकुशैरर्घ्यजलेप्रोक्ष्य २कुशास्त्रेणकुशैस्त्री:
संताड्य ३मूलमंत्रकवचेनधेनुमुद्रयाअर्घ्यजलैरभ्युक्ष्य ४मूलास्त्रेखानित्रेणखननंकुर्यात् ५अ
स्त्रमंत्रेणोत्करमुत्सृज्य बहिर्नयेत् ६मूलहृन्मंत्रेणफलकादिनाविषमभागंपूरणेनदृढीकरणं ७मूला
स्त्रेणपितिपूर्योःसुसमीकरणं ८कवचेनअर्घ्यजलेनविरलमुष्टिनाअर्घ्यजलेनसेचनं ९अस्त्रेणकु
टनं १०कवचेनकुशैर्मार्जनं ११कवचेनेवगोमयार्द्रलेपनं १२मेखलासुमध्येप्रागादिदिक्षुत्रीण्यु
नीतशांतिविद्यापतिष्ठानिरूपितः इतिकवचेनेवलाप्यंकंकवचेनेवविभाज्य १३तेनैवस्त्रेणमेखला
त्रयंत्रिस्त्रीःसंवेष्ट्य १४मूलेनअमुककुंडायनमइतिकुंडंगंधादिभिःसंपूज्य १५अस्त्रमंत्रेण

कुंडवज्रवत् दृढतरं संचिंत्य १६ हृन्मंत्रेणमेखलासुप्रागादिउदग्यान् कुशान् प्रक्षिपेत् १७ कव
चमंत्रेणअक्षतान्निधायाकरेणमद्धरणं १८ सर्वेंद्रियाणिमुद्धाटनभावनंअक्षतान्वुधिः मद्
धरणं संप्रादायात् अस्त्रकववादिकंपुरश्चरणमंत्रस्येववक्ष्यति एवंअष्टवारंसंस्कोरःकुंडसंस्क
त्य स्थंडिलंमुदीक्षणप्रोक्षणताउन प्रागग्रास्तिस्रोरेखादिलिखिताः मंदर्भयित्वा प्राक्संस्थाःउदग्
ग्रास्तिस्रोरेखाःविलिख्यताः वैबीजेनार्घ्यजलेनकुशैःप्रोक्ष्यप्रागग्रासु ॐविघ्नेशायनमः ॐईश्व
रायनमः ॐइंद्रायनमः इतिरेखात्रयेदेवतात्रयंसंपूजयउदग्ग्रासु ॐब्रह्मणेनमः ॐयमा
यनमः ॐसोमायनमः इतिरेखात्रयेदेवतात्रयंसंपूजयेत् इतिरेखाधिदेवतांसंपूज्य स्थंडि
लेतुप्रागग्रउदग्ग्राश्चतस्रोरेखाःकुशामूलेनविलिख्यप्रोक्षयेत् ततःकुंडमध्येत्रिकोणंषट्कोण
वसुपत्रंभूबिंबमालिख्यविभाव्यवातत्रकामेश्वरीमंत्रेणपुष्पांजलिंदद्यात् ततःकामबीजेन
प्राणायामत्रयं कृत्वाकामेश्वरीमंत्रस्यसंमोहनऋषयेनमःशिरसि गायत्रीछंदसेनमःमु
खे श्रीकामेश्वरीदेवतायैनमःहृदि कंबीजायनमःगुह्ये ईंशक्तयेनमःपादयोः लंकील
कायनमःनाभौ ममाभिष्टसिध्यर्थेविनियोगः क्लींहृदयायनमः क्लींशिरसेस्वाहा क्लींशि
खायैवषट् क्लैंकवचायहुं क्लौंनेत्रत्रयायवौषट् क्लूंअस्त्रायफट् इतिषडंगेविन्यस्यध्यायेत्

DR. BHAU DAJI LAD MUSEUM ORIENTAL MEMORIAL

जपाकुसुमसंकाशांधनुर्बाणधरांस्मरेत् नानालंकारसुभगांमोहयंतींजगत्त्रयं ममंडूकायनमः कं
कालात्मनेनमः प्रकृत्यैनमः आधारशक्त्यैनमः ४ इतिध्यात्वामानसंपूजयित्वामूलेनार्घ्यपरि
कल्प्यपुष्पेणार्घ्यजलेनपीठंसंप्रोक्ष्यपीठपूजांकुर्यात् ४ कूर्मायः अनंतायः वाराहायः पृथिव्यैः स
धार्णवायः रत्नद्वीपायः कल्पकोद्यानायः चिंतामणिमंडपायः श्वेतछत्रायः रत्नवेदिकायनमः रत्न
सिंहासनायः तस्याग्नेयादिकोणचतुष्टयेधर्मायः ज्ञानायः वैराग्यायः ऐश्वर्यायः सिंहरस
नस्यप्रागादिदिक्षुचतुर्षुअधर्मायः अज्ञानायः अवैराग्यायः अनैश्वर्यायः मध्येमायायैः वि
द्यायैः अनंतायः पद्मायः कंदायः पत्रेभ्यः केसरेभ्यः कर्णिकायैः अर्कमंडलायः सोममंडला
वह्निमंडलायः सत्त्वायः रजसेनमसेआत्मनेः परमात्मनेः ज्ञानात्मनेः अग्न्यादिचतुष्टयेज्ञानात्म
त्मनेः मायात्मनेः कलात्मनेः विद्यात्मनेः मध्येपरतत्त्वात्मनेः इतिसंपूज्य
अष्टदलकेसरेषुस्वाग्रेमारण्यमोहन्यैः शोभण्यैः वशिन्यैः संभिन्यै क्षोभ्यैः
मथेक्लेदिन्यैः इतिपीठशक्तीःसंपूज्यक्लीं सर्वशक्तिकमलासनायनमः इतिसमस्तंपीठंसंपूज्य
कराभ्यांपुष्पांजलिंगृह्यहृदयकमलात्यधोमुखरूपांतेजोमयीकामेश्वरीकरस्थपुष्पांजलौ
सुषुम्नावर्त्मनावामनासापुटद्वारेणनिःसार्यकुंडमध्यस्थयंत्रमध्येपुष्पांजलिंक्षिपेणआत्मा

ह्याकाहनादिपरमीकरणं ततन्मुद्रयाविधाय प्राणप्रतिष्ठांकृत्वाधनुर्बाणपाशांकुशयोनिमुद्राः प्रदर्श्यस्वसमा
नवर्णायुधभूषणादियुक्तकामेश्वरयुतं सवामांऋतुमतींकामेश्वरीध्यात्वाआसनंसमर्पयामि
युपचारैरभ्यर्च्यकूटकामेश्वरीश्रीपादुकांपूजयामिइतिकर्णिकायांसंपूज्यतस्याःदक्षवामयोःद्वांद्रा
यणीश्रीपा०द्रींक्लोम्निणीश्रीपा०इतिकर्णिकायांतःसंपूज्य त्रिकोणेषुकूंवशीकरिणीश्रीपा०अग्र
कोणे बूंआकर्षिणीश्रीपा०दक्षकोणेसःसंमोहिनीश्रीपा०वामकोणेइतिसंपूज्यषट्कोणेषुदेव्या
द्यादिपादक्षिण्येनषडंगानिपूजयेत् ततोअष्टदलेषुदेव्याद्यादिपादक्षिण्येनअंगानंगरूपिणीश्री
पा०अनंगमदनाश्रीपा०अनंगमन्मथाश्री०अनंगकुसुमाश्रीपा०अनंगमदनातुराश्रीपा०अ
नंगक्षोभिराश्रीपा०अनंगमेखलाश्रीपा०अनंगरोपिकाश्रीपा०इतिसंपूज्य चतुरस्रप्रथमवीथ्यां
लोकपालान्संपूज्यद्वितीयवीथ्यांतदस्त्राणिचसंपूज्यकामबीजेनधूपादिनाबलिंतानुपचारा
न्परिकल्पयेत् योनिमुद्रयाप्रणमेत् ततस्तत्रअग्निस्थापनंकुर्यात् सुवर्णरजतताम्रनूत
नमृण्मयपात्राण्यतमेपात्रेअरणिमवंरसूर्यकांतादिमण्यूद्भवंवोहपाषाणोद्भवंवाश्रीयंत्र
हात्अस्त्रेणाग्निमादायकवचमंत्रेणसजातीयपात्रांतरेणविधायअग्निमानीयास्त्रमंत्रेणपी
ष्ट्वापिधानपात्राण्यिष्कास्यक्रव्यादेभ्योनमः इतिवायवेनक्रव्यादांशमेकमंगारनैर्ऋत्येत्यजेत्

ऋंयंप्रमावास्यंरमशानस्थंअइतिनमूक्षकमंशंत्यजेत् अवशिष्टंदेवीभ्यांस्वपुरतःसंस्थाप्यमूलमंत्रेण
वीक्ष्यमूलास्त्रमंत्रेणप्रोक्ष्यअस्त्रेणावकुंठ्यत्रीन्ताउंयेमूलकवचेनाष्टधुत्प्रणवेनाभिमंत्र्यधेनु
मुद्रयामृतीकृत्यमूलास्त्रेणसंरक्ष्यकवचेनावगुंठ्यंजानुप्यामवनीगत्वा तमात्रंकराभ्यामादायकुंडस्यो
परित्रिःपरिभ्राम्यप्रणवमुच्चरन्कामेश्वर्यःयोनौकामेश्वरस्यबीजमितिध्यायन्स्वाग्निमुरुकुं
डमध्येअग्निंनिक्षिप्यकामेश्वरकामेश्वर्योरात्मनेदंतास्वनाभिमंडलेजठराग्निंसंचिंत्यस्वब्र
ह्मरंध्रेअग्निषोमात्मकंमहाबिंदुमध्यगंबोधदग्निंसंचिंत्यसुषुम्नाकर्मनाजठराग्निंविद्यौसं
योज्यतोवहन्नासाध्वनानिःसार्यकुंडमध्यस्थपार्थिवाग्नौसंयोज्यकामेश्वरीगर्भवह्निमूर्तिसंचिंत्य
मूलविद्योच्चार्यसोहंवह्निचैतन्यायनमः इतिहस्तांमूर्तौवह्निचैतन्यंस्वहृदयात्उद्भवमुद्रयासंयोज्य
उद्भवमुद्रयाघ्रंगुल्यग्राणिसंयोज्यऊर्ध्वीयाणितुदेवीकः पुनःप्रसारयेत्प्रेउद्भवाख्यामवेक्षि
वे अंजलोकनिष्ठमूलेअंगुष्ठयोगात्उद्भवमुद्राइतिकेचिदाहुः क्रींवह्निमूर्तयेनमः इतिवह्नि
मूर्तिसंपूज्यतदुपरिकुशानास्तृष्टकाष्टसकलानिनिक्षिपेत्तत्पिंगलहननदहदहपंचपंचसर्वज्ञा
पयस्वाहाइतिमंत्रेणमुखेनफूत्कृत्यतमग्निंप्रज्वाल्यअग्निंप्रज्वालितंवंदेजातवेदहुताशनं सु
वर्णवर्णमनलंसमिध्मंसर्वतोमुखं इतिज्वलंतंअग्निंउपतिष्ठेत् तिष्ठनूवह्निंप्रणम्यस्वासनेउ

पवित्रैस्त्रयवक्ष्यमाणवह्निमात्रेणप्राणायामत्रयंकृत्वाऋगुरुषयेनमः शिरसि गायत्रीछंदसे
नमः मुखे अग्नयेदेवायेनमः हृदिहोमार्थेविनियोगः इतिकृतांजलिर्वदेत् सहस्रार्चिषेहृदया
यनमः स्वस्तिपूर्णायशिरसेस्वाहा उत्तिष्ठपुरुषायशिखायैवषट् धूम्रव्यापिनेकवचायहुं।
सप्तजिह्वायनेत्रत्रयायवौषट् धनुर्धरायअस्त्रायफट् इतिषडंगेविधाय जिह्वान्यासंकु
र्यात् स्त्रूंहिरण्यायेनमःलिंगे प्रूंगगनायेनमःगुदे श्रूंरक्तायेनमःशिरसि व्रूंरक्ताये
मुखे ल्रूंसुप्रभायेनासिकायां र्यूंबहुरूपायेनेत्रयोः पर्यूंअतिरक्तायेसर्वांगे इ
तिजिह्वाबीजैर्न्यसेत् जिह्वाबीजानियथावह्निरोचिर्विशेषयुक्ताः स्वादियंताःसबिंदवः
वर्णमंत्राःसमुद्दिष्टाः जिह्वानांसर्वदेवीनांवह्निरेफः ईरोवायुर्यकारः अर्धीशःश्रीकं
ठादौऊकारः एभिस्त्रिभिर्वर्णैःसंयुक्ताःसकारायंताःविलोमनसप्तवर्णाःउक्ताःतेस
प्तवर्णाःप्रथमयोज्याः रेफयकारयोःप्रांतेउकारयोगः तदुपरिबिंदुरनुस्वरः एवंसप्तजि
ह्वाबीजानि जिह्वास्तास्त्रिविधाःप्रोक्ताःगुणभेदेनकर्मसु हिरण्यागगनारक्तरूक्षान्या
गलोहितानंतरंश्वेताधूम्रिनीचरकालिकाः राजस्योरसनावह्निर्विहितोकाम्यकर्मसु
विश्वमूर्तिस्तदुद्दिष्टिस्तिन्योधूम्रवर्णामनोजवा लोहितान्याकरालाख्याकालीना
मस्यनिरिताः एताःसप्तनियुंज्यंतेक्रूरकर्मसुमंत्रिभिःसात्विकाःसप्तशुभकर्मणियोज्याः

राम
१६९

सप्तरात्रस्यःकाम्यकर्मसुयोग्यः सप्तनामस्यः मारणोच्चाटनादिषुक्रूरकर्मसुयोज्याः
अथसप्तजिह्वान्यासमाह ॐअग्नयेजातवेदसेनमःमूर्ध्नि ॐअग्नयेसप्तजिह्वायनमःवामस्क
न्धे २ ॐअग्नयेहव्यवाहनायनमःवामपार्श्वे ३ ॐअग्नयेअश्वोदरजायनमःवामकट्यां
४ ॐअग्नयेवैश्वानरायनमःगुदे ५ ॐअग्नयेकौमारतेजसेनमःदक्षकट्यां ६ ॐ
अग्नयेविश्वमुखायनमःदक्षपार्श्वे ७ ॐअग्नयेदेवमुखायनमःदक्षस्कंधे ८ इतिन्य
स्यसप्तजिह्वामुद्राबध्वाष्टशक्तिस्वरूपिकाःनिमुचेदीर्घदीप्तिधी
रयंतंजपात्रं हेमकल्पंपद्मसंस्थंत्रिनेत्रंध्यायेद्दक्षिबध्नमौलिंजयाद्यैः दृष्टवरं
त्रीक्तिःसेहधीसंततिलोकेहेमनिर्मितंसत्रीकंअग्नीतिरमयं एवंध्यात्वास्रुक्स्रुवौ
आज्यस्थालीप्रणीतप्रोक्षणीपात्रंबाहुमात्रसमित्पंचलूनमूलकुशमुष्टीपवित्रत्र
यंघृतेनाज्याद्यानिद्रव्याणिद्रव्याधारणादिबलिद्रव्याणिचयोगोपकरणानिसंपाद्यकुंडस्योत्त
रभागेकुशास्तरेस्रुगादिपात्राणिअधोमुखानिसंस्थापयेत्अन्यानिद्रव्याणिचयथाय
थंनिधाय नमःप्रणीतपात्रंप्रक्षाल्यस्वपुरतःकुशास्तरेनिधायकुशोदकेनपूर्यंगं
धाक्षतान्निक्षिपेत्तत्रापवित्रमुत्तरार्द्धेनिधायउत्तानाहस्तद्वयांगुष्ठानामिकाभ्यां

पवित्रायप्रक्षाल्यविधृत्यअधोमुखोहस्तोरक्षाअस्त्रमंत्रेणतज्जलेविंदुंपवित्रमध्येनभूमौत्रीं
निक्षिप्य तत्रघृतंघृतेविंदुंदत्वापाणिभ्यांसामस्तकंमुखंकुंडस्योत्तरेकुशास्तरेतत्साग्रं
निधायतदुपरिकुशान् निक्षिपेदितिप्रणिताप्रणयनं ततःप्रोक्षणीपात्रंप्रक्षाल्यस्वपुरतः
कुशास्तरे निधाय तज्जलोदकेनाप्यर्थतत्रप्रणीताजलंकिंचित्निक्षिप्य प्राग्वत्पवि
त्रंतत्रनिधायप्राग्वत्पवित्रेणोत्तरंनृक्षालनेनोदकेनहोमोपकरणानि प्रोक्ष्यतत्रत्यं
दक्षिणेकुशास्तरेस्थापयेत् ततःप्रोक्षणीपात्रेजलेनवह्निमेरवलोपरिस्वपरिषिंचयम
ध्यमेरवलोपरिदुदगग्रेःप्रागग्रेश्चदर्भैरीशानादिशानांतंप्रादक्षिण्येनपरिस्तीर्यतत्र
स्वदक्षिणेब्रह्मासनमास्तीर्यअमुकदैवज्ञामकर्मणिअमुकगोत्रोअमुकशास्त्राध्यायीअमुकशर्मा
त्वामहंवृणेतत्कर्मसुसम्यक्त्वंब्रह्मासनेतिब्राह्मणमुपवेश्यतदभावेकुशावटुंवापूजयेत् ततःकुंड
ध्येकामेश्वरीगर्भेवह्निंसंचित्यतत्रत्रिकोणषट्कोणाष्टदलंवृत्तंचतुरस्रंवह्निमंअ
ग्निमंडलंविभाव्यतत्रआधारशक्त्यादिशानांतंपर्यंतंपीठंसंपूज्यअष्टदलकेसरेषुमध्येवस्वा ॥ राम
द्यादिप्रादक्षिण्येनपत्रशक्तीःपूजयेत् पीतायैनमः श्वेतायै०अरुणायै०कृष्णायै०धूम्रायै० १६२
नीलायै०संकुलिन्यै०स्थूलायै०ज्वालिन्यै०इतिवह्नेःपीठशक्तीःसंपूज्य वैश्वानरंत्रिनेत्रंअरुण



णप्रभंशुक्लांबरंरक्तरक्तभूषणंपद्मसंस्थितंवरदशक्तिंस्वस्तिकंअक्षमालांचदधतंअनेकहेमभू
षणंपीठमध्येध्यात्वाआसनंदत्वासंस्थापनादिपरमीकरणांतंतन्मुद्रयाविधायसप्तजिह्वामु
द्रांप्रदर्श्यवैश्वानरजातवेदइहावहलोहिताक्षसर्वकर्माणिसाधयस्वाहाइतिवह्निमंत्रेणत्रि
कोणांतःपाद्यादिगंधाक्षतपुष्पैरभ्यर्च्यअत्रवह्नेःपात्रादिकंकुंडाद्बहिःपात्रांतरेदद्यात् ततःषट्को
णेषुमध्येवसप्तजिह्वाःपूजयेत् स्रूंहिरण्यपादुकांपूजयामि श्रूंगगनापादुकां०भ्रूंरक्तापा०
व्यूंसुप्रभापा०ल्यूंअतिरक्तापा०मध्येप्रूंबहुरूपापादुकांपूजयामि इतिजिह्वापूज
णं ततःषट्कोणाग्रेषु ॐसहस्रार्चिषेहृदयायनमः ॐस्वस्त्यग्निपूर्णायशिरसेस्वाहा ॐउत्तिष्ठ
पुरुषायशिखायैवषट् ॐधूमव्यापिनेकवचायहुं ॐसप्तजिह्वायनेत्रत्रयायौषट् ॐधनुर्धरा
यअस्त्रायफट् इतिषडंगावरणं ततोअष्टदलमध्येषुस्वाग्रादिप्रादक्षिण्येन आग्नयेजातवेद
सेनमः ॐअग्नयेसप्तजिह्वायनमः ॐअग्नयेकव्यवाहनायनमः ॐअग्नयेअश्वरथायः
ॐअग्नयेवैश्वानरायनमः ॐअग्नयेकौमारतेजसेनमः ॐअग्नयेविश्वमुखायनमः॥
ॐअग्नयेदेवमुखायनमः इतिमूर्त्यावरणं अष्टदलाग्रेषुस्वाग्रादिप्रादक्षिण्येन आद्र
ज्वालिणीपादुकां०इमाहेश्वरीपा०ॐकौमारीपा०ऋंवैष्णवीपा०ॡंवाराहीपा०ऐंइंद्राणीपा०

ओं वामुंडापादुकांपूजयामि अ:महालक्ष्मीपा० इतिमालणोअवरणं ततश्चतुरस्त्रप्रथमश्री
थ्यां लेंद्रशायनम:इतिलोकपालावरणं ततोवृत्तरस्त्रद्वितीयवीथ्यांवज्रायनम:इतिअस्त्रावरणं।
ततःवैश्वानरजातवेदइहावाहलोहिताक्षसर्वकर्माणिसाधयस्वाहाइतिवह्निमंत्रेणषट्कुंभपादितांबूलं
तानुपचारान्प्रदर्श्यप्रणमेत् ततोस्रुक्स्रुवसंस्कारंकुर्यात्कुशाभ्यांस्रुक्स्रुवौगृहीत्वाअधो
मुखौवामौत्रीःप्रताप्यतोवामेधृत्वादक्षिणेदर्भानादायकुशामूलेस्रुचोर्मूलंकुशामध्येनस्रुचो
र्मध्येकुशाग्रेस्रुचोरग्नेरिपरिभ्रम्यप्रोक्षणीजलेनप्रोक्ष्यपुनस्त्रीःप्रताप्यदर्भान्अग्नेप्रक्षिपत
योरध:वामकरंरूत्वाऊर्ध्वमुखौतोमूलाग्रयोर्मांबालाविद्ययात्रिरग्निमंत्रितयोर्मूलेएंआत्मतत्वा
यनम:तयोर्मध्येह्रीं विद्यातत्वायनम:तयोरग्रेसौंशिवतत्वायनम:इतिष्टथक्ष्टथक्त्रिन्यस्यस्रुचि
हीनम:स्रुवेहींनम:इतित्रिन्यस्यहृन्मंत्रेणतयो:कंठदेशेत्रिर्नुतिरूपेणस्रुत्रेणपृथक्पृथक्त्रीःप्रदक्षि
णंसंवेष्ट्यगंधादिभि:संपूज्यस्वदक्षिणभागेकुशास्तरेस्रुचंत्रिवारंप्रोक्ष्यस्थापयेत् ततः
आज्यस्थालीमस्त्रमंत्रेणप्रक्षाल्यस्वपुरतःकुशास्तरेनिधायतस्यांउत्तरार्द्धेपवित्रेनिधाय॥ राम
मूलेनवीक्ष्यमूलास्त्रेणप्रोक्षणीजलेनप्रोक्ष्यअस्त्रेणैवकुशैरुद्धृत्यसंताड्यकवचेनाभ्यर्चयेत्ति १६३
वतु:संस्कारैःसंस्कृत्यतत्रैवाधस्कृत्वाधिस्कृत्योधितंगृह्यघृतमादायमूलविद्ययात्रिरभिमंत्र्यावेक्षि



निधेनुमुद्रयामृतीकृत्यतत्रैवेष्टदेवतांसंचिंत्यषट्संस्कारंकुर्यात्कुंडादग्नानुधृत्यकुंडस्यवायव्य
कोणेकृत्तिकाभ्योनमोनिरीक्षणंतदुपरिहृन्मंत्रेणआज्यस्थालीनिधायपक्षतापनसंस्कार:
ततःदर्भयुगलंअग्नौसंदीप्यदग्धायेनमा०ज्येनहृन्मंत्रेणनिरीक्ष्यअवलोक्यमग्नौक्षिपेदि
तिपवित्रीकरणं ततःदर्भयुगलेअग्नौसंदीप्यकवचमंत्रेणआज्योपरित्रिभ्रामयित्वाअग्नौविसर्ज
येदितिअभिघोतनं २ पुनस्त्रीन्दर्भान्प्रज्वाल्यअस्त्रमंत्रेणाआज्योप्रदर्श्यअग्नौक्षिपेदिति
उद्योतनं ४ ततोआज्यस्थालीउत्तरत:उद्धास्यस्वाग्नेकुशास्तरेस्थापयेत्पृथक्कृतानंगारा
न्अग्नौसंमेल्यप्रणिताजलंस्रुचेत्रादेशमितानत्रीन्कुशान्अंगुष्ठाअनामिकाभ्यां
गृहीत्वाअस्त्रमंत्रेणतैःसरुद्धृतस्यउत्तरतःकुर्यात् इतिउत्सवनं ततःकुशाग्रैःस्वाभिमु
खंहृन्मंत्रेणघृतसंप्लावनंकृत्वादर्भानग्नौक्षिपेदितिसंप्लावनं इतिषट्संस्कारैःघृतंसंस्कृ
त्य ततोआज्यस्थाल्योरागयेपवित्रंनिधायद्वौभागौकृत्वादर्भानग्नौक्षिपेदितिकृत्वा
दक्षिणभागंशुक्लपक्षवामभागंकृष्णपक्षंसंचिंत्यवामभागेरुद्रंदक्षिणपिंगलांमध्येस्रु
ग्नोर्विभाव्यहृन्मंत्रेणदक्षिणभागात्स्रुवेणाज्यमादायअग्नयेस्वाहाअग्नयइदंनमम
इत्यग्नेर्दक्षिणनेत्रेहुत्वापुनर्वामभागात्आज्यमादायसोमायस्वाहासोमायइदंनमम

इतिवदूर्वामनेत्रेहुत्वापुनर्मध्यात्आज्यमादायअग्नीषोमाभ्यांस्वाहाअग्नीषोमाभ्यांइदंनमम
इतिवदूर्ध्वोलनेत्रेहुत्वापुर्वत्रिणभागात्आज्यमादायअग्नयेस्विष्टकृतेस्वाहाअग्नयेस्विष्टकृ
तेइदंनममाइतिवदूर्ध्वमुखेहुत्वात्रिस्राहुतिवत्तुष्टयहोमेनवदूर्ध्वनेत्रत्रयवक्त्रोद्धानंभावयेत्
अत्रसर्वत्रस्रुक्वलग्नंहुतशेषघृतंसंपातधारयाप्राक्स्थापितपात्रेनिक्षिपेत् सर्वत्रयजु
क्तपुरुषानन्नाग्नेदद्यात्यागंकुर्यात् ततोॐभूःस्वाहाअग्नयइदंनममा ॐभुवःस्वाहा
वायवेइदंनममा ॐस्वःस्वाहासूर्यायइदंनममा ॐभूर्भुवस्वःस्वाहाप्रजापतयइदंनमम
इत्याहुतित्रयंहुत्वा ततोवैश्वानरजातवेदइहावहलोहितात्क्षसर्वकर्माणिसाधयस्वा
हाइत्यग्निमन्त्रेणआहुतित्रयंहुत्वाअग्नेर्गर्भाधानादिसंस्कारान्कुर्यात् एंअग्नेर्ग
र्भाधानंसंपादयामिस्वाहा ऐंअग्नयेःपुंसवनंसंपादयामिस्वाहा २ एंअग्नेःसीमंतो
यनंसंपादयामिस्वाहा ३ इतिप्रतिकर्माणिआज्याहुत्यष्टकंहुत्वाकामेश्वरीगर्भान्त
रेप्रागुक्तरूपंवह्निंध्यायेत् एंअंग्नेर्जातकर्मसंपादयामिस्वाहा ४ इत्याज्याहुतिहु
त्वावह्नेर्नीलछदंदत्वामूलकंसंशोध्य एंवह्नेर्नामकर्मसंपादयामिस्वाहा ५ इत्याहु
त्याज्याहुतिहुत्वाकामाग्निरितिनामपरिकल्प्यनेत्रांतरेपार्थिवाग्निरितिनामकृत्वाकामे

डाक्टर भगवानदास आर्काइव्स संग्रहालय
MEMORIAL

श्वरीकामेश्वरोतद्वीजेनपंचोपचारैःसंपूज्यप्रणम्यविसृज्य एंवह्नेःनिःक्रमणंसंपादयामिस्वा
हा ६ एंवह्नेःअन्नप्राशनंसंपादयामिस्वाहा ७ एंवह्नेःश्मश्रुकर्मसंपादयामिस्वाहा ८ एंवह्नेः
रूपनयनंसंपादयामिस्वाहा ९ एंवह्नेःमहानाम्न्यंसंपादयामिस्वाहा १० एंवह्नेःमहाव्रतंसंपा
दयामिस्वाहा ११ एंवह्नेरूपनिषदंसंपादयामिस्वाहा १२ एंवह्नेःगोदानंसंपादयामिस्वाहा
१३ एंवह्नेःसमावर्तनंसंपादयामिस्वाहा १४ एंवह्नेःविवाहंसंपादयामिस्वाहा १५ इतिप्रति
कर्माण्याज्याहुतिहुत्वा गर्भाधानादिविवाहांतान्पंचदशसंस्कारान्शुभकर्मसुकुर्यात् क्रूरक
र्मसुअग्नेर्मृतिसंपादयामिस्वाहाइतिमरणांतान्षोडशसंस्कारान्कुर्यादिति महानाम्न्यःसोम
पःबलकारिव्रतंमहाव्रतनामाव्रतंउपनिषदंवेदपाठार्थंव्रतंततोमूलायघृतप्लुतसमित्संवर्कंतू
ष्णींजुहुयात् ततःस्त्यूंहिरण्यायेस्वाहा श्रूंगगनायेस्वाहा श्र्यूंरक्तायेस्वाहा ब्रूंकृष्णायेस्वा
हा ल्पूंसुप्रभायेस्वाहा रद्रूंअतिरक्तायेस्वाहा यप्रूंबहुरूपायेस्वाहा ॐसहस्रार्चिषेहृदया
यनमःस्वाहा ॐस्वस्तिपूर्णायशिरसेस्वाहा ॐउनिष्टपुरुषायशिखायैस्वाहा ॐधूम्रव्यापि
नेकवचायस्वाहा ॐसप्तजिह्वायनेत्रत्रयायस्वाहा ॐधनुर्धरायअस्त्रायफट् अग्नयेजा

जातवेदसेस्वाहा ॐ अग्नयेसप्तजिह्वायस्वाहा ॐ अग्नयेकव्यवाहनायस्वाहा ॐ अग्नयेअथो
दरायस्वाहा ४ ॐ अग्नयेवैश्वानरायस्वाहा ५ ॐ अग्नयेकौमारतेजसेस्वाहा ६ ॐ अग्नयेविश्व
मुखायस्वाहा ७ ॐ अग्नयेदेवमुखायस्वाहा ८ ओंब्राह्म्यैस्वाहा १ ईंमाहेश्वर्यैस्वाहा २ ऊंको
मार्यैस्वाहा ३ ऋंवैष्णव्यैस्वाहा ४ ॡंवाराह्यैस्वाहा ५ एंइंद्राण्यैस्वाहा ६ ओंचामुंडायैस्वाहा ७
ॐयंवींयैंमहालक्ष्म्यैस्वाहा ८ लेंइंद्रायस्वाहा १ रंअग्नयेस्वाहा २ यंयमायस्वाहा ३ क्षंनिऋ
तयेस्वाहा ४ वंवरुणायस्वाहा ५ यंवायवेस्वाहा ६ संसोमायस्वाहा ७ हंईशानायस्वाहा ८
ओंब्रह्मणेस्वाहा ९ ह्रींअनंतायस्वाहा १० ॐवज्रायस्वाहा ११ ॐशक्तयेस्वाहा २ ॐदंडायस्वा
हा ३ ॐखड्गायस्वाहा ४ ॐपाशायस्वाहा ५ ॐअंकुशायस्वाहा ६ ॐगदायैस्वाहा ७ ॐ
त्रिशूलायस्वाहा ८ ॐपद्मायस्वाहा ९ ॐचक्रायस्वाहा १० इतिवज्रनिर्झांगावृतिदेवता
नामेकैकमाज्याहुतिंहुत्वा ततोस्रुवेणस्रुचिवतुर्वारंघृतमापूर्यअधोमुखंश्रुवंश्रुचिनि
धायउद्धृत्यवैश्वानरजातवेदइहावहलोहितनाक्षसर्वकर्माणिसाधयवोषट् नेइतिमंत्रेण
हुत्वाउपविश्य अत्रहोमेवज्रमंत्रेस्वाहास्थावोषट् इतिततोपुनःस्रुवेणॐस्वाहा १ ॐ
श्रीस्वाहा २ ॐश्रींह्रींस्वाहा ३ ॐश्रींह्रींक्लींस्वाहा ४ ॐश्रींह्रींग्लौंस्वाहा ५ ॐश्रींह्रींग्लौं

गंस्वाहा ६ ॐश्रींह्रींग्लौंगंगणपतयेस्वाहा ७ ॐश्रींह्रींक्लींग्लौंगंगणपतयेवरवरदस्वाहा ८
ॐश्रींह्रींक्लींग्लौंगंगणपतयेसर्वजनंमेवशमानयस्वाहा ९ ॐश्रींह्रींग्लौंगंगणपतयेसर्वजनंवरवरद
सर्वजनंमेवशमानयस्वाहा १० इतिदशाधिभक्तेनमहागणपतिमंत्रेणदशाज्याहुति
हुत्वासमस्तेनमहागणपतिमंत्रेणआहुतिचतुष्टयंजुहुयात् महागणपतयेइदंनममा
सर्वत्रआहुतिस्रुवेणैवजुहुयात् गर्भाधानादिसंस्कारहोमेप्रतिसंस्कारेअष्टाहुतिहोमा
न्नाक्तोआहुतित्रयंएकांवा २ जुहुयात् इतिअग्निमुखं ७ ततोमूलविद्ययाप्राणायामत्रयंकृ
त्वामूलविद्यायाःऋष्यादिकरषडंगन्यासंकृत्वाधेनुमुद्रांप्रदर्श्यपीठन्यासंकुर्यात्
षट्कवतुःपीठवत्तत्तल्लाक्ष्यन्यासषट्कंविधायध्यात्वामानसपूजांतेप्राग्वत्अर्घ्यपात्रस्थापनं
कृत्वाअंतर्यागंविधायवह्निमुखेश्रीचक्रंध्यात्वाप्राग्वत्पीठपूजांकृत्वामूलेनिष्कल्पयित्वातत्रप्राग्व
न्मूलदेवीमावाह्यआवाहनादिमुद्राःप्रदर्श्यसर्वोपचारैःसंपूज्यप्राग्वत्तिथिनित्यादिसमस्तावा
रणदेवताश्चेदंसंपूज्यसंतर्प्यवह्निरूपीदेवीध्यायन्स्रुचावेणमूलविद्ययाघृतेःपंचविंशत्याहु
तीर्हुत्वावह्निदेवतायोर्वैकैकीकरणंविधायवह्निदेवतयोस्वात्मनासहैक्यंविभावयन्
मूलविद्यानाडीसंधानार्थंएकादशाज्याहुतिंहुत्वातिथिनित्यागुरुपंक्तिषडंगयु

वतिनावरणदेवताः पंचपंचिकाः पंचविंशतिसंहासनैविद्याः आम्नायसमयदेवताः षट्दर्शनदेवता
लोकपालदेवताअस्त्रदेवताश्चप्रत्येकंतत्तन्नामांतेतत्तन्नामांतेश्रीपादुकांपूजयामीत्यादितत्
न्नामभिर्मंत्रैश्चप्रत्येकंपृथक्पृथक्माज्याहुतीर्हुत्वासमष्टिमंत्रेणत्रीन्हुत्वापुनर्मूलमंत्रेणदद्याः
गंधपुष्पधूपदीपनैवेद्यसमर्थविलिदेवतामंत्रैः स्वाहांतैरेकैकामाज्याहुतिंहुत्वादद्यैः पु
ष्पांजलिंसमर्पयेत् योनिमुद्रयाप्रणम्यक्षमापयेत् ततोस्वाहांतयामूलविद्ययाथथोक्तद
व्यैःपूर्णांगदद्याद्धोमंयथासंख्याज्जुहुयात् होमद्रव्याणितु घृतान्नपायसतिलतंडुलतदुप
युक्तंकिंशुकपुष्पाणिकुसुमानिबिल्वदलानिरक्तपुष्पाणिसुगंधिपुष्पाणिषडक्षरं
घृतमेतत्सर्ववैकात्रिमधुयुक्तंहोमःकार्यः एवंस्विष्टहोमंसमाप्यन्यूनातिरिक्तपरिपूर्ण
र्थमहाव्याहृतिहोमंकुर्यात्॥ॐभूरग्नयेवरदायेवमहतेवस्वाहाअग्नयइदंनमम
ॐभुवोवायवेवांतरिक्षायवमहतेवस्वाहावायवेइदंनममा ॐस्वरादित्यायवदिवे
वमहतेवस्वाहा आदित्यायइदंनममा ॐभूर्भुवस्वश्चंद्रमसेवनक्षत्रेभ्यश्चंद्र
मश्चमहतेवस्वाहाचंद्रमसेइदंनममा इत्योन्याहुतिंहुत्वापूर्णाहुतिंजुहुयात् ततोद्रव्यं
पूर्वंप्राणबुद्धिदेहधर्माधिकारतोजाग्रत्स्वप्नसुषुप्तावस्थास्वमनसावाचाकर्मणा

हस्ताभ्यांपद्भ्यांमुदरेणशिश्नायस्मृतंयदुक्तंयत्कृतंतत्सर्वंब्रह्मार्पणंभवतुस्वाहा इतिनिवेद्यार्पि
णमंत्रेणकर्मबंधविमुक्त्यर्थंआत्मनाप्यहुतिंहुत्वाद्विर्मंत्रेणपुनःप्रोक्षद्विर्मंत्रेणपुनःप्रोक्ष्य मू
त्रादिर्मंत्रानेनानमस्तरूपधृक् सर्वोत्तीर्णसर्वगतेपावकायनमोस्तुते त्वंरौद्रोघोरकर्मा
घोरहालंनमामिते विघ्नंलोकपालोत्सिद्धांतिमंत्रप्रयत्नमे न्यूनातिरिक्तपूर्णार्थंदद्यामिस
घृततिलं ॐहुंसांगंकुरुकुरुस्वाहा इतितिलैरेकाहुतिंहुत्वा स्रुवेणश्रुविघृतमाप्लुत्यतद्
ग्रेकुशपुष्पपुंगीफलादिकंवनिक्षिपतद्ध्वेअधोमुखंश्रुवंनिधायत्रांखवलंसंपुटाभ्यांस्रु
कंश्रुवंगृहीत्वाउत्तानायतऋजुकायःतयोर्मूलेस्वनाभौनिधायवामपादमग्रेकृत्वामूलविद्या
मुच्चार्यनमःइतिदेव्याःमुखकमलेपरामृत्यजुह्यात् इतिपूर्णाहुतित्रयंनमोंतम
लविद्ययाहुत्वाउपविश्यदेवीसंपूज्यप्रणम्यक्षमस्वेतिस्वेश्वरीमुद्रांप्रदर्श्यसंहारमुद्र
यात्मनोविसर्जनं ततोद्विर्मंत्रेणपूजांपुष्पंवकृत्वामहाशक्तिसर्वकर्मप्रसाधकम
मांतरेपिसंतिष्ठेसन्निधीकुरुसादरं इतिद्विर्मंत्रार्घ्यंप्रणम्यतंस्वा॥स्मनिविसर्ज्य
परिवारमात्मन्यग्नौप्रक्षिप्यविसृजेद्वदनंकुर्यात् अथातःसंप्रवक्ष्यामियदुक्तंपद्म
योनिना ब्राह्मणानांहिनार्थायसंस्कारार्थंनुमानिनं लोकेकःपावकाद्यग्निःप्रमथःपरिकीर्तितः

अग्नेस्तुमारुतोनामगर्भाधानेभिधीयते २ पुंसवनेचांद्रमसश्वेतिस्तुपेकर्मणिशोभने ३
मंतेमंगलोनामप्रगल्भीजातकर्मणि ३ नाम्निवैपार्थिवोह्यस्यैग्निःप्राशनेतुशुचिस्तथा ४
प्यनामाथचौलेतुव्रातोदेवोसमुद्भवः ४ गोदानेसत्यनामातुकेशांतेअग्निरुच्यते वैश्वानरो
विसर्गेतुविवाहेजयोजकःस्मृतः ५ चतुर्थ्यांतुत्रिरावीनाम सथ्ये
मवोह्येयोवैश्वदेवेतुऊष्मकः ६ ब्रह्मौवैगार्हपत्येस्यात्रईश्वरोदक्षिणेतथा विष्टरलुराहवनी
येस्यात्अग्निहोत्रेत्रयोग्नयः ७ प्रातःसूर्यायस्वाहेतिसायमग्निस्तुहूयते लक्षहोमेवह्नि
नामकोटिहोमेमहानाशनः ८ प्रायश्चित्तेविधिश्चैवपाकयज्ञेतुसाहसः देवानांहव्यवाह
स्तुपितृणांकव्यवाहनः ९ पूर्णाहूयोमडोनामत्रोतिकेवरदस्तथा पोष्टिकेबलदश्चैवक्रोधा
ग्निश्चाग्निर्वाकेरके १० वश्यार्थेविमदोनामवदाहेतुदूतकः कोष्टेतुजठराग्निस्तुक्रव्यादो
मृतभक्षणे ११ समुद्रवाडवोज्ञेयःक्षयेसंवर्तकोमतः एतेग्नयःसमाख्याताःतोषयेद्बल
पाःसदा १२ सप्तत्रिंशत्तविख्याताध्यातव्यास्तद्विजोत्तमैः नविदित्वातुयोह्यग्निंहोमयेत् राम
दविचक्षणः १३ नहुतंनवसंस्कारोनूतकर्मफलंभवेत् ध्यानानुरूपंआग्नेयंयोग्नेरा १६७
राधनंचरेत् १४ ऐहिकामुष्मिकाकर्मेःसारथिस्तस्यपावकः पावकस्यमुखंवक्ष्येयदुक्तं

पद्मयोनिना १५ सप्तजिह्वाप्रमाणंतुप्रोद्दिष्टांपरिकीर्तितं प्रमाणंचतुरस्रंवर्तुलंमुखमंडलं १६
गर्भाधानादिमारुतअग्नेगर्भाधानंसंपादयामिस्वाहाइतिप्रयोगः नंत्रांतरोक्ताःग्रहणो अग्नयोपि
श्वेतोग्निःपिंगलश्चैवधूमकेतुस्तथापरः जठरःशिखिनामावहाटकोग्निस्तथैवच महातेजा
हुताशोग्निरोहितोवेतथापरः ग्रहणामग्नयोह्येतेकथिताःशुभहेतवे इतिअग्निविचरः इतिसु
रश्चरणांगोनित्यहोमः अथकाम्यहोममाह नडुत्कंशानार्णवे नित्यहोमंततःप्रोक्तंकामनाहोम
माचरेत् जातिकामलीकुरुमैर्मधुमिश्रैतैः १ धनरत्नैकृतेदेवीवाग्वीशत्वंप्रजायतेमकरस्थापिहिमू
दस्यशीलारूपस्यनान्यथा २ जपापुष्पैराज्ययुक्तैकरवीरैस्तथाविधैः हवनान्मोहयेन्मंत्रीत्रैलो
क्यमपिसुंदरिं ३ कर्पूरंकुंकुमंदेवीमिश्रंमृगमदंनहि हवनान्मदनःसाक्षात्संत्रीणांविजितो
भवेत् ४ सौभाग्येनविलासेनसामर्थ्येनापिसुव्रते चंपकैःपाटलैर्हुत्वाश्रियंप्रोत्फुल्लितांपरा
५ मंत्रीप्राप्नोतिमहतीलक्षमयेत्जगतीमिमां श्रीखंडंगुग्गुलंचंद्रमुरंहोमयेत्ततः ६ राज्ञो नागां
द्रदेवानांपुरंस्त्रीणांवशंनयेत् सर्वलोकावशंयातिस्तंभयत्येवनसंशयः ७ लक्षहोमाद्वेद्राज्यं
दारिद्र्यभयपीडितः दुर्गोपसर्गशमनंपलत्रिमधुहोमतः ८ खेचरोजायतेरात्रौरुत्साहोमंचतु
पथे क्षीरंदधिमधुघ्राज्यंष्टयक्तंहुत्वावदानने ९ आयुर्धनमथारोग्यंसमृद्धिर्जायतेनृणां क्रमेण

त्रैलजेक्षीरमधुभ्यांमृत्युनाशनं १० दधिमाक्षिकहोमेनसौभाग्यंधनमाप्नुयात् शिलायाकेवलं
होमंवैरिस्तंभनकारकं ११ होमयेत्तुमधुक्षीरंलाजाभिर्वीरवंदिते रोगहंनाकालहंनामृत्युहंनान
संशयः १२ कमलैररुणैर्होमःसम्यक्संविनदायकः रक्तोत्पलैर्जगद्वश्यंराजानोवशगाःक्षणात् १३
नीलोत्पलैर्महाहृष्टःवशमायोषितान्यथा श्वेतोत्पलैःश्रियंवाचंलभतेहवनाप्रिये १४ श्वेतैश्चूत
सकमलैर्लक्ष्मीसौभाग्यमाप्नुयात् कह्लारहवनान्मंत्रीसौभाग्यंवधनंलभेत् १५ पूर्णाबदरहोम
नवश्रीकुर्यान्महीसुरान् १६ मातुलिंगफलेद्भूतहोमेनक्षत्रियावशाः १७ नारंगफलहोमेनवैश्यव
श्यंभवंतिहि कूष्मांडफलहोमेनभूद्रावश्यमत्यथापरे १७ द्राक्षाफलैःसिध्यतीष्टोलक्षहोमान्नसंश
यः १८ कदलीफलहोमेनलक्षमात्रेणभूपतः १८ वशालुदशसंख्याकाःपक्वेवनसंशयः खर्जूरी
फलहोमेनलक्षमात्रेणभूभुजः वशाःविंशतिसंख्याकाःइत्याज्ञापरमेश्वरी १९ नारिकेलफलैर्होमा
समधिर्जायतेप्रिये २० लक्षमात्रेणमंत्रेशोराजापररवप्रिये पक्वाम्रफलहोमेनलक्षमात्रेणसुंद
रि २१ वनुःसमुद्रपर्यंतांमेदिनीवशमानयेत् पनसस्यफलैर्होमात्लक्षेणवशगाभूभुजः २२ वश्या राम
सर्वेतिदेवेशिनात्रकार्याविचारणा तिलाज्यहोमाद्देवेशिकार्यसिध्यिर्भवेत्प्रिये २३ राजिकाल १६८
वणाक्ष्येलुदुष्टलोकान्वशानयेत् कुंकुमेनाहुतिंदेवीत्रैलोक्यंवशमानयेत् २४ गुग्गुलस्यचहोम

नसर्वान्दुष्टान्विनाशायेत् वैरिणोवशगाःशीघ्रंचंदनस्यापिहोमतः २५ रक्तचंदनहोमेनवश्या
स्त्रिपुरुषस्त्रियः कर्पूरस्यचहोमेनवाग्वशंजायतेनणां २६ कस्तूरीहोमतोदेवीराजानोराजमंत्रिणः व
श्यास्सर्वेतिकेसकलाःपरिवारयुताप्रिये २७ तिलतंडुलहोमेनशांतिर्भवतिमंदिरे शर्करागुडहोमेनच
सर्वकार्यार्थसाधकः २८ घृतपायसहोमेनश्रीलायुर्नामवृद्धिकः त्रैलोक्यवशमायांतिधान्यराशि
मवाप्नुयात् २९ नानाविधान्नहोमेनअन्नसिध्यिमवाप्नुयात् सोपस्कारैश्चवटकैरुपसर्गान्विना
शयेत् ३० बंधूकुंकुमहोमात्सर्वशत्रून्विनाशयेत् जपापुष्पैर्जगद्वश्यंवनपुष्पैश्चमोहनं ३१ पुष्पे
र्बकुलसंभूतेहुतेसौभाग्यमाप्नुयात् केवलंघृतहोमेनवरदास्सर्वशक्तयः ३२ दशांगधूपहोमेन
सौभाग्यमतुलंभवेत् जंबुफलैस्त्रियोवश्याकूष्मांडैर्मुक्तकन्यका ३३ श्रीफलैरतुलालक्ष्मीपत्रैवी
सुरवंदिते इक्षुदंडैःसुरावासिसद्दसाप्राप्यजकन्यका ३४ इतिकाम्यहोमः तथाचमंत्रदर्पणे पद्मा
त्रीमधुरात्रैयेणकुसुमैसिक्तैरशोषान्नरःकामांश्चेत्कपाटलैरपितथाप्राप्नोतिहोमाश्रियं राज्यं
बिल्वदलैःफलैरपितथासौभाग्यमेतोरहेरायुशाद्बलपल्लवैःसहगुडैश्चांतिंसहाज्येतिले १ आ
कृष्टिर्यैरिणानांत्रिमधुरयुतैरर्जुनैःसर्षिषैस्याद्वश्यावश्याश्चवेपुनदुपरिकुसुमैः किंशुकैश्चापिहो
मात् वश्यास्युःकर्णिकारैरथचरणिकराःस्त्रियाःकाश्मर्दैर्वश्यानांकर्तमालैर्गणरहवशा

गःपाटलामिश्रशूद्राः २ नरोमक्ष्यभोज्यान्नपानानिहुत्वापरांसंपदंप्राप्नुयादत्रलोके वटोदुंबराश्व
कुरैःस्रुचावाज्यान्वितैःकल्पितैर्मेलिकाभिर्यजेत् ३ अथहोमद्रव्यप्रमाणमाह नवुंक्षीरदधिनवे
कर्षमात्रेघृतेहोमेशुक्तिमात्रंपयःस्मृतं उक्तानिपंचगव्यानितत्समानिमनीषिभिः १ तत्समेमधुदुग्धा
त्रेअक्षमात्रमुदाहृतं दधिप्रस्थमात्रेस्याल्लज्जास्यमुष्टिसंमिता २ एषुकास्तत्प्रमाणास्युः सक्तवो
पिंडतोदितः गुडःपलार्धमानस्यात्सूक्ष्मराशिलथास्मृता ३ ग्रासाक्षंवरमानंस्यात्तद्भुपर्वविधेः
स्मृतः एकैकंपत्रपुष्पाणिनथापूपानिकल्पयेत् ४ कदलीफलनारंगफलान्येकैकतोविदुः मातु
लिंगंचतुःखंडंपनसंदशधाकृतं ५ अष्टधानारिकेलानिखंडितानिविदुर्बुधः त्रिधाकृतंफलंबिल्वं
कपित्थंखंडितंत्रिधा ६ उर्वारुकफलंहोमेखंडितंखंडितंत्रिधा फलान्यन्यानिखंडानिसमिधस्तु
र्दशांगुलः ७ दूर्वात्रयंसमुद्दिष्टंगुडवीवतुरंगुला द्वीयहोमुष्टिमात्रास्युःसुद्गमाषयवाअपि ८ तं
डुलास्युस्तदर्धांशाःकोद्रवामुष्टिसंमिताः गोधूमारक्तकलमाविहितामुष्टिमानतः ९ तिलाश्चुल्ल
कमात्रास्युःसर्षपास्तत्प्रमाणतः शुक्तिप्रमाणंलवणंमरीचान्येकविंशतिः १० पुरंधरमानंस्याद्धोम
तत्समंस्मृतं चंदनागरुकर्पूरकस्तूरीकुंकुमानिच ११ तिंतिणीबीजमानानिसमुद्दिष्टानिदेशि
कैः घृतेकर्षमात्रेहोतव्यं कर्षलक्षणं माषोदग्रार्धगुंजः षोडशमाषोनिगद्यतेकर्षः सत्तुवर्ण

स्यस्कर्षणस्तेरेपलंचतुर्भिश्चेति अशीतिगुंजापरिमितःकर्षः कर्षचतुष्टयंपलं अक्षःपिंडःकर्षइतिपर्या
यः शुक्तिश्चुल्लकप्रस्तपाणितलमितिपर्यायः एतत्त्रितुष्टयंकर्षमात्रंभवति मुष्टिरपिकर्षमात्राभवति
एतयोस्तोलनेकर्षप्रमाणंमानंभवति पलार्धंकर्षद्वयं द्रवद्रव्यंसर्वंश्रवेणहोतव्यं स्रुक्चस्रुक्कर्षाभ्यां
हीभवति श्रवाभावेशुक्तिचुल्लकादि अत्रउग्धान्नंदुग्धमोदनंपायसंवा दूर्वात्रयंकांडत्रयोत्पन्ना
दूर्वात्रयं इक्षुपर्ववधियेधिद्दयालकंपर्व तथावीजकोशानार्णवे श्रृणुदेवीप्रवक्ष्यामिमानेहवनसिद्धिदं पुष्पं
र्णं नथामनफलादनं ७ नानाशुभ्रांशुकैःशुभ्रसान्नंशुभ्रगोघृतपूरितं॥ नैवेद्यंदद्यादेव्यैनागीश्व
र्यैसकरेश्वरी ८ वाग्भवंवश्यांजपेद्द्वयंवागीशीसंस्मरेद्धुवः कर्पूरधवलांशुभ्रांपुष्पाभरणभू
षितां ९ अत्यंतशुभ्रवस्त्रांवज्रमोक्तिकभूषणां मुक्ताफलामलमणिजपमालालसत्करां १०

पुस्तकेवरदानेवरधनीमभयप्रदां एवंध्यायेन्महेशानीसर्वविद्याधिपोभवेत् ११ मूलादिब्रह्म
रंध्रांतंस्रवत्सीयूषवर्षिणीं तस्माज्ज्योतिर्मयीध्यात्वाजीवाग्रेमृतरूपिणीं १२ पाषाणेन
समोवापि मूर्खोजीवसमोभवेत् जीवेसमोबृहस्पतिसमः अथकामकलासक्तः साधकप
रमेश्वरी १३ रक्तकल्हारसुगंधारक्तगंधानुलेपनः रक्तवस्त्रावृतः सम्यक्समध्यकामाकलां
मना १४ रक्तपुष्पैश्चविविधैः कुंकुमादिभिरर्च्चयेत् मूलादिब्रह्मरंध्रांतंस्फुरद्रूपस्वरूपिणीं
१५ बंधूककुंकुमाकाराकोटिसूर्यसमप्रभां दृक्सूत्रकोदंडपुष्पेषुवरदाभयसत्करां १६ नदीय
कोटिसिंदूरकारिनेभुवनत्रये चिंतयेत्परमेशानित्रैलोक्यमोहयेत्क्षणात् १७ राजानोवशमा
यांतिपन्नगाराक्षसासुराः कंदर्पतुल्यदेवेशियोषितांमनहारिकां १८ बलज्जलेंदुसंकाशांतरुणा
रूपविग्रहां चिंतयेद्यापिनांमध्येक्षोभयेत्सुरसुंदरी १९ किंपुनर्मानुषीदेवीत्रैलोक्यमपिमो
हयेत् एवंविधितादेवीसीदूराभाद्दिस्थिता २० आकर्षयंत्तदाशीघ्रंरमाशापितिलोत्तमां
रक्तवर्णांस्त्रियांध्यात्वानदीयमहसानतः २१ तस्यामूर्ध्वस्मरेद्बीजंस्वयंसीयूषवर्षिणीं ध्याये
न्संमोहयेद्देवीमदनोत्तप्तमानसः २२ क्षणमात्रेणदेवेशित्रैलोक्यंवशमानयेत् शृणुदेवी
प्रवक्ष्यामिशक्तिबीजस्यसाधनं २३ सृष्टिसंहारपर्यंतंशरीरेचिंतयेत्सुरां स्वयंसीयू

षधारामिववर्षंतींविषहारिणीं २४ हेमप्रभाभासमानांविद्युन्निकरसन्निभां स्फुरच्चंद्रकलापूर्णांकल्प
वरदाभये २५ ध्यानमुद्रांवदधतींसाक्षादमृतरूपिणीं ध्यायन्विषंहरमंत्रीनानाकारंव्यवस्थितां
२६ एतस्यास्मरणादेविनीलकंठसमागतः हंअहंमृत्युंजयोस्म्यविश्वासिजलेस्थले २७ वेनते
यसमोमंत्रीविषनाशरसस्मृतः भूतप्रेतपिशाचांश्चनाशयेद्रोगसंचयं २८ वातुर्थिकज्वरान्स
र्वान्अपस्मारांश्चनाशयेत् अथत्रिकूटासंपूर्णांमहात्रिपुरसुंदरीं २९ चिंतितोसाधकस्यास्तु त्रै
लोक्यवशकारिणी तथावानंदहर्यं॥ शरज्योत्स्नाशुभ्रांशशियुतजटाजूटमुकुटांवरत्रासत्राणस्फा
टिकाक्षस्रक्परां सकृन्नत्वांनतांकथमविसमीदंतन्निधतेमधुक्षीरद्राक्षामधुरिमधुरीणामहतीं
यः १ शरज्योत्स्नाशुभ्रां शशरदशिकरनिकरां । शशियुतजटाजूटमुकुटां वरदाभयशूलकपालधरां
मिह पूर्वैः वरः त्रासत्राणंअभयं स्फटिकघटुकास्फाटिकीजपमालो पुस्तकंविद्याकोद्राः ए
नाश्रितस्तोमुद्राश्चधारयंतीं एवंस्तुतांत्वां सकृन्नतासतांकथंनितयः वाचोकथंनसंविदधते
कथंनआविर्भवंति अपिनुआविर्भवंत्येव कीदृशाः वाचः मधुक्षीराद्राक्षामधुरिमधुरीणा
मधुमाक्षिकः क्षीरदुग्धं क्षद्राक्षाएतेषामाधुरिमाधुर्यंतितोमधुरीणः माधुर्यंचूर्वेहाः अतो
महावाग्वादिनीनत्वा अमृतरसनरंगिण्योमणितयोवोभूवंनरस्यर्थः सर्वप्रसिद्धाजागर्ति

सर्वशुक्लासरस्वतीपतिपाग्भवरूपिण्याःध्यानमुक्तं १ अन्येतुकेचित्महात्मानोभगवतीमरुणामेवंवि
त्तयंति ततश्चश्रीचक्रविलासप्रवरोहाग्भवतीतिसिद्धं प्रतत्सख्यापनायानंतरश्लोकमवतारयति कवी
द्राणांवेतःकमलवनबालातपरुचिंभजतेयेसंतःकतिचिदरुणामेवभवतीं विरिंचिप्रेयस्यासर
लतरश्रृंगारलहरीगभीरांमूर्धीभिर्विदधतिसतांरंजनममी १ कवीद्राणांवर्णीपित्रेष्ठनां
वितःकमलवनबालातपरुचिंहृदयपद्माटवीबालार्ककिरणाकारांभगवतीयेकेचित्संतःअरुणां
वभजंते अमीसाधकाः विरिंचप्रेयस्याःसावित्रिदेव्याःअप्येतावर्णिनीनरलतरांनिरंतरोच्छलि
सौभाग्यश्रृंगारलहरीकामरसलक्षितरंगपालिकांतहृद्गभीरांमूर्धार्थेप्रत्यूपपित्रीभिकीर्ति
:पणिभिःसतांसहृदयानांरसिकनांरंजनंमनोह्लादनंधदधतीसंपादयंती हृदयानंदकारियइ
वासेवकविनानाम उक्तंवसाहित्यमीमांसायां कविःपितापोषणातापाठकोरसिकःपितः कविताजुवतेर्भूतासोत्र
श्रविवेकिनः किंवनकविलभधर्मीयमनयेदंडनायवा कुकविलपुनः साक्षान्मरुमाहुर्मनीषिणः किंबहु
नासहृदयसभारंजनकवित्वे श्रीललितामहाभट्टारकवरणारविंदसपर्यैविनास्वप्नेपिदुर्लभमितिनि
श्चितोर्थः २अथावरणदेवताविशेषःपरिरटनत्वेनभावनयाफलांतरंवसमुदयन्निदमाह सवित्रिपि
वीवांशशिमणिशिलापंगरुचिपिर्वशिन्याद्याभिस्त्वांसहजननिसंचिंतयतियः सकर्णीकाया

राम
२३७

नांभप्रविकसितवाग्भवांगिरूपगेर्वेवोपिवीदेवीवदनकमलामोदमधुरैः ३ वावांसविनीपि मातृका
रूपिताभिः वशिन्याद्याभिः श्रीश्रीमहाभट्टारिकावक्रसिंहासनतत्तीयावरणाष्टचक्रदेवताभिरि
त्यर्थः अकचटतपयशवर्गःसहितःसबीजास्तत्राचीर्णे ताभिः पुनःकीदृशीभिः शशिमणिशिला
पंगरुचिभिः चंद्रकांतमणिशकलसमानकांतिधावल्यधवलाभि एताभिःसहयः त्वांसंचिंतयति सः ३
लटाध्यानपदवीप्रारूढमहाकाव्यानांकर्त्रीभवति तन्महाकाव्यकरणेकैरित्याह वेदोपिः किंपुनर्लै
किनांगिरुगैः एकस्मिन्नर्थेनानाविधशब्दशास्त्रनानावेदग्रथितविशेषभंग्यस्ताभिःसुभगोः सं
दरैः पुनःकिंपुनर्लोः वाग्देवीवदनकमलामोदसुधुरैः सरस्वतीमुखारविंदसौगंध्यप्रवाहवरैः एवंभू
तैर्यैर्योभिःमहाकाव्यकर्त्रीरोभवतीति ३ एवंपरमकृपायाःभगवत्याःसर्वेमनुजनवांछितार्थसाध
ननिपुणेसारस्वतंध्यानंप्रकाशितमेव तेनसमस्तविद्यापांडित्यभलाभाद्धर्मोधर्मपुरुषार्थोल
ब्धएवेव चतुर्विधपुरुषार्थेषुआनंदमयःकामपुरुषार्थोसर्वलोकसंमतस्तस्यसंपत्तिःशृंगाररसा
वलंबनरूपास्तरुणीर्विनानसंपद्यते नास्तविपरीताश्चेन्नकश्चनकामिनांरुचखलेत्राः अतए
वतरुणीवशीकरणविधाकामेश्वरीश्रीललिताभट्टारिका तामेवचिंतयतीतरुणीवशीकरणसा
मर्थ्यभवतीत्याह ननुछायापिस्तेतरुणनरणिश्रीसरणिमिर्दिवंसर्वीमुर्वीमरुणमणिमग्नास्मरतिरः

भवेत्यस्य त्रस्यद्दृस्यैनहरिणशालीननयनाः सहोर्वश्यावश्याः कतिकति नगीर्वाणगणिकाः ४ हेपरमे
श्वरीतवतरुणतरणिश्रीसरणिभिः बालादित्यलक्ष्मीसदृशाकांतिभिः ननुछायाभिः देहप्रभाभिः स
र्वादिवं आकाशंउर्वंभुवंवअरुणमनिमग्नांपाटलकांतिसागरगर्भेप्रविष्टांयः स्मरति अस्यत्रिभुवन
सौंदर्यराशिमूर्तेः परमेश्वरीभक्तस्यत्रस्यद्दृनहरिणशालीननयनाः भयचुक्तदृष्टिसंचाराः संत्यः
उर्वश्याः सहकतिकतिगीर्वाणगणिकासुरनार्यः नवश्याः भवंति अपितुवश्याः भवंत्येव तस्यरास्यो
पूल्लातदाक्षाकाश्रिण्योनुन्नमयाश्चमकेतीत्यर्थः किंवपाटलवर्णाध्यानेबहुधावश्यकर्मणिनियुक्तं
तथावागमांतरे देवीश्रीललितांध्यायेनधाकर्मविमोदृतः कर्मध्यानेकूत्तेदेव्याः सर्वसौभाग्यदा
नूप्रसवेत् त्रांताधवलवर्णाभामोक्षधर्मेप्रवर्त्तने स्त्रीवश्येराजवश्येवजनवश्येवपाटला पीताध
नस्यमपतोदृष्टमारणकर्मणि धूम्राविद्वेषणे प्रोक्ताशृंगारापाटलारुणिः सर्ववर्णासर्वलाभेषु
क्तान्योनिर्मपीपरा ४ इक्षुसुक्तप्रकारेणकामपुरुषार्थीपयोगीस्त्रीवश्यीकरणध्यानमुत्कालदर्पमेवम
ह्रांविद्यांतिमवर्णोक्षरस्वरूपध्यानं कामकलात्मकमाह सुरवेंदुरस्त्रीकुचयुगमधस्तस्यतदधो
कारंध्यायेत्परमहिषिनेमन्मथकलां ससघः संक्षोभंनयतिवनितामित्यतिलघुत्रिलोकीम
प्याशुभमयतिरबीदुस्तनयुगां ५ योमहाविद्यांतिमवर्णैकारलक्षणीनमहामंत्रः सखलुभगव

स्याः रूपोत्तरवाचकमेत्रनिवासश्चमितस्यैवमात्र कालिपिपकारलेखनेनस्त्रीरूपंसंपद्यतेतीति तदह मुखे
बिंदुलयाभानितदधस्तात्द्विबिंदुकं कुचद्वयनयासेयंअधोधस्तात्त्रिकोणकं एवमाकाररूपेस्यादेव
कामकलापरा हकारस्यअर्धेहकारार्धेत्रिकोणाकारबिंदुद्वयस्याधस्ता द्योनिःमुखस्याधस्ताकुचद्व
मितिस्त्रीरूपक्रमः यस्तेरंकामकलाचिंतकः ससघः क्षीघ्रमेववनितातरुणीसंक्षोभंकंदर्पराजनितवि
ह्वलंनयतिप्रापयति इतिअतिलघुअतिफलुप्रयोजनं महाप्रयोजनमाह रविश्चरंदुश्चरंदुर्वीदु
नीलनेत्रयुगलंयस्यास्तांत्रिलोकीमपित्रयाणांलोकानांसमाहारस्त्रिलोकीतावनितारूपधारिणीअशु
भंत्रिमयतिनिर्मयीकरोतिवशीकरोतीत्यर्थः ५ इक्षुकामकलाध्यानमुक्तं विषहरंज्वरहरंध्यानं
तरमाह तस्यध्यानस्याधिष्ठानदेवतालोतीयकूटमूर्तिः श्रीरत्नेश्वरीललिता करंतीमंगेप्यः किरणा
निकुरंबामृतरसंदृब्धामाधनेहिमकरत्रिलोमूर्तिमिवयः ससर्पाणांदर्पशमयतिरोकुलाधिपदृव
ज्वरंपुष्पंदृष्वासरवयतिसुधासारशिलया ६ हेपरमेश्वरीअंगेप्यः अवयवेभ्यः किरणानिकुरंबामृत
रसंस्वरूपिममालालक्षणंपीयूषंकिरंती सृजंति हिमकरत्रिलामूर्तिमिवयः कांतधरित्पुतलीरूपमि
वयः पुरुषोहृदयकमलेलांआधत्तेविनयति सःसर्पाणांदर्पशमयति तक्षककर्कोटककालिय
हासर्पविषज्वालांअवलोकनमात्रेणवतिरस्करोति किंचज्वरपुष्पंतापज्वरेणपीड्यमानशरीरं

रूक्षा सारद्रवीतत यापी यूषप्रवाहद्रवीतलयादृष्ट्वालोकनेन रूक्षयतिआनंदयति अथदूर्वीकांनांव
हूनांध्यानमुत्तमोत्तमंध्यानमाह तडिल्लेखातन्वीतपनशशिवैश्वानरमयीनिषण्णाषण्णा मपकप
रिकमलानांतवलां महापद्माटव्यामृदितमलमयेनमनसामहांतःपश्येनोदधिपरमाह्लादलह
री ७ तडिल्लेखातडिल्लेखातदृत्तन्वीसूक्ष्माकारां तपनशशिवैश्वानरमयीतपनोहंकारसूर्यः
शशिसमस्तोषधिरसलक्षणाहारपरिपाकजनितः कंदर्परसोल्लासवासनादायीसोमश्चंद्राकरः वैश्वा
नरस्तुआद्रीमाणनानाहारनिवस्तूनांपरिपाकदायीतोजोविशेषः एतेत्रयोमिलित्वेवंत्रीरेंधारयंति
एतेषांत्रयाणांतेनसामेकेनतन्मयी षण्णांकमलानांम्लानांयोगानांउपरिमाहापद्मानांयोसहकमल
दलाटव्यांतःनिषण्णांउपविष्टां एनांदृढीतवकलांमहतामनसापश्येतःविभावयेति परमाह्लादयंति
अनुपाधिपरब्रह्मरसास्वादप्रवहांदधतीं कीदृशेनमनसामृदितमलमायेन मलाश्चमायाचमल
माये मर्दितेदूरेकृतेमलमायेयेनतन्मर्दितमलमायेतेनमलाःकामक्रोधलोभमोहादयोमनोविकाराः
तन्मूलभूतावानाद्यमाया तयोःदूरीकरणेनब्रह्मानुसंधानाविर्भावजननंस्यादित्यर्थः तथालधुनो
येलोपांडुरपुंडरीकपुंडरीकस्पर्धांतिरोमपक्षांसीवंतीममतद्वेरिशिरोध्यायंतिमूर्ध्निस्थितां अरुणा राम
तविकटस्फुराक्षरपदान्निर्यांतिवक्त्रंबुजातेषोमारतिमारतीस्फरसरिल्लहरीलोलमयः ९ येसी २३७
दूरपरापुनरहिनांत्वेनजसाघामिमांमुदेवापिविलीनयावकरसप्रस्मारमग्नामिव पश्यंतिक्षणा २३९

मध्यमनसातेषामनेनांतरकोनास्त्रस्तकुरंगशावकदृशोवश्याभवंतिस्त्रियः २ वेवक्त्रांवैकुंडलोगदधरामव न
धकोविंशजंयेलोवनासितदृतेक्षणमपिध्यायंतिकृतास्थिरां तेषांवेश्मसुविभ्रमादहरहःस्फारीभवं
त्यश्रिरंमाधत्तेजरकर्णतालतरलास्थैर्यमनेनेस्त्रियः ३ इतिकाम्यध्यानप्रयोगः अथकाम्यनपमाह
वामकेश्वरतंत्रे लक्षमात्रजपेदेविमहासोपैप्रमुच्यते लक्षद्वयेनपापानिसप्तजन्मकृतान्यपि नाश
येत्रिपुरादेवीसाधकस्यनसंशयः १ जप्त्वालक्षत्रयंमत्रीयंत्रितोमंत्रविग्रहः पातकंनाशयेदाशुयदि
जन्मसहस्रजं २ जप्त्वाविद्यांतुल्यलक्षंमहावाग्मीश्वरोभवेत् पंचलक्षादरिद्रोपिसाक्षाद्वैश्रवणो
भवेत् ३ जप्त्वाषट्लक्षमेवंस्यान्महाविद्याधरोभवेत् जप्त्वैवंसप्तलक्षाणिरेवंखेचरीमेलनंभ
वेत् ४ अष्टलक्षप्रमाणंतुजप्त्वाविद्यामहेश्वरी अणिमाद्यष्टसिद्धीशोजायतेदेवपूजितः ५
नवलक्षप्रमाणंतुजप्त्वात्रिपुरसुंदरीं विधिवज्जपतेमंत्रीरुद्रमूर्तिरिवापरः ६ कर्त्रीहर्त्रीस्वयं
साक्षाल्लोकेपतिहुतःप्रभः अत्रन्यासऋष्यादिकंकृत्वाजपेत् इतिकाम्यजपप्रयोगः अथकाम्य
तर्पणमाह तद्यथा तंत्रराजे तर्पणेकामक्षीरक्षौद्रघृतपायसैः सवत्सपरिवारांतांदेवीसलि
लमध्यगां तर्पयेत्कुंकुमेसाध्येःसर्वोपद्रववर्जितये ऋष्यादिन्यासजातंविधायअथवाऋष्या
दिषडंगपूर्वतिरनुरासनवाग्देवतात्मकेन्यासंकृत्वाध्यात्वासलीलमध्यगांदेवींसंचिंत्य

सवक्त्रपरिवारांक्षीरशर्करघृतपायसैर्मिलित्वासाध्येः कुंकुमेनसंपूर्येत् तर्पणोदकेसूर्यमंडलादंकुरोत्
तीर्णीकर्षणंनित्यतर्पणंवत्कुर्यात् मूलांतेश्रीमन्मात्रिपुरसुंदरीश्रीपादुकांतर्पयामितिप्रयोगः साध्येः
तत्रदशतुद्रवैः पायसैरित्यत्रपयोविकारः पायसंपयोजलमिति अत्रक्षीरशर्कराद्युक्तंतज्जलंतद्वि
कृतंतस्यैवपायसाकैः अन्यथापायसस्यतर्पणासंभवात् अत्रतर्पणसंख्यानोक्ता अनुक्तोतुशतं
वाष्टसहस्रंवाप्रमाणतइति एवंतर्पणपितुःसर्वापद्वनाशःस्यात् घृतैःपूर्णोयुषःसिध्येत् क्षौद्रैः
सौभाग्यसिध्यये क्षौद्रमाक्षिकैः दुग्धैःसारोग्यसंसिध्यै।त्रिमिरैश्वर्यसिध्यये त्रिभिःघृतमधु
दुग्धैरिति नारिकेलोदकेपीतेत्रैलोक्यप्रीतोभवति हिमतोयैर्नरपासये शीतलजलैःराजानोवश्या
भवंति सर्वार्थसिध्यैतोयैः केवलजलैःसर्वार्थसिध्यिस्यात् एवंमाहेश्वरीअपिपिबेत् इतिका
म्यतर्पणप्रयोगः अथकाम्यषट्जनप्रयोगमाह नदुर्गेतंत्रराजनित्यातंत्रयोः अत्रचैत्रादिमासेषुविशेष
अत्रचैत्रमासिश्लेष्मांतकवृक्षस्यविपुलंचतुरस्रपीठंनिर्मीयतस्मिन्नित्याषट्जोनैप्रतिदिनंकुंकु
मादिनाश्रीचक्रमुद्धृत्यतत्रदेवीमाद्यत्रिपुरानाम्नीतन्मानससंभवैःपुष्पैःसंपूज्यतत्पहोमादिकंवि
धायविद्यांविदेवाख्यायथाशक्तिद्विहिरानंविधाय यथाशक्तिरदक्षिणांदत्वादेवीप्रणम्यविसर्जेत् इति चैत्रप्रयोगः

पाडुकायेआसनेकल्पयामिनमः इत्यादिप्रयोगवाक्यंकार्यं अग्रेत्रिपुरेत्यादावग्रेवंप्रयोगवाक्यम्
हनीयं इतिवैत्रमासेप्रयोगः वैशाखेमासिकुरंजपीठेप्राग्वत्श्रीचक्रमुद्धृत्यतत्रत्रिपुरेत्रीनाम्ना
देवीमावाह्यतत्कालसंभवैःपुष्पैःप्रतिदिनंसंपूज्यजपहोमादिकंविधायविद्यांविदेहिमाषदानंयथा
शक्तिदक्षिणांदत्वादेवीप्रणम्यविसर्जेत् इतिवैशाखप्रयोगः एवंज्येष्ठमासीबिल्वपीठेप्रा
ग्वत्श्रीचक्रमुद्धृत्यतत्रदेवीमावाह्यत्रिपुरसुंदरीतिनाम्नातत्कालसंभवैःपुष्पैःसंपूज्यप्राग्वत्
यवदानंविधायशेषंसमापयेत् इतिज्येष्ठप्रयोगः आषाढेमासिनिंबपीठेश्रीचक्रमुद्धृत्यतत्र
देवीमावाह्यत्रिपुरवासिनीतिनाम्नातत्कालसंभवैःपुष्पैःसंपूज्यमुद्गदानंविधायप्राग्वच्छेष
मापयेत् इत्याषाढेमासिप्रयोगः श्रावणेमासिअश्वत्थपीठेश्रीचक्रमुद्धृत्यतत्रदेवीमावाह्य
त्रिपुराश्रीनाम्नासर्वोपचारैःसंपूज्यप्राग्वद्घृतदानंविधायशेषंसमापयेत् इतिश्रावणेप्रयोगः
भाद्रपदेमासिरक्तंबपीठेश्रीचक्रमुद्धृत्यतत्रदेवीमावाह्यत्रिपुरमालिनीनाम्नासर्वोपचारैःसंपू
ज्यदुग्धदानंविधायशेषंसमापयेत् इतिभाद्रपदेप्रयोगः आश्विनेमासिबिल्वपीठेश्री
चक्रमुद्धृत्यतत्रदेवीमावाह्यत्रिपुरसिद्धेतिनाम्नासर्वोपचारैःसंपूज्यदधिदानंविधायशेषंसमा
पयेत् इत्याश्विनेप्रयोगः कार्तिकेमासिवटवृक्षपीठेश्रीचक्रमुद्धृत्यतत्रदेवीमावाह्यत्रिपुरांबाना

नाम्नासर्वोपचारैःसंपूज्यवस्त्रदानंविधायत्रोषंसमापयेत् इतिकार्त्तिकेप्रयोगः मार्गशीर्षमा
सिसहकालपीठेश्रीव०महात्रिपुरसुंदरीतिनाम्नाःसर्वोपचारैःसंपूज्यैत्रोषंसमापयेत् इतिमा
र्गशीर्षप्रयोगः पुष्यमासिकपूरेणपीठेनीत्वायत्रश्री०ललितेतिनाम्नीसर्वोपचारैःसंपूज्यरत्न
दानंविधायत्रोषंस० इतिपुष्यप्रयोगः माघमासिरक्तवेदनीपीठेश्री०कामदेतिनाम्नासर्वोपचा
रैःसंपूज्यतिलदानंविधायत्रोषंस० इतिमाघप्रयोगः फाल्गुनेमासिवेदनपीठेश्री०कामे
श्वरीतिनाम्नासर्वोपचारैःसंपूज्यमुद्गदानंकृत्वापाग्वत्त्रोषंस० इतिफाल्गुनेप्रयोगः एवंस
वत्सरमात्रमविच्छिन्नंपूजनात् आयुःकीर्तिश्रीविजयबलारोग्यादियद्यदभिप्सितंतत्सर्वप्रा
प्नुयात् अथासिद्धिंबलभेत् अथवैनादिषुद्वादशमासेषुप्रतिमासंवारपूजाविशेषः तत्र
विवारेनित्यपूजातेरक्तकमलैःपूजयेत् सोमवारेषुकुमुदकुसुमैःपूजयेत् सोमवारेषुर
क्तोत्पलैःपूजयेत् बुधवारेषुनागचंपतेःपूजयेत् गुरुवारेषुकह्लारैःपूजयेत् शुक्रवारेषुश्वे
तकमलैःपूजयेत् शनिवारेषुनीलोत्पलैःपूजयेत् अत्ररविवारादिषुनैवेद्यविशेषः रविवारेपा
यसं सोमवारेदुग्धं मंगल०कदलीफलं बुधवारेनवनीतं गुरुवारेपिंडखार्जूरं शुक्रवारेत्रि
लाफलंदाडिमंशनिवारेघृतं इतिवारपूजाविशेषः अथसिद्धिविशेषेषुकाम्यपूजाविशेषः

राम
२७१

नक्षत्रवेतायेरात्रौपालाशपुष्पैःसिद्धद्रव्यैश्रीवक्त्रेसपरिवारांदेवींसंपूजयेत् एवंसप्तरात्रंकृतंअप्र
रोहेमलनंभवेत् अथमहारण्येवटमूलेपर्वतकंदरेवाकदंबनालिपुष्पाभ्यांसिद्धद्रव्यैश्रीवक्त्रे
सपरिवारांदेवीमासमात्रंपूजयितुःषट्त्रिंशत्यक्षिण्यःप्रत्यक्षाःभूत्वावांछितमखिलंप्रयच्छं
ति समुद्रतीरेकेतकीकुसुमैःसिद्धद्रव्यैश्रीवक्त्रेसपरिवारांदेवींमासमात्रंरात्रौपूजयितुः
षष्टिसेदाश्चेटकाप्रत्यक्षंभूत्वामालाभूषणादिनानावस्त्रंनिःक्षिप्यवनितांअन्यानपिसा
धकवांछितानिप्रयच्छंति सिद्धेवमहद्भूतोमायाकुर्वंतःशत्रूणांकदनंवकुर्वंति ॥ स्वनक्षत्रवृक्ष
स्यपीठंकृत्वातत्रश्रीवक्त्रमुद्धृत्यत्रमशानदेवीमासमात्रंरात्रौशाल्मलीपुष्पैःसिद्धद्रव्यैश्रीव
क्त्रेपस्यपूजयितुपित्राचाराःप्रत्यक्षाभूत्वातस्याज्ञायापाषाणपातादिनानाविधप्रहारैःअ
स्यत्रात्रूनसंहरंति नक्षत्रवृक्षस्तुकारस्करश्चामलकोदुंबरोजंबुकस्तथा खादिरश्चवेत्रो
वपिप्पलोनागरोहिणी पलाशःपूतिकांबष्ठोबिल्वार्जुनविकंकता बकुलःसरलःसर्जोवंजु
लःपनसस्तथा अर्कःशमीकदंबश्चश्रूतेनिंबस्तथैववं मधुकश्चेतिसंप्रोक्तावृक्षाणांनक्ष
त्रजाःस्त्री इतिनक्षत्रवृक्षाःनिर्जनेअरण्येमासमात्रंश्रीवक्त्रेदेवींसपरिवारांमालतिकाना
पुन्नागकेतकीपुष्पैमधुसिश्चसिद्धद्रव्यैःसंपूज्यवेतालप्रसिद्धिंप्राप्नुयात् नमारूढयतेष्टंते

कत्रयेणनिर्मथ्यश्चरेत् श्मशानेवेदिकायतनेनिर्जनेविपिनेवारुद्धवस्त्रादिपरिधानः कज्जलादि
कृष्णद्रव्येणश्रीचक्रमुत्कृत्यतत्रदेवीमावाह्यरुद्धवर्णमितिरुद्धोध्यायन्स्वयमपिअतिरुद्धाशयो
मध्यरात्रेकृष्णपुष्पाक्षतैःसिद्धद्रव्यैश्चमासमात्रंसंपूज्यअंतिमदिनेअर्धरात्रेसाध्यनक्षत्रेयोनि
छिलादेव्यैर्विलिनिवेद्यनद्वालोद्वनात्निस्तार्याभ्योअतिभीषणाभ्यःरुद्राभ्यःस्वशत्रून्
निवेदयेत् नास्तान्संहृत्यसाधकेनप्रार्थिताःपुनरस्मदेव्याःललाटनेत्रेतिरोहिताभवेति
साध्यनक्षत्रयोनयस्तु अश्विन्योरश्वः भरण्योगजः कृत्तिकायोअजः रोहिण्यांसर्पः मृगशि
रःसर्पिणी आर्द्रायाश्वा पुनर्वसोर्बिडालिकाः पुष्यस्यअजाः आश्लेषायामार्जार मघाया
मूषका पूर्वायामूषिकः उत्तरायावृषः हस्तायामहिषी चित्रायाव्याघ्रः स्वात्याःमहिषः विशा
खायाव्याघ्री अनुराधायामृगी ज्येष्ठायामृगा मूलस्यश्वानी पूर्वाषाढायाःकपिः उत्तरा
षाढायाःगोधेटः श्रवणस्यनरी धनिष्ठायाःनारी शतभिषायाःअश्वी पूर्वाभाद्रपदायाःन
राभाद्रपदायाःगोः रेवत्याःरेणुः इतिभालोयोनयः पुष्पोयानेनिर्जनेरक्तवस्त्रास्माल्या
नुलेपनभूषणभूषितविग्रहं श्रीचक्रेयथोक्तरूपांदेवींध्यात्वाकह्लारेवंकारोक्तपाटलरा
तपत्रपुष्पैःसिद्धद्रव्यैश्चमासमात्रंपूजयित्वामायासिद्धिंप्राप्यकामरूपोभूत्वाइंद्रजालादिक

DR. BHAU DAJI MEMORIAL
राष्ट्रीय आयुर्वेद विद्यापीठ आयुर्वेद संग्रहालय
संख्या २४२

रीनेनविश्वचारीनानाविनोदवानूभवेत् ॐ किंशुकपुष्पैःसिद्धद्रव्यैश्चमासमात्रंश्रीचक्रेदेवीसंपू
ज्यनानाविधानिभूषणादीनिप्राप्नुयात् तथागजप्राप्तौ पाटलीपुष्पैर्मासमात्रंपूजयेत् अश्वप्रा
प्तौ रक्तोत्पलैःपूजयेत् गोप्राप्तौ नंद्यावर्तैःमासमात्रंपूजयेत् महिषिप्राप्तौ जवीरैर्मासमात्रं
पूजयेत् अजप्राप्तौ लकुचैर्मासमात्रंपूजयेत् निधिप्राप्तौ दाडिमैर्मासमात्रंपूजयेत् गानसिद्धौ
मधुपुष्पैर्मासमात्रंपूजयेत् स्त्रीप्राप्तौ बकुलपुष्पैर्मासमात्रंपूजयेत् पुत्रप्राप्तौ कल्हारैर्मास
मात्रंपूजयेत् जयाप्राप्तौ छत्रपत्रैर्मात्रे॰स्पंदनादोलिकादिवाहनप्राप्तौकेतकीमासमात्रं॰
सौभाग्यसिद्धये नानासुगंधिपुष्पैर्मासमात्रंश्रीचक्रेदेवीसपरिवारांपूजयेत् अत्रमासमा
त्रमित्यफलदानेसासद्यंमासमात्रंयावत्फलावाप्तिंपूजयेत् कमलोद्यानेकमुकफलैः
सिद्धद्रव्यैश्चदिवानिशंदेवीपूजयन्स्त्रीजनेषुसाक्षान्मन्मथोभवेत् सिद्धद्रव्याणिगुरुमु
खादवगंतव्यं परप्रेषनकृत्यापरप्रेरितमंत्रनिरस्तानार्थं पूर्णासुकुसुमादिकायांदेवीमायास
मर्पयेन्नात्मप्रेरिताः कृत्यामंत्राश्च प्रेरकानेवपरावृत्यप्रेरकेग्रसंतिपूजकंवाधितुंनशक्नु
वंति ॐ सुगंधिकुसुमैःश्रीचक्रेदेवींसपरिवारांसंपूज्यसप्तजन्मार्जितैःपापैर्मुक्तोभवति अत्र
सर्वत्रयंत्रलेखनद्रव्याण्यिहतंत्रराजे द्रष्टव्यंचक्रस्यनिर्माणेकाश्मीरंसमुद्दीरितं सिंदूरंरोरिकं
२४ संकल्पपूर्वकंसंहृत्यमहापातकैर्मुक्तोभवति तथाशमीपत्रैःदूर्वांकुरैरश्वत्थपल्लवैरकपुष्पैर्वाश्री

लक्षादरदंवंदनेपिवा अथस्तंभने पीतवर्णस्त्रीलेपीतविलासादिविशोभिते प्राङ्मुखः पीतद्वयेश्वरराजेसमुध्यत्तत्रदेवीमावाह्यपीतद्वयैः सर्वोपचारैः संपूज्यवंदितमखिलंस्तंभयेत्॥
वश्ये उत्तरास्याभिमुखः सिंदूरादिरक्तद्वयेश्वरराजेसमुध्यत्परिकल्पत्रयालंकृतस्तस्मिन्देवीमावाह्यरक्तैः सर्वोपचारैर्देवीसंपूज्यसर्वलोकंवशमानयेत् पोषिद्वश्ये पश्चिमाभिमुखः वंदनेनवक्त्रंसमुध्यत्तत्रधिधवद्देव्यर्चनात्सर्वयोषिद्वशोभवेत् तासस्यदासीवद्वश्यगाःभवंति परमेत्रहनने दक्षिणाभिमुखः कृष्णद्वयेश्वरंसंभाप्यैवंरक्तराजमुध्यत्तन्मध्येअमुकस्यमंत्रहानिंकुरुकुरुकुरुकुरुतिसाध्यनामसमालिख्यतत्रदेवीमावाह्यकृष्णवस्त्राद्यलंकृतःकृष्णद्वयेसमभ्यर्च्यद्विषतोमेत्रहानिंकुर्यात् नानासिद्धिप्राप्तेमहाभूततत्वदेवयांरात्रौसिद्धद्वयेश्वरमानदेवीसवक्त्रकंस्त्रिरविनासमभ्यर्च्यखड्गसिद्धिंवेतालसिद्धिंगुटिकासिद्धिंपादुकासिद्धिंअंजनसिद्धिंमनःसिद्धिंधनुर्सिद्धिंमहाखिलसिद्धिंयक्षिणीसिद्धिंवायथोद्दिष्टंलभेत् महाभावतत्वदेवीतुरीपावल्यांचतुर्दश्यां रक्तपद्मैःकर्पूरक्षीरसिक्तैर्मासमात्रंसिद्धद्वयेश्वरीवक्त्रं संपूज्यजन्मार्जितंमहापातकैर्मुक्तोधनवान्भवेत् केतकीपुष्पैःकुपपातकान्मुक्तःसौभाग्यवान्भवेत् चंपकपुष्पैर्मासमात्रंसंपूज्यशतजन्मार्जितपापसमूहान्मुक्तोभवतिमहासौभाग्यवान्भवेत् बिल्वपत्रैर्मासंपूजनात्सर्वेसमृद्धिमान्भवेत् मल्लिकाजातिमालतीकुंदशतपत्रश्वेतोत्पलैर्मिलितैःसिद्धद्वयेश्वरमासमात्रंसंपूज्यशतजन्मार्जितब्रह्महत्यादिमहापातकसमूहान्मुक्तोभवति वाक्सिद्धिंसमोहनसिद्धिंमाकर्षणं भवेत् इति काम्यप्रयोगाःसमाप्तः सच्चिदानंदनाथेनउन्मन्यानंदसेविना विरचितेभैरव्यांतात्रिपुराभूजनक्रमः इतित्रिपुराभूजनक्रमेषट्कर्मारंभोचतुर्दशःपरिच्छेदः ॥ अथपंचत्रलेखनप्रकारमाह तत्रकंआनंदलहर्यौ चतुर्भिश्रीकंठैःशिवयुवतिभिःपंचभिरपिःप्रभिन्नाभिर्नवभिरपिमूलप्रकृतिभिः त्रयश्चत्वारिंशत्वसुदलकलाश्रत्रिवलयत्रिरेखाभिःसार्धंतववरणकोणाःपरिणताः छ हेपरमेश्वरि तववरणकोणाःवरेत्रसर्वाःअणिमाद्याःआवरणदेवताःइतिवरणेवक्त्रसिंहासनंवरगतिप्रक्षणपोरतिधानेश्वरतिगतिसर्वमपिलोकंव्यानीति वरतिप्रक्षति सर्वेमरीनतिमिरमिति वरणं दहंपूतेवक्त्रसिंहासनेस्थंविद्यस्यनमित्यर्थः तस्यकोणास्तत्तद्देवताधिष्ठानभूमिरेखाताःविधिचक्रीदशलेखनप्रकारेणकोदशाः कोणाःसंभवंतीत्याह चतुर्भिश्रीकंठैश्रीकंठरूपैश्चतुर्भिऊर्ध्वैरेखैतदधोमुखाभिःपंचभिःशिवयुवतीभिःविपरीतगामिनीभिःपंचसंख्यापुक्तभिःयोगिनीभिः एवंत्रयोनवभिःमूलप्रकृतिभिःनवकोणशिवस्यविद्युरूपस्येत्यर्थः प्रभिन्ना

पि:परस्परं संश्लेषानुभयोर्मेलनात्त्रयश्चत्वारिंशत्कोणाःभवेति कोणास्त्रिकोणाः एवं
भूताःग्रहएवोच्यंतेत्रिकोणवसुकोणदशारयुग्ममन्यस्त्राकारास्त्रयश्चत्वारिंशत्संख्याकाः
स्तत एवभवेति यस्मदलकलास्तलत्रिवलयात्रिरेखाभिःसार्धंवसुदलेअष्टदलंकलास्तंषोड
शायेत्रं तदेतगर्तंत्रिवलयंमेखलत्रयंवरेखाश्चत्रितुरस्रंच एताभिःसमस्ताभिःसहनवत्र
णाकोणाःपरिणताः एतश्चक्रंसिंहासनलेखनप्रकारस्तूपदृश्यते गोमयोपलिप्तेपवित्रे
सुसमेभूतलेचतुरस्रंस्थंडिलेपीठंतत्रेशासिदूरेरेखयाअधआरभ्यत्रिमेखोपर्युपरिस्थंसोमांग
रकबुधबृहस्पतिशुक्रशनिराहुकेतवश्चाष्टौ नवरेखाःकर्तव्याः तत्ररेखासुआदित्यतारेबुधो
तःशिवाः बृहस्पत्यादिपंचयोनयःशक्तयः अत्रअधस्थाश्चतस्रोबुधोतारेखाऊर्ध्वंवर्धयेत्
ऊर्ध्वस्थाःतेनतोताःपंचरेखाःअधोवर्धयेत् तयथा आदित्यउत्तमस्थानेवर्धयित्वाशनिंबुधयेत्
तथासोमंवर्धयित्वाकेतुंबुधयेत् मंगलंवर्धयित्वामेढलंबुधयेत् तथाबुधंवर्धयित्वाराहुंबुधयेत्
एवेचत्वारःश्रीकंठाःजाताः अथबृहस्पतिमूर्ध्वस्थानादधोवर्धयित्वाअंगारकंबुधयेत्॥ राम २४६
तथाशुक्रंअधोवर्धयित्वासोमंबुधयेत् तथाशनिमधोवर्धयित्वामंउलंबुधयेत् तथाराहु
मधोवर्धयित्वाआदित्यंबुधयेत् तथाकेतुमधोवर्धयित्वाबुधंबुधयेत् एवमन्योन्यसंश्लेषेक

तिवर्धनेरेखानादधिकरेखांवर्जयेत् एवंकृतेसतिमध्यत्रिकोणस्तत्संस्तितोएकोणीतसंस्तितोद्विदश
कोणीतत्संस्तितश्चतुर्दशकोणीतिएकादशादशनवचतुर्दशीमेलनात्त्रयश्चत्वारिंशत्कोणीसं
पद्यंते तत्रीतोक्तत्वाच्चख्याता अत्रसमंतिमाहनेत्रोत्तरे भानुर्मीनुतनूद्भवेत्रितकरःकेतोःकुजो
मेढलेसोम्याश्चापिबुधेतुदेसुशरगुरुर्मौमेषगुश्चोडुपे सोरिर्मेढलगेतमस्कृतपनेकेतुर्बुधंसं
स्पृशेद्दस्त्वंबनपपेकनगुणमितंरनेतथाभूयहे संहारवक्रमेणायंवक्रोधारःप्रदर्शितः इ
तिसंहारवक्रोधारः अथसृष्टिक्रमेणवक्रोधारोलिख्यते तद्यथा नार्णावे भूमिश्चंद्रबिं
दोमायाशक्तिःकृष्णार्धमादनः अर्धश्चंद्रश्चबिंदुश्चनवार्णोमेरुरुच्यते महात्रिपुरसुंदर्याः
मंत्रोमेरुसमुद्भवः भूमिःलकारः चंद्रःसकारः त्रिबिंदुःकारः मायाईकारः शक्तिःएकारः
कूटत्रार्धरेफः मानदःककारः अर्धचंद्रोनादः बिंदुश्चेतिनवार्णोमेरुः श्रीचक्रमपिरचेत्रिमे
रुरूपंनसंशयः लकारःपृथिवीबीजंतेनसूर्यबिंबमुच्यते सकारश्चंद्रमाभवेत्कलाषोडशात्मा
त्मकः तस्मात्षोडशार्णेत्रेतुहकारःत्रियउच्यते अष्टमूर्तिःसदाभद्रेतस्माद्धसकलंभवेत्
ईकारस्तुसदामायाशुद्धनादनिबंदुका पालयंतीपरातस्मात्वक्रकोणंभवेत्त्रिये शक्तिरे
कादशारस्थानेस्थित्वात्तत्रजगत्त्रयं विश्वयोनिरितिख्यातासबिंदुर्दशारूपकः एकादश

परमेशानि चक्रं न्यायविजृंभते दशकोणकरतस्मात् एकाराज्योतिरव्यया कलादशान्वि
तो वह्निर्दशकोणप्रवर्तकः ककारान्मदनोदेवीमदनस्याष्टकंपवेत् तेनवश्येतुतच्चक्रेव
मुकोणंतदाप्नवेत् अर्धमात्रगुणान्सूतेनादरूपायतस्ततः त्रिकोणरूपयोनिस्थबिंदुना
वेदवंपवेत् कामेश्वरस्वरूपंतुविश्वाधारंस्वकर्तृकं श्रीचक्रेतुवारोहेश्रीविद्यार्चकसमवं
तत्राप्तुरुखआसीनश्चक्रराजंसमालिखेत् भूप्रदेशसमंशुभ्रंसौरजसाथवा कुं
कुमस्यरजोभिश्चसमंचक्रंसमालिखेत् रुजुलेखनेनैवरम्यंसंभिन्नभेदसंभवं अथवाह
मरीप्याक्षोतांत्रेणबहुधातुभिः पद्मविलिख्यश्रीचंद्रकचंदनसंभवेत् पीठंसंस्थाप्य
विलिखेल्लेखान्याहेमयाप्रिये रोचनाकुंकुमाभ्यांतुकस्तूरीचंदनेनदुभिः ईशानादग्निपर्य
तंरुजुरेखंसमालिखेत् त्रिकोणाकाररूपेयंतस्याऽउपरिसंलिखेत् त्रिकोणाकाररूपेणतु
शक्तिद्वयमुदाहृतं पूर्वशक्त्यग्रभागेतुमानयष्टिंसमालिखेत् रेखात्रयंपरमेशानिशपुरा
क्षसकोणगं संधिभेदक्रमेणैवनयोःशक्त्योस्ततःपरं रेखेआरुह्यकोणाभ्यांतदग्रात्तद्व
र्गोकुरु वह्निमंडलमेतत्तुपूर्वरेखैर्विरचितं एतच्चक्रमहद्दत्तेततःशृणुवरानने पूर्वशक्तित्रा
वह्निभ्यांकोणाभ्यांरेखाद्वितं पूर्वरेखात्रयंविस्तार्यतथापश्चिमवह्निगावायुराक्षसकोणा

भ्यांरेखापश्चिमगो तथा विस्तार्ययोजयेद्विसंधिभेदक्रमेणतु येन्यग्रांपूर्वरेखोत्तरदक्षिणोत्तरतः क्रमात्॥
तथारेखेयोनिसंस्थेपश्चिमस्यांदिशिक्रमात् कोणाग्रगांयोजयित्वादशकोणंतदाप्नवेत् तेथैवदेवदेवेशि
द्वितीयंदशकोणकं ईशानवह्निगेरेखेपूर्वयोन्यग्रयोःक्रमात् विस्तार्ययोजयेत्पश्चात्पश्चिमस्यांदिशि
क्रमात् वायुराक्षसकोणाग्रेरेखेविस्तार्यसंदरि पश्चिमाग्रेतथादेवियोजयेद्वह्निगेतरे एकाग्रपूर्वको
णाग्रंवुवह्निनिमनोहरं योजयेद्वदेवेशियथापेक्ष्यस्वकंभवेत् दशकोणस्यरेखेशित्यत्रकोणचतुष्टयं
दशकोणांतयोर्देविमध्यरेखाकारयेत् दैदक्षिणदिभागेतुतथावोत्तरभागके षट्कोणस्यततोदेविसं
धिभेदक्रमेणतु योनिंवह्निंचसंयोज्यत्रिकारंजायतेतथा कल्पमध्यगतारेखाअंबुरूपासकोणयेत
कृत्वाकृतियथादेविनायतेतिमनोहरं सन्मुखंपश्चदशकंपूर्वाग्रंचक्रंचतुरग्निकंबिंदुत्रिकोणवस्वारंव
क्रमेनद्वाननेमध्यचक्रंतुनानीहिदशारयुगलंतथा त्रिकोन्यंकिनंदेविक्षत्रमध्यगतंभवेत् एतच्च
क्रमहेशानिसर्वसौभाग्यवर्धनं सर्वसाम्राज्यपदविसर्वोपधिनाशनं अनेकहयमाणिक्यसुवर्ण
पाथोरुहं महामोक्षप्रदंदेविपूर्णेंदुसन्निभं तच्चक्रंकु
रुमीनाक्षीवरूपत्रमनोहरं ततःषोढशपत्रंतुलिखेत्तत्करवंदिते चतुरस्रंचतुर्द्वारसहितंपरमेश्वरि
चतुःषष्टियुनेकाटयोयोगिनीनांमहाप्रभे चक्रेमिनस्थवित्रोपालाः साधकंमानयंतिहि चतुरस्रंमान
कोणेसहितंसिद्धिहेतवे मुक्तामणिकपाटिनंसमस्तलविराजितं त्रैलोक्यमोहनंनामकल्पद्रुमफल

प्रदो षोडशारसंदबिंबरूपेतुसकलालयं सर्वाशापूरकेसदेस्ववस्थितूषवर्णितम् अष्टपत्रेमहेशानिजपकुक्रम
सन्निधं सर्वसंक्षोभनेनामसर्वकामप्रपूरकं एतत्त्रयेवरारोहेसष्टिचक्रंस्मरवप्रदं पश्चाम्नायाधिदेवंतु मं
हिनेसर्वसिद्धिदं चतुर्दशारदेवेशिदाडिमीकुसमप्रभं अनेनफलदंमद्रेसर्वसौभाग्यदंसदा दशारंतस
हेमाभंसीदूरसदृशंप्रिये सर्वार्थसाधकंवक्रंमनश्चिंतितदंसदा द्वितीयमपिपंक्तयस्त्रंजपाकुसुमसन्नि
भं सर्वरक्षाकरंवक्रंमहाज्ञानमयेशिवे एतत्त्रयंमहेशानिलिखितंवक्रंस्मरवप्रदं दक्षिणाम्नायद
व्यतुर्यधेसितफलप्रदं अष्टकोणंवरारोहेबालार्ककिरणारुणं पद्मरागसमप्रख्यंसर्वरोगहरंसदा॥
उद्यत्सूर्यसहस्राभंवंधूकसुसमप्रभं सर्वसिद्धिप्रदंवक्रंसकलालयमीश्वरि त्रिकोणेसर्वसंभू
तिकारणेभूतिदंसदा बिंदुवक्रंवरारोहेसर्वानंदमयेपरं सदाशिवमयेवक्रंनायकंपरमेश्वरि एत
त्त्रिवक्रंसंहाररूपंबलमयेसदा पश्चिमाम्नायसंसेव्यंत्रयमुत्तरपूजितं अस्मिन्वक्रेषडध्वानोवर्त्तते
वीरवंदिते वक्रपत्रेषुदेवेशिपराध्वानुनिगद्यते पत्रसंध्यक्षरेषुभुवनाध्वाव्यवस्थितः वर्णाध्वा
नकारूपंकथयामितवानघे वर्णाष्टकंमातृकायाःदिक्षुसिद्धंयतःप्रिये पार्थिवंतन्मयंविद्धिषोडशा
रस्थात्मकं अष्टपत्रंकादिवर्णैःक्षांतैर्दिक्षुविदुक्षुच कादिगंताःत्रिकवर्णाःत्रिकोणेषुसंस्थिता॥ राम २४६
णकारादिमकारांताश्चावर्णाद्दशारके मकारादिक्षकारांताःद्वितीयेपिदशारके वर्गोष्टकंवाष्टकोणे
त्रिकोणेकथयामिते अकथादित्रिरोरवांतंहक्षयुग्मंतुमध्यमं वर्णाध्वाकथितेदविमातृकापीठरूपकः

षट्त्रिंशत्तत्त्वभीतिंवक्रमूलानुसाधनः पंचविंहासनेनक्षःकलाध्वावक्रवासनात् सबालेभैरवीयु
क्तामहात्रिपुरसुंदरी त्रिपुराद्यंविकोणाद्यावक्रंवाथकिंजंभने मंत्राध्यायंसमाख्यातोनिश्चयेन
सदानघे एतंषडध्वाविमलंश्रीवक्रंपरिंनयेत् उत्तराम्नायमुखेदिक्षियदावक्रंसमुद्धरेत् उत्त
राम्नानदात्रेविपूर्वोत्रैवनसंज्ञयः ईशानकोणंदेवेशिनदाग्नेयेनसंज्ञयः पश्चिमास्यमुखेमंत्रीय
दावक्रंसमुद्धरेत् पश्चिमाम्नानदात्रेयाम्यैत्रैवनसंज्ञयः वायुकोणंनदात्रेयंरम्नानंदासंभवे
दक्षिणाम्नायमुखेमंत्रीयदावक्रंसमुद्धरेत् पूर्वोत्रैवनदासादिकरक्षःकोणंनुवक्ष्यिवत् एतत्त्रयंमहेशानि
श्रीविद्यार्णैःसमुद्धृतं सर्वागममयंदेवीकथितंवीरवंदिते इतिश्रीवक्रोद्धारः अथाश्रीवक्रादिकर
णान्याह रुद्रयामले ततःसिंदूरकुंकुमैःकार्यंयंत्रंतुयोगिना सौवर्णेराजितेताम्रेस्फटिकेवेदुभेत
था वक्रंयथोक्तविधिनापूज्यादेवीनरोत्तमैः तथवतंत्रोद्धृतेरत्नहेमनिरूप्यवाताम्रेपट्टादिव
क्रमात् कृत्वावक्रस्यनिर्माणंस्थापयेत्पूजयेदपि लक्ष्मीकीर्तिःयशःपुत्रधनारोग्यादिसिध्य
ये दृषद्गिरिगंडकीशीलायां गंडकीभवपाषाणेस्वर्णेरजततांम्रयोः इतिदक्षिणामूर्तिवरनाद
अथधातुविशेषेपूज्यकालविशेषमाह रत्नसागरे यावज्जीवंस्वर्णेस्यात्रूपेद्वादशवार्षिकी
प्रिये ताम्रेद्वादशवार्षिकंवर्षंतदर्धंपत्रजेपत्रके सारसंग्रहे ताम्रेद्वादशवार्षिकंवर्षंस्फटिकादौनुसर्वदा

तेषांमध्येस्फाटिकेतुसर्वसिद्धिप्रदंभवेत् श्रीवक्रमितिशेषः अथाधिकरणविशेषेफलविशेषमाह
लक्षसागरे भूमौसिंदूरजंरजतारविनंसर्वकामदं सुवर्णरचितंयंत्रंसर्वराजवशंकरं रजतेनरचि
तंयंत्रंआयुरारोग्यकामदं ताम्रेतुरचितंयंत्रंसर्वैश्वर्यप्रदंमतं यंत्रंहिस्फाटिकेदेविमनोभिल
षितप्रदं माणिक्येलिखितंयंत्रंआयुरारोग्यकामदं ताम्रेतुरचितंयंत्रंसर्वैश्वर्यप्रदंमतं रुतंम
रकतेयंत्रंसर्वशत्रुविनाशनं लोहत्रयोद्भवंयंत्रंसर्वसिद्धिकरंमतं गोमेदरचितंयंत्रं
दैत्युवाच लोहत्रयोद्भवंयंत्रंकथंकार्यंमहेश्वर तन्मेवदस्वरूपंयायद्गृहेनवस्तुभ ईश्वरउवाच
भागोदशसुवर्णस्यरजतस्यत्रयोऽशा ताम्रस्यरविभागेनपीठंकुर्यान्मनोहरं तस्मिन्पीठेत
निर्माणंश्रीवक्रंऋजुकारयेत् शांतिदंपुष्टिदंप्रोक्तं सर्वशत्रुनिबर्हणं आयुरारोग्यजनकंकीर्ति
दंकीर्तिदंमतं अथवक्रस्यप्रस्तारमेरने त्रिविधाध्यमहालक्षणसागरे त्रैविध्यंशृणुवक्र
स्यप्रस्तारोर्ध्वमेरुकः स्वर्गलोकाधिवासीनांयंत्रराडूमेरुसंज्ञकः प्रथमंरतुसमारभ्यवै
दवीतंमहेश्वरि क्रमात्समुन्नतंसर्वंमेरुरूपंमयोदितं समोर्ध्वरेखंनवकमूर्ध्वरेखंप्र
कीर्तितं निम्नरेखासमायोगाद्भूप्रस्तारोमयोदितः यंत्रराजस्वरूपंतेमयास्नेहात्त्रोक्त
स्तितं गोपितंयत्नयाशैलेस्वगृहेमिवसंततमिति अथेतत्प्रकारत्रयस्यफलानिप्रस्तारे

DR. BHAU DAJI MEMORIAL

नरंवाह तंत्रराजे चतुरस्रंसमारभ्यनवचक्राण्यनुक्रमात् उन्नतोन्नतयामध्यांश्चक्रंस्यान्नि
धनंधनं त्रित्रिक्रमाद्युन्नतंनदपूजलंश्रियेनपेत् एकद्विक्रमोनामश्रीयेकीर्त्यैवकल्पते
नवानिसमरूपाणिसर्वाभिष्टार्थसिद्धये तथाकुलमूलावतारे उच्छ्रितेक्रमशोदेवितज्ञस्त्रि
स्तनोमतिः प्रथमंचक्रंषोडशारंवापष्टारंवसमंभवेत् शेषमुन्नतमीशानिवार्धाशिरप्रजेभवेत्
चतुरस्रंसमंदेविषोडशारादिबिंदुके मिथःसमुन्नतंदेविश्रीकीर्त्यैवकल्पते चतुरस्रंसमारभ्य
बिंदुतंसमरेखकं तथाश्रीकीर्तिरारोग्यमभलायोपकल्पते अथश्रीचक्राधिकरणेनिषि
द्धधातुनन्यानिनिषिद्धाधिकरणानिवाह तंत्रराजे सीसकास्यादिषुपुनःपूर्वोक्तविपरी
तरूपं फलकायोपदेशिनोस्थापयेन्नकदाचन वेगेधसिसकेलोहेनकर्तव्यंकदाचनेति॥
श्रीवक्रस्यपीठमानंद्रव्यमानंवाह कुलमूलावतारे अग्निरंगुलविस्तारंशक्रप्रत्यक्दक्षि
णेनरं फलप्रमाणंकर्तव्यंअर्कीपीठंमनोहरं यवार्धोन्नंसुकुर्वीतचतुरस्रंसमंततः तस्मिन्पी
ठेवनिर्माणंश्रीवक्रंवैधकारयेत् सोत्रामणितेत्रे ऋजुरेखाभवेल्लक्षणावक्ररेखाद्विरिद्रता
अग्निरंगुलिविस्तारेयवार्धोन्नोभवेत् लक्षणासागरे अग्निरंगुलहेमस्यरजतस्य
तथैवच ताम्रस्यपूर्वसंख्येवमाणिक्यादेर्यथेच्छया अग्निरंगुलविस्तारमितिहेमस्यादि

तिवदित्यत्राङ्गुलविस्तारइत्यर्थः पलेविंशत्युत्तरत्रिंशत्तगुंजापरिमितं आदिपदेनपुष्पनी
लादयोरत्नविशेषाउच्यंते अंगुलविस्तारस्तुमानांतरांगुलमानेन वेदिकापीठत्रिविकार
यादीनांविधिंपुनः मानांतरांगुलेनैवभवेत् नान्येनकेनचित् इतिकपिलपंचरात्रवचनात्
श्रीचक्रस्याधिकरणस्यपीठत्वाच्चलात्पीठत्वाद्वृत्तिपादनवचनानितुप्रयोगेवृत्तिरि
तानि मानांतरांगुललक्षणंकपिलपंचरात्रेगृहीतं निन्यस्यस्तेस्तीर्यगष्टाभिर्यवैर्मानां
तरांगुलं शालिपिर्वारुजुन्यस्तैस्त्रिभिर्मानांतरांगुलं अथयंत्रप्रतिष्ठामाह तंत्रराजे चक्रदे
व्योक्तयात्रिशेषप्रतिष्ठात्रिविधोत्थे सावतत्रविदाकार्यासंप्रदायानुरोधिना चक्रपूजावत्के
देव्यांमुहूर्तौ त्रिशेषेदीक्षायोगेनदेवप्रतिष्ठा दीक्षायात्रिशेषादेदेवताप्रतिष्ठांकुर्यादुरुरिति
तत्रविदाप्रतिष्ठविधात्तानिपूर्णाभिषिक्तेनगुरुतःपाशानुशेन तदुक्तेतंत्रराजे गुर्वनुज्ञा
प्तेलोभान्मोहादाकुरुतेयति सपुत्रदारोनिधनेपशुर्वन्निवन्निरयंव्रजेत् तस्मात्पूर्णा
भिषिक्तेनपाशानुज्ञाःसमाचरेत् एवंविधेनक्रियमाणायाकालविशेषस्तत्रैव स्थिरे
शुभयहोपेतनूकूलेगुणवालिनिमुहूर्तेकारयेद्यदा पूर्णायांवाशुभोदये अक्षरत्रयसं
पातदिनेपूर्णादित्रये प्रोक्तेषुपंचवस्वन्येषुसर्वदावाशुभोदये पूर्णायोपोर्णिमास्यां॥

एकस्येवाक्षरस्यादिनाक्षरलेनवस्थितिर्यस्मिन्दिनेअन्येषुपंचसुगुरोर्जन्मादिनस्वजन्मादिन
विद्याप्राप्तिदिनगुरुदर्शनमरणेष्वपि पूर्णायांविशेषमाह पूर्णोक्तलक्षणयुक्तादिनात्रिशेषेपू
र्णायामेवस्वात्मनःश्वासस्यशुभोदयेकुर्यादित्यर्थः पक्षांतरमाह सर्वदावाशुभोदयइति॥
तत्रविदाकृतात्मासाक्षात्तारणप्रोक्तनिधिवारादिकंसर्वमनवेक्ष्यस्वात्मनःस्वासस्यशु
भोदयएवेत्यर्थः अयंपक्षःसिक्षविषयः अन्येःकार्याःकुर्यात्सिद्धासिक्षात्मानात्तत्रोक्ता
नगर्वितरहितत्वेनोक्तत्वात् तत्रापिसंप्रदायानुरोधिनाविदितत्वेनापिनित्यनैमित्तिकोपा
सिनिरतेन अथतत्प्रतिष्ठाप्रकारः तंत्रराजे क्षीराज्यदुग्धैःप्रथमंनालिकेरोपसंततः॥
अभिषिंचायतोयेनकाथितेनाक्षरौषधैः आवाह्याभ्यर्च्यतल्लिंगेचक्रंसंस्थापयेज्जयेत्॥
नित्यातत्त्वासिकालोक्ताविद्ययाप्यर्चयेत्ततः कमात् स्पृशन्जपेत्करांगुष्ठश्रीचक्रंपूजयेद
पि एवंदिनत्रयंकृत्वाततोनित्यक्रमंभजेत् गंधैःपुष्पैर्नैवद्यधूपैर्दीपैर्नैवद्यतर्पणैः त्रिरा
त्रेपूजयेद्देवीयोगिनीयोगिभिःसहं एवंदेवीप्रतिष्ठायांक्रमःसान्निध्यकारकः अथतत्र
योगमाह तत्रयथोक्तमानेननिर्मितंचक्रंस्वर्णादिधातुनिर्मितंवेदाक्षरसेनशुद्धंकृत्वा
प्रक्षाल्यवेदोक्तविधिनाअग्न्युत्तारणंकृत्वाकक्षिसात्रेसंस्थापयेत्तमधाज्यदुग्धदधिनारिकेल

जलैः एथक् एथग् अभिषिंच्य सुगंधिसलिलेनाप्यभिषिंच्य जलेनाप्यभिषिंच्य पुनः सुगंधिसलिलैः प्रक्षाल्य पूर्ववत् द्वारपूजादि पीठपूजानंतरं कृत्वा तस्मिन् पीठदेवीर्मावाह्य तत्र दिननित्याविद्यां यावद्विद्यातृतीयकूटेन मूलविद्यया वा प्रत्येकं त्रिवारमभ्यर्च्य यथोक्तविधिना अंगावरणपूजां विधाय षट्त्रिंशत्उत्तरशतानाधिकत्रिंशतिसहस्रसंख्याभिः कालनित्याविद्याभिः चक्रं स्पृशन् अभिमंत्र्य पुनः श्रीचक्रपूजाक्रमेणासंपूज्य धूपदीपनानाविधनैवेद्यैः भोजयेद्देवीं संपूज्य सुवासिनीब्राह्मणान् भोजयित्वा संतोषयेत् एवंदिनत्रयं महोत्सवैः कृत्वा चतुर्थदिने नित्यपूजानंतरं देवीं विसृज्य सुवासिनीब्राह्मणान् तथैव संपूज्य प्रणम्य विसृजेत् दिनत्रये देवीं न विसृजेत् प्रत्यहं त्रिसंध्येषु सार्चनं बलिं कुर्यात् एवं प्रतिष्ठितं यंत्रं नित्यार्चनादि कुर्यात् मूर्तिप्रतिष्ठायामपि एषएव विधिर्ज्ञेयः तत्र स्थिरायोर्विसर्जनं नास्तीति विशेषः इति यंत्रप्रतिष्ठाविधिः समाप्तः ॥ सच्चिदानंदनाथेन उन्मन्यानंदसेविना विरचितं मुख्यपर्यायाराधनाख्यं त्रिपुराभूजनक्रमः इति त्रिपुराभूजनक्रमे पंचप्रकाराराध्योपचारदशकः परिछेदः ॥ अथ मुद्रालक्षणान्याह हस्ताभ्यामंजलिं कृत्वा कनिष्ठिकामूलपर्वयोः अंगुष्ठौ निक्षिपेत्सेयं मुद्रा तावाहनीमता १ अधोमुखीं तिर्यक्पर्वेतरस्थानस्थापनीयं मुद्रिका मता २ उ

त्थितौ गुष्ठमुष्ठयोरुत्कर्षयोगात्संनिधापनी ३ अंतःप्रवेशितौ गुष्ठा सेवं संरोधिनीमता ४ उन्नतमुष्टियुगलासंमुखीकरणीमता ५ देवतोपरिषडंगानां न्यासस्त्वंकलीकृतिः ६ सव्यहस्तकृतामुष्टिर्दीर्घाधोमुखतर्जनी अवगुंठनमुद्रेयमभिलोभनामिता ७ अन्योन्याभिमुखाश्लिष्टाकनिष्ठानामिकापुनः तथैवतर्जनीमध्ये धेनुमुद्रासमीरिता ८ अमृतीकरणेकुर्यात्तथासंधाकसप्तमः ८ अन्योन्यग्रथितौ गुष्ठप्रसारिततलौ गुली महामुद्देयमुद्दिता परमीकरणेकुर्यात् १० प्रयोजयेद्दिमामुद्राः देवताह्वानकर्मणि १० इत्याह्वानादिमुद्रा संक्षोभद्रावणाकर्षणवश्योन्मादमहांकुशाः खेचरीबीजयोन्यास्यानवमुद्राः प्रकीर्तिताः त्रिखंडोदरामीमनेनिपाठांतरः परिवर्त्यकरोत्स्पष्टावगुष्ठौकारयेत्समौ अनामानर्गलेकृत्वातर्जन्यौकुटिलाकृती कनिष्ठिकेनियुंजीतनिजस्थानेमहेश्वरी त्रिखंडेयं समाख्याता त्रिपुराह्वानकर्मणि १ मध्यमेमध्यगे कृत्वाकनिष्ठेगुष्ठरोधिते तर्जन्यौदंडवत्कृत्वामध्यमोपर्यनामिके एषावश्यधिनामुद्रासर्वसंक्षोभकरणी २ एतस्याएवमुद्रायाः मध्यमेसरलेपरा क्रियतेपरिमेशानि सर्वविद्राविणीमता ३ मध्यमानर्जनीभ्यांतुकनिष्ठानामिकेसमे अंकुशाकारकृत्वाभ्यांमध्यमे परमेश्वरि -- कर्षिणीमुद्रात्रैलोक्याकर्षणीमता ४ संपुटीकृतकरौकृत्वातर्जन्यावंकुशाकृती

परिवर्तक्रमेणैवमध्यमेतर्द्यागते क्रमेणादेवीतेनैवकनिष्ठानामिकादयः संयोज्यैनि
विडाः सर्वाः अंगुष्ठावयदेशतः मुद्रेयंपरमेशानि सर्वत्रयकरीमता ५ संमुखौतु
करौकृत्वामध्यमामध्यगेनुजे अनामिकौतुसरलौतद्वहिस्तर्जनीद्वयं दंडाकारौत
तांगुष्ठौमध्यमेतु निदेशगो मुद्रेषोन्मादिनी नाम्नी कुटिनीसर्वयोषिनां ६ अस्या
स्तुनामिकायुग्मःमध्यःकृत्वाकृती तर्जन्यामपिनैवक्रमेणविनियोजयेत्
द्वयंमहांकुशामुद्रासर्वकार्यार्थसाधिनी ७ सव्येदक्षिणहस्तेतु सव्यहस्तेतुदक्षि
णं बाहुंकृत्वामहादेवियुक्तौतेनक्रमेणतु तर्जनीभ्यांसमाकृतेसर्वी सामुद्रिम
ध्ये अंगुष्ठेतुमहेशानिसरलावपिकारयेत् द्वयेसारेश्वरीनाममुद्रासर्वो न
मोनमा ८ परिवर्त्यकरौस्पृष्टावूर्ध्ववंद्रांकुनिःप्रिये तर्जन्यांगुष्ठयुगलेयुगपत्कार
येन्नतः अधःकनिष्टवृष्ठेमध्यमेविनियोजयेत् नथैवकुटिलेयोज्यसर्वाधस्तादना
मिके बीजमुद्रेयमवि ख्यातासर्वसिद्धिप्रदायिनि ९ मध्यमेकुटिलेकृत्वातर्जन्यूपरिसं
स्थिते अनामिकामध्यगतेतथैवहिकनिष्ठिके सर्वाएकत्रसंयोज्यअंगुष्ठोपरिपीडिता
एषातुप्रथितामुद्रायोनिमुद्रेतिसंस्थिता एतामुद्रामहेशानित्रिपुरायामुयोदिताः पूजा
कालप्रयोक्तव्याःयथानुक्रमयोगतः इतिश्रीमुद्राः वामहस्तात्तर्जन्यांदक्षिणामध्यमान्यसेत्

राम
२५७
२५०

वामस्यमध्यमांयांतुतर्जनीदक्षिणान्यसेत् अन्योन्यतस्तसंश्लेषात्दृढबंधनमावरेत्॥
एषापाशिधामुद्राकरेवामोर्ध्वकस्थिता १ तर्जनीवतर्जनीकृत्वामध्यमांमध्यपर्वणि संयो
ज्याकुर्वयेत्स्थितमुद्रेषांकुशासंज्ञिका दक्षिणोर्ध्वरेसम्यक्स्थिताससंदर्शयेन्मुदा २ तर्ज
नीमुष्टिसंस्थबाणमुद्रासमीरिता दक्षिणाधःकरस्थावेणुपूर्वमयीपरा ३ मुष्टिबध्वा
दृढंसम्यक्धनुर्मुद्रासमीरिता वामाधःकरसंस्थास्याद्विपुंडेक्षुजामता ४ इत्यायुध
मुद्रा वामहस्तांगुष्टगर्भेकनिष्टादक्षिणाजयेत् कनिष्टागर्भकेवामेदक्षांगुष्टविनिक्षि
पेत् अन्योन्ययोगतोदेवित्रमुद्रासमीरिता १ वामहस्तस्यपृष्ठेनदक्षिणंकरमुत्तनेत्
दक्षांगुष्ठंचैववामकनिष्ठायोतुविन्यसेत् तथादक्षकनिष्ठातुवामांगुष्ठोपरिन्यसेत्
न्यकरयोस्पृष्टाःसरलाःमत्स्यमुद्रिकाः २ इतिमत्स्यमुद्रांतरं वामहस्तस्यपृष्ठेतुदक्षिणं
करमुत्तनेत् अंगुष्ठोरुजुकरेतिउभयोर्मत्स्यमुद्रिका ३ कनिष्ठांगुष्ठकौसंकोकरयोरित
रेतरं तर्जनीमध्यमानामासंहृताःसमवर्जिताः मुद्रेषागालिनीप्रोक्ताअर्घ्यस्यापरिवर्जिता
४ दक्षांगुष्ठपरांगुष्ठेक्षिप्वाहस्तद्वयेनतु साधकात्मकोमुष्टिंकुर्यात्साकूर्ममुद्रिका ५
दक्षांगुष्ठतर्जनीयोगात्तत्तन्मुद्रा ६ वामांगुष्ठानामिकयोगात्तत्तन्मुद्रा ७ मणिबंधस्थि

तोरुत्वाप्रसृतोजलिकौकरो कनिष्ठांगुष्ठयुगलेमिलित्वांतःप्रसारयेत् ससजिह्कारयमुद्रेयंवैश्वा
नरप्रियेकरि ८ मृगीशूकरिका हंसीशेखीसुधावतुष्टयं शूकरीकरसंकोचात् हंसीमुक्तकनिष्टि
का मृगीकनिष्ठितर्जन्योमुक्तोत्तिस्रइतीरिताः मध्यमाग्रेअनामाग्रंतदग्रेवकनिष्ठिका कनि
ष्ठिकाग्रेंगुष्ठयोगात्मध्यमस्यापितर्जनी शेखमुद्रेयमाख्याताचतुर्वेगप्रसाधिनी करसंको
चीसंयुक्ताग्रपर्वांगुलिरूपाशूकरी मुक्तकनिष्ठिकारतरांगुलियोगजनिता हंसी कनिष्ठिका
तर्जन्योमुक्तेनिअंगुष्ठमध्यमानामयोगरूपामृगी तर्जन्यग्रंमध्यमाग्रेकिंचिदेवस्पृशति अ
नामाग्रमपिकिंचिदेव कनिष्ठिकाग्रेअंगुष्ठाग्रं सात्रांखी इतिहोममुद्रा वाममुष्टेःशिरोभागे
वामांगुष्ठंप्रसारयेत् त्रांखमुद्रेतिमाख्याता मंडलस्पर्शनेबुधैः अधोमुखेवामहस्तेऊर्ध्वोशंद
क्षहस्तकं सिक्तांगुलिरंगुलिभिःसंयोज्यपरिवर्तयेत् एषांसंहारमुद्रास्याद्विसर्जनविधौ
स्मृता इतिमुद्रालक्षणानि सच्चिदानंदनाथेनउन्मन्यानंदसेविना चित्तशुध्यर्थमारभ्या
तास्त्रिपुरापुजनक्रमः इतित्रिपुरापुजनक्रमेमुद्रालक्षणाख्योषोडशःपरिछदः ७ शुभ
मस्तु इतिप्राणायामलक्षणमाह इतिरूतानिधिरूतोपवनिश्चुवंपरमदैवतमंत्रजपादिषु।
पवनसंयमनंतत्सुनिनावारेयमिहजसमसोमनुमिछति इतिवचनात् प्राणायामविधौ

अथेछंयोगपीठन्यासंतत्रादितिवचनाच्चमूलविद्ययाप्राणायामत्रयंकृत्वायोगपीठन्यासंकुर्यात्।
तत्रप्राणायामविधिर्विधिश्चते तत्रप्राणायामोनाडिपिंडोदशांगुलाधिकानांआयामः आयममाप
मासंकुर्वितभावः शरीरसाम्यंशरीरान्यूनभावयादनंवेतिप्राणायामस्तथैः एंतअतएवंपव
नसंयमनमित्यत्रकं नथाचत्रिपुरासारसमुच्चये अथेदंशरीरंस्वकीयांगुलीभिर्बुधैःपस्तव
त्यंगुलायामयुक्तं हिनेशांगुलीभिःशरीरात्समीरोधिकः प्राणसंतोमनोयोगवद्भिः इहप्राण
वायुंसदाभ्यासतोयोनरोन्यूनभावंनयत्येनमंगात् समस्तशरीरेनवस्थलेस्मिन्संपूज्यावु
धैरुत्तमोयोगवित्स इति सवपूरकाद्यंगत्रयात्मकः तथाचअंगत्रयात्मकः प्रोक्तःपूरकंकुंभकंरे
चकेति तत्रकुंभकएवप्राणायामश्रेष्ठोमुख्यः इतरयोस्तदुपकारकत्वात् तथाचोक्तंज्ञानार्ण
वे कनिष्ठानामिकांगुष्ठैर्यैनासापुटधारणं प्राणायामःसविज्ञेयस्त्रिधानीमध्यमेदिनेति स
पुनर्द्विविधःसहितःकेवलश्चेति तत्रसहितोपिद्विविधः रेचकादिक्रमःपूरकादिक्रमश्चेत
तत्ररेचकादिक्रममाह योगशास्त्रे प्राणायामत्रिधाप्रोक्तोरेचकुंभकपूरकैः सहितःकेव
लश्चेतिकुंभकोद्विविधोमतः विरेचपूरकःकार्यस्तानेरहितकुंभकः यावत्कैवल्यसिद्धिःस्या
त्तावत्सहितमभ्यसेदिति स्पष्टीकृत्यतेनक्रममाह प्रथमेरेचकुंभकेत्रिविधः

प्रपंजानायामः मुंवेदक्षियानिलमथानयेद्यामयामध्यायासंस्थापयेत्रनाड्येत्येवंप्रोक्तानिरेवकादि
नि षोडशादिगुणंवतुषष्टिक्रमात्राणिलानिरेवकमात्रेति नाड्येत्यस्यदक्षिणेत्यादिभिःसंबंध
तथाच इडावामेननोमध्येसुषुम्नापिंगलाप्रेरे द्विगुणेति षोडशानांद्विगुणाद्वात्रिंशत्
क्रममाहत्रिपुरासारसमुच्चये त्रीतोभुमीर्गणशनैःसमीरमाहरेत्सोदरमादरेणाविकारमात्रा
भिरेवनतद्रःकालाग्निमालापिनत्रिवृत्तिः ततोधारयेन्मारुतंधीरचेताश्चतुःषष्टिभिः स्वेसमा
पूरितंतं वहिर्मोस्वातारेवयेन्मदमनेदर्धाग्निरंतर्निरुध्यतांभिः तथावामकेभ्रेरेषट्शत्यो ह
रंकुंभकेचैवरेवकंविविनयेत् मूलाधारेलयंकृत्वापीत्वावायुंशनैःशनैः येथपूरयेद्देहंन
त्वलोविजितेंद्रियः ततस्तंसमयेद्वायुंप्रकाशागतमानसः कुंभकेविनयेद्विद्वान्विधामुक्तिक
रांशुभां तद्वातुरेवयेद्वायुंगम्यतेयत्समीरणः देहानिसार्यन्मंत्रीस्वेदहर्षतमोगुणं वामेन
पूरयेद्वायुंदक्षिणेनविरेचयेत् महेंद्रेणसमेनैवमंत्रीभुकुंभकमभ्यसेत् सदाकुंभकयोगेनल
भ्यतेसिद्धिरुत्तमा अभ्यासीकारयेन्मात्रांयेयेष्टंतत्तदर्शनं यथाशक्त्यपिबेद्वायुंयथाशा
क्त्यावमभ्यसेत् स्वभावेवसजेद्वायुंततःसिद्धिरजायतइति तत्रास्योविद्यायांपूरकादिक्रमए
वनित्यातंत्रोक्तः रेचकादिक्रमस्तु साधारणतयाप्राप्तः श्रुत्यसारेणैवप्रपंचसारादौवेष्टनादिसा


DR. BHAU DAJI MEMORIAL

सामान्यतयोक्तत्वात् तथाचश्रुतिः प्राणायामस्त्रयःप्रोक्तोरेचकपूरककुंभकइतिस्मसाधितप्राणा
नांरेचकादिक्रमइतिकश्चित् उभयथापिसामान्यत्वं तंत्रोक्तरेणपूरकादिक्रमोपिसामान्य
तयावेष्टवादोपपद्यते तस्मादस्मिन्नपिप्रकारेसामान्यत्वेनोभयोःप्रोक्तोविशेषत्वेनपूरका
दिक्रमस्यैवमुख्यत्वमाहमहेश्वरः पूरकंकुंभकंचैत्यादि तत्रवायोरादानकालेपूरकनामा प्रा
णायामः धारणकालेकुंभनामात्यागकालेरेचकनामा तडत्कं बाह्यादाहरणंवायोरुदरेपूरको
हिसः संपूर्णकुंभवद्वायोधारणंकुंभकोमतः बहिर्यद्रेचनंवायोरुदाराद्रेचकःस्मृतः तथाच
दक्षिणाम्रर्नसंहितायो मूलमंत्रेणदेवेशिवामेनाहर्यद्वीदरं कुंभकेनत्रिरावृत्यदक्षिणेन
रेचयेदिति तथाचज्ञानार्णवे आसनेसम्यगासीनोवामेनाहर्यद्वारमित्यादि तत्रराजेपि
वामेननासारंध्रेणपूरयेदमतासना स्मरन्मंत्रंसमरूपश्चादक्षिणेनासायारंध्रेदिति तत्रक्र
ममाहमूलाधारइत्यादिलयामितिमनसालयमित्यर्थः नेनैववायोरपिलयप्राप्तिस्यात्
तथाचतंत्रराजे मूलाधारेमनःकृत्वावायुमाहर्यमूलतः नाडीचक्रांतरंनीत्वासर्वोगानिरवा
रयेत् नचेष्टामितिसहजगतागमनशीलंवायुंयथाशक्त्याकर्षयेदित्यर्थः प्रकाशोपरमाभा
गतेनीलीनमानसंयस्यसप्रकाशागतमानसः नेजस्वेप्रकाशात्मविद्यानंदपरमात्मस्वरूपः


DR. BHAU DAJI MEMORIAL

सन्कुंभयेदित्यर्थः अथांगत्रयासक्तप्राणायामेकापिविघ्नाध्यानंभवतिवेत्यतआह कुंभकेविंतयेदि
त्यादिविघ्नोक्षोपयोगीज्ञातंविद्यांतांसावश्रीविद्यैवित्यतआह मुक्तिकरींश्रुभामिति तेनकुंभककाले
मूलादिब्रह्मरंध्रांतंमूलविद्यांविभावयेदिति कंश्रीविद्यायाःसूक्ष्मध्यानंकुर्यादितिसगर्भषट्पुरक
दिषुप्रत्येकमशक्तौकेवलंकुंभकेवेतिध्येयं रेचकप्रकारमाह तथाचोक्तं यदुक्तंयुक्तंपिबेद्वायुयुक्तंयुक्तंतु
धारयेत् यथासिंहोगजव्याघ्रोभवेद्धार्य्यशनैःशनैः यथैवहिनिजोवायुरन्यथाहतिसाधकं प्राणायामै
नयुक्तैनसर्वेयोगसयोभवेत् अयुक्ताभ्यासयोगेनसर्वरोगसमुद्भवः हिक्काश्वासकासश्चशिरःकर्णो
क्षिवेदनः भवेतिविविधारोगाःप्राणायामव्यतिक्रमात् तन्त्रशास्त्रोक्तमार्गेणप्राणायामान्समाचरे
दिति देहानिस्तारयेदितिरेचकयोगयुक्तेनवायुनासहदेहस्थस्तमोगुणोबहिर्निस्तरतिभावयेदि
त्यर्थः अथपूरकादेर्नाडीनियममाह वामेनेत्यादिरत्रैकप्रमाणयामेद्वितीयादियुग्मेतुदक्षिणेनैवपू
रयेत् नचोक्तं येनैवसत्यजेत्तेनैवपूरयेत्तथानः रेचयेच्चततोन्येनशनैरेवंपुनःपुनः तथाचयोगशा
स्त्रे अथासनेदृढेयोगीवश्यीहितमिताशनः गुरूपदिष्टमार्गेणप्राणायामान्समभ्यसेत् चलेबा
तेचलंचित्तेनिश्चलेदृढबंधने योगीस्थाणुत्वमाप्नोतिततोवायुंनिबंधयेत् यावद्वायुस्थितोदेहे
तावज्जीवेतमुच्यते मरणंतस्यनिष्कंपोनितरांवायुंनिबंधयेत् मलाकुलासुनाडीषुमारुतोनैवमध्यगः
कथंस्याद्उन्मनीभावःकार्यसिद्धिःकथंभवेत् सुषुम्नेतपदासर्वनाडीष्वेकंमलाकुलं तदेवज्ञयतेयोगीपा

सासंग्रहणेक्षमः प्राणाभ्यासेततःकुर्यान्नित्यंसात्त्विकयाधिया यथासुषुम्नापार्श्वेस्थामात्राशीघ्रंप्रयांतिव॥
बाह्यप्राणासनोयोगीप्राणेनेंद्रेणपूरयेत् धारयित्वायथाशक्तिपुनःसूर्येणरेचयेत् प्राणेसूर्येणरे
चयेत् प्राणेसूर्येणवाकृष्यपूरयेदुदरंशनैः विधिवत्कुंभकंकृत्वापुनश्चेंद्रेणरेचयेत् येनत्यजेत्तेनपीत्वा
धारयेदनिरोधयेत् रेचयेच्चततोनान्येनशनैरेवंनवेगतः प्राणेवेहिउयापिबेन्नियमितंक्रमात्पुनर्न्यमा
रेचयेत्पीत्वापिंगलयासमीरणमथोबलात्त्यजेद्यावम् सूर्यचंद्रमसोरनेनविधिनाभ्याससदात
न्यतांशुध्यानाडीगणाभवंति यमिनोमासत्रयादूर्ध्वतः इति तथात्रिपुरासारे विपरीततमोविद्धीत
बुधः पुनरत्यथतद्विपरीतमिति अमुनाविधिनासुमनाःसततंमरुतोविदधीतनुसुसंयमनमिति
अथकुंभकफलमाह सदेत्यादिकेवलकुंभकयोगेनेत्यर्थः सुसाधितेवायोमात्रासंख्यानमुक्तंप्रथमा
भ्यासेतत्राप्यंकमाह अभ्यासीत्यादि अभ्यासीप्रथमाभ्यासीनत्वदर्शिनामात्रांत्रयंचेष्टंयथे
ष्टंकारयेदित्यर्थः एतदेवस्पष्टयतियथाशक्तेत्यादि तथाचसतिप्रथमाभ्यासीयथोक्तंसंख्यामा
त्रायान्कंन्यूनमपिकुर्यात् मध्यमाभ्यासीयथोक्तसंख्यामिव उत्तमाभ्यासीततोधिकसंख्यामपि
कुर्यादितियथेष्टपदनार्थं अथमात्रालक्षणमाह नारदः कालेनयावतात्मीयोहस्तःस्वजानुमंडले
पर्येतिमात्रास्यात्तुल्यास्त्वेकस्यासमात्रया तथा फेत्कारिनेत्रे जानुपदसणीकृत्यनतुन्नमविलंबि
तं क्रियतेसागुल्फीस्फोटः सामात्रापरिकीर्तितेति अपिचकात्यायनीतंत्रे मध्यमूलायावदग्रमंगु

ष्टनिपीड्यते मात्रासाप्रेर्च्यतेसद्भिर्योगेष्वष्टप्रयच्छति वरुणस्तुतनन्मेत्रोच्चारणामेवमंत्रा तथा
वृगोमतीयंत्रे रेचयेद्दक्षिणेनायुंपूरयेद्वामतःस्ततः द्वात्रिंशदप्यसेन्मंत्रप्राणायामसउच्यते॥
ततःपूरकानांरंकुकेष्वसंख्यार्थः एतनुरेचकादिपदो अतएवकुंभकएकजपादिकंनेतर
योः उक्तंवदक्षिणानासूर्निकल्पे प्राणापानोसमोकृत्वास्वविधापेचकुंभकं हृत्संकजेसमासीनं
माध्यायेद्यतमानसः तथागस्तिसंहितायां यावच्छक्तिनियम्यरुद्धमनसेवनयेन्मनु रा
ममुहुर्मुहुर्ध्यानपरोक्तविधिनासुधीः असन्नियम्यकुंभकंकृत्वारामध्यायन्यावच्छक्तिजये
दितिस्वेदः एतेनयत्रविशेषोनोक्तस्तत्रयथाशक्तिमंत्रेजपेदितिवेद्यवः तयेवरीत्यैकंवदृष्ट
न्यायेनसर्वत्रैवायंप्रकारः अतएवश्रीविद्यायांवामकेश्वरतंत्रे कुंभकेकिंवद्विद्वान्विधामु
क्तिंशुभामित्युक्तमितिवदंति वरुणस्तुतसगर्भकेप्राणायामेकेवलकुंभकेकुंभकएवसहित
कुंभकेराक्षावेगत्रयेपूरकोकुंभकेत्वावश्यकेजपध्यानमितिनुतेषांवचनानोनिर्गलितार्थं
सर्वमूलयाबालयानादशाक्षोप्रणवेनवाकार्यः तदुक्तंकारीतंत्रे प्राणायामत्रयंकुर्यान्मू
लेनप्रणवेनवेति निषिद्धंप्रणवोच्चारणोषणावस्थानेसार्धत्रिमात्रकमोंकारोहेयः तदुक्तंकालि
कापुराणे चतुर्दशाक्षरोयस्तुसार्धत्रिमात्रसंयुतः नादबिंदुसमायुक्तःसूक्ष्मप्राणोसनुरुच्यते

राम
२५४

इति अत्रस्तुसाधीतप्राणानोपूरकादोत्रिपुरासारोक्तेसंख्याजपादौ तंत्रराजेतदन्यथा तदुक्तं
तंत्रराजे एवंस्तुसाधितेपश्चाद्वात्रिंशन्मात्रयाहरेत् धारयेत्तच्चतुःषष्ट्याशनैरेचयेत्तुरीयतः
इतितुश्रीकामतंतदेतयोर्मतयोर्विकल्पः तत्राशक्तोसामान्यपटलेत्वेकारितंत्रोक्तसंख्या
वाकार्यो तथा तथादशमात्राभिपूरकःक्रियतेबुधैः तस्माद्दिगुणमात्राभिकुंभकःक्रियते
सदा तस्मात्रिगुणमात्राभिरेचकःक्रियतेतथा प्राणायामत्रयंत्वेवमेकेकंवितयात्मकंइति॥
अत्राप्यशक्तौसुभगोदयोक्ताकार्या तथा प्राणायामत्रयंकुर्यान्मरुद्विद्यांहृदापुनरिति
तद्वचनंतस्तुतोव्याख्यातं दक्षिणनाड्याएकवारंमूलमुच्चरन्वायुमाहृत्यचतुर्वारंकुंभकं
कृत्वावामनाड्यादिवारंरेचयेदितिप्राणायामत्रयंकुर्यादित्यर्थः इति अत्रदक्षिणेनपूरणंयुग्मेवा
ऽथवामयुग्मेपूरकादोवामस्येवोक्तत्वात् अथवातन्मतनवेदमितिवयंनविद्मः तत्राप्यशक्तौ
ज्ञानार्णवदक्षिणोर्ध्वनिर्भ्यामुक्तस्यकुंभकेनत्रिरावृत्त्यस्येवग्रहणमितिसंक्षेपः इतिसहितकुंभ
कः अथकेवलकुंभकः तदुक्तंयोगशास्त्रे रेचकंपूरकंमुक्त्वासुखंयद्वायुधारणं प्राणायामोयमि
त्युक्तःसवैकेवलकुंभकः केवलंकुंभकेसिद्धेरेचपूरविवर्जिते नतस्यदुर्लभंकिंचित्रिषुलो
केषुविद्यते राजयोःकेवलकुंभकेनयथेष्टंवायुधारणेराजयोगपदंवैतन्नदुर्लभते नात्रसंशयः

कुंभितप्राणरेचनकुंभीचित्तनिराश्रयं एवमभ्यासयोगेनराजयोगपदंव्रजेत् कुंभकान्तं
उलीबोधःकुंडलीबोधतामेवेत् अनर्गलासुषुम्नावहश्चसिद्धिश्चजायते इति हस्वर्थः ठ
वंइः नाभ्यांसूर्यवंद्राभ्यांदक्षिणावामाभ्यांपिंगलेंडाभ्यांप्राणवोयोर्मूलाधारादौयोगः
हठयोगइत्यर्थः सवप्राणायामरूपः राजयोगः कुंडलिनीयोगः सवसुषुम्नामार्गेणष
ट्चक्रभेदकमेणब्रह्मशक्तिसामरस्यमुख्यानुभवरूपः अथयोगसिद्धस्यलक्षणा
माह तंत्रराजे कंपश्रमपुलकानंदोद्वेमल्यस्थैर्यलाघवाः तद्वाकांतिप्रकाशोवयोगसिद्धिस्यलक्ष
णमिति तथायोगशास्त्रे वपुःकृशत्वंवदनेप्रसन्नतानादस्फुटंत्वनयनेसुनिर्मले आरोगि
ताबिंदुजयोग्निदीपनंनाडीविशुध्देहठसिद्धिलक्षणं इतिकेवलकुंभकः इत्युक्तः प्राणायामः
सगर्भश्चेतिद्विविधःस्यात् नदुक्तंरुद्रयामले सगर्भश्चेतिविगर्भश्चप्राणायामोद्विवि
धामतः इति तथायोगिनीतंत्रेअयंप्राणायामः सकलदुरितध्वंसनकरोविगर्भः प्रोक्तोसो
ज्ञानगुणफलोगर्भकालितः जपध्यानयेतः सतुनिगदितोगर्भरहितःसगर्भस्तुकथ्योपुनि
परिदृष्टयोगनिरतैरिति सपुनस्त्रिविध उत्तमाधममध्यमाभेदात् तथावतंत्रराजे प्राणा
यामस्त्रिधाप्रोक्तउत्तमाधममध्यतः लाघवोद्भूतलक्षणागउत्तमेचित्तनिर्वृतिः सर्वांगस्वेदसं

वृद्धिरधमेप्रथमेतया सर्वांगपंकनंप्रोक्तमभ्यासात्कालसंयुतः तेषुत्तमागुणाभ्युदया
सात्कालयोगतः तस्मात्सदाभ्यसेत्प्राज्ञःसायंचनियमेनवैः इतितथात्रिपुरासारसमुच्चये शुचिः
प्राणायान्प्रणवसहितान्षडंगावशीप्रमाणयोयंवप्रतिदिवसमेवविदधतुते द्विजायस्तुभूपश्चर
कृतांबोभिकलितं पुनर्येतेमासादिहदुरिततूलोद्यदहनः त्रायंत्यमीवाद्विरपिहिमसेजं
नांतरापार्जितपराणुजान् सवत्सराद्वत्सपरंतदेकंप्राकाशयत्येवयत्युतास्यमिति योगशा
स्त्रेतु प्रातर्मध्यंदिनेसायमध्यरात्रेचकुंभकान् त्रीनेत्रीतिपर्यंतंचतुर्वारंसमभ्यसेत् क
नीयसीभवेत्स्वेदःकंपोभवतिमध्यमे ग्रनिष्टयुत्तमेप्राणोरोधेपद्मासनेमुहुः जलेनस्
श्रमजानेनगात्रामर्दनमाचरेत् दृढतालघुतावैवनेनगात्रस्यजायते अभ्यासकालेप्रथ
मेन्नक्षीराज्यभोजनं ततोभ्यासेदृढीभूतेननात्रियमग्रहः इतितत्रक्रमः विहितपद्मा
सनः संमिलितनयनयुगलोमूलाधारार्पितचित्तवृत्तिर्मूलमंत्रादिकमुच्चरन्हृदिदेवींध्या
यनिडयामेवमनाड्याषोडशमात्रयावायुमादायमूलाधारंप्रापथ्यांगुष्ठकनिष्ठिकानामि
कामिनांसापुटेविधायचतुष्षष्टिमात्रयातंवायुंसंभरित्वाद्वात्रिंशन्मात्रयापिंगलयादक्षिणा
नाड्याशनैःशनैःस्तंवायुंरेचयेदितिद्वितीयः प्राणायामःपुनरुत्थेयपिंगलयावायुंशनैःशनैः

ललि०
२५६

समाकृष्यतथैवकुंभइत्यातथैवेडयारेचयेदित्यर्थः एवंवेपरीत्येनविंशतिवारंषोडशादशाष
ट्त्रिर्वायथाशक्तिकुर्यात्ततः शुध्यिमवाप्नुयादितिएवंजपादोजपांतेचप्राणायामः कार्यः
तदुक्तं त्रिःषट्द्वादशावारंवाकृतःपरतोजपादिति रागादितिलकेपि मात्रावृध्यिक्रमेणैवसप्त
कृत्वादशषोडशेतिसंक्षेपः अत्रसर्वत्रप्राणायामेनैवसर्वेषांकर्माधिकारः अकारेणनिंदा
श्रवणात् तदुक्तमागस्तिसंहितायां प्राणायामैर्विनायद्यत्कृतंकर्मनिरर्थकं अतोयत्नेनकर्त
व्याःप्राणायामाःशुभार्थिभिरिति अतएववक्ष्यकोपेफलशुध्यिरिवरूजांमिति इतिप्राणाया
मविधिः ❀ ❀ ❀ इतिश्रीजगदंबार्पणमस्तु ❀ ❀ ❀ ❀ श्रीरस्तु ❀ ❀

राम
२५६



Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017